तिचेत् एवंतर्हिस्वव्यापारेचकर्तृत्वं सर्वत्रैवास्तिका
रकइतिन्यायेनकरणादिविलोपप्रसंगः नस्वव्यापा
रापेक्षयाकरणादिव्यवहारः किंतुप्रधानक्रियापेक्ष
या अस्तिहिकाचित्क्रियायामुद्दिश्यप्रवर्त्तमानानां
कारकानामवान्तरव्यापारयोगेनत्ववान्तरव्यापारा
र्थमेवतेषांप्रवृत्तिरितिचेत् तर्हि नदयस्यैवकर्तृक
र्मादिव्यवहारविशेषनियमेकिंकारणमितिर्विवेच्यं
स्वातंत्र्यादितिचेत् ननुतदेवकिमन्यत् प्रयत्नादि
समवायादिनिर्विविच्याभिधीयतां तस्मात्सर्वत्र
यतमानव्यापारएवाख्यातार्थः तथापिफलानुकू
लत्वैवात्मप्रत्ययस्यप्रवृत्तिनिमित्तंयत्नद्वंद्वाक्षेपतोऽ
प्यतइतिचेत् नभावनेवचयत्नात्मासर्वत्रात्मासर्वत्र।

ख्यातगोचरः तथाविवरणध्रौव्यादाक्षेपानुपपत्तिः

केन हि तदाक्षिप्येत् न तावदनुकूलत्वमात्रेण तस्य प्रय

त्नेनाव्यापनात् न हि यत्नस्यैकार्थसमवाय्येवानुकू

लत्वं तत एव न संख्यया तस्याः संख्येयमात्रपर्यवसाना

त् कर्त्रेतिचेत् न द्रव्यमात्रस्याकर्तृत्वात् व्यापारवत

स्त्वाभिधाने व्यापाराभिधानस्यावश्यात्युपगन्तव्यत्वा

त् नापि धात्वर्थेन तदाक्षेपः विद्युतदृश्यादौ तदसंभ

वात् न हि तत्र धात्वर्थो भावनापेक्षी स्वायानित्यत्वात्

तत्र न भविष्यतीति चेत् न पूर्वपरीभूतभाव नानुभवा

स्याविशेषाद्भावनोपरागे न हि अतथाभूतोऽपि धात्व

र्थः तथाभासत इति न च पदान्तरलभ्यया भावनयाऽ

नुकूलतायः प्रत्ययार्थस्यान्वयः तदसंभवात् न स्व

लुभक्तस्यैवसाभिधीयते धातूनां क्रियाफलमात्रा

भिधायित्वात् अन्यथा पाक इत्यादावपि भावनानु

भवप्रसंगात् नापि चैत्र इत्यादिना पदान्तरेण प्रकृति

प्रत्यययोरुभयोरप्यकारकार्थत्वात् इतमित्यादेः

कारकपदत्वात्तस्य च क्रियापहितत्वात् नाभिधा

नमाक्षेपो वा कथमन्यथौदनमिस्पृक्ते किं भुङ्क्ते किं प

चतिचेति विशेषकाकांक्षेतिचेत् न पचतीत्युक्ते किमो

दनं तेमनं वेति विशेषाकाकांक्षादर्शनात् साक्षेपा

भिधानयोरन्यतरमन्तरेणानस्यात् तस्यादश्यायां

न चेदाक्षेपोऽनुनमभिधानमेवेति स्यादेतदभिधी

७१
71

यत्वां तर्हि कर्त्तापि तदनभिधाने हि संख्येयमात्रमाश्रि
प्यसंख्या कथं कर्त्तारमन्वियात्. न तु कर्मादिकमपि शा
कस्यैौपचतिशाकस्यौदनात् पंचमीस्याहो विरोध
निरस्ता चैत्र इतिकर्त्तारमविरुद्धमनुगच्छतीतिचेत् चै
त्रदनं पचतीत्यत्र कागतिः एकत्र निर्णातः शास्त्रार्थे।।
अन्यत्रापितथा यववराहादिवदितिचेत् नपच्यत
इत्यादावपितथाभावप्रसंगात् चैत्राभ्यांचैत्रैरिति वि
रोधनिरस्तास्सूपइत्यविरुद्धं कर्मसमनुक्रमतीतिचेत्.
चैत्रमैत्राभ्यांशाकस्सूपौपच्येते इत्यत्र कागतिः अ
न्यत्र निर्णीते नार्थेन व्यवहार इतिचेत्. नपचतीत्य
त्रापितथाभावप्रसंगात्. तत्रपूर्वेक एव निर्णयः प
च्यत इत्यत्र तु पर इतिचेत्. न विशेषाभावात्. आ
त्मनेवपदद्वयस्मिपदाभ्यां विशेष इतिचेत् नपचते
पच्यतेयक्षत इत्यादि विप्लवप्रसंगादिति दृश्यते च
समानप्रत्ययाभिहितनान्वयः संख्यायाः तद्यथा
भूयतेस्वप्यत इत्यादौ नहि तत्र कर्त्ता कर्मणा अन्येनै
व वाक्ये नचिदन्वयेः किंतु भावेनैव अनन्वये तद
भिधायिनो अनर्थकत्वप्रसंगात् आक्षिप्तेन चान्व
येन तत्रापि कर्त्रैवान्वयापत्तेः कथं हि सुप्यतेस्वपीती
त्यनयोः कर्त्रास्तिं प्रति विशेषः स्यादेतद्भाव
कर्मणोविस्याद्यनुशासनबलाद्भावकर्मणीप्रत्यय
वाच्ये ततस्तदभिहितासंख्या ताभ्याम न्वीयते य

स्तुप्रत्ययोनतन्नोत्पन्नस्तदभिहितासंख्यानुरुध्यन्वायुर्वदे
शानाकृवदितिन्यायेनकर्त्तारमेवाश्रयतइतिनियमः न
विपर्ययप्रसंगात् शेषात्कर्त्तरिपरस्मैपदंकर्त्तरिसवि
सापघ्नुशासनयलाद्भावकर्त्तोरोप्रत्ययवाच्योतस्तदभि
हितासंख्यातान्याभन्वीयते यस्तुप्रत्ययोनतत्रोत्पन्नस्त
दभिहितासंख्यातेनैवन्यायेनकर्म्मैवत्समाश्रयेदिति
नियमोपपत्तेः तस्मान्नातिक्रमंमपहायपयथानुशास
नमेवगत्यतइतिप्राप्तं अत्रोच्यते आक्षेपलब्धसंख्ये
येनाभिधानस्यकल्पना संख्येयमात्रनानेपिसाकां
क्षेणाव्यवस्थितिः संख्यातावदियंभावनानुयायिनी
यंयंभावनानुविदधातितसंख्यापीतिस्थितिः एकप्र
त्ययवाच्यत्वनियमात् भावनाचशुद्धप्रातिपदिकार्थमा
कांक्षति नहिव्यापारवंतंव्यापारआश्रयति आत्माश्र
यात् समवायंप्रतितदनुपयोगात् विजातीयव्यापा
रवत्ताअकर्तृकत्वाच्च नचद्वितीयाद्याःप्रातिपदि
कविभक्तयः ततःप्रथमानिर्दिष्टेनैवभावनान्वीयत
इत्यस्यान्वययोग्यतानियमात् संख्यापितदन्वयापि
नीतेनैवान्वीयतइतिनातिप्रसंगः नञर्थवत् यथाहि
चैत्रोनब्राह्मणोनगौरोतस्पंदतेनकुंडलीसाहैवविशेष
णविशेष्यसमभिव्याहाराविशेषेपिनञाततदनभिधा
नाविशेषेपिनञर्थस्याविशेषणासेनैवान्वयोनविशेष्यां
सेन ननुवाधकानुत्ततथानहिविशेष्यनतदन्वयेवि

शेषणोपादानमेवार्थवद्भवेत् तन्निषेधेनैव विशेष
णनिषेधलब्धेरुभयत्तिषेधेवावृत्तौ वाक्यभेदादनावृ
त्तौ निराकांक्षत्वादिति चेत् ननुस्वत्वात् समानप्रत्ययो
पात्तभावनाक्षिप्तान्वयोपपत्तौ बाधकविनासन्निहितप
रित्यागेन व्यवहितपरिग्रहस्य गुरुत्वात् भावनायाश्च
सामान्याक्षेपेपि साकांक्षापरित्यागे निराकांक्षान्वयोनु
पपत्तेर्न ह्यन्यतराकांक्षान्वयहेतुः अपि तूभयाकांक्षा
प्रातिपदिकार्थो हि फलेन सहान्वयमलभमानः क्रिया
संबंधमपेक्षते भावनापि व्यापारभूता सति व्यापारिण
मित्युभयाकांक्षा कटं कटेनेत्यादि तु कारकतयैव स
मन्वितं न व्यापारान्तरमपेक्षत इति निराकांक्षत इति
निराकांक्षमिति अत एवास्यतेसुप्यत इत्यादौ नाक्षि
प्ते नान्वयः नहि चैत्रेण तिष्ठतीयायोवस्थधस्य भावना
यामाकांक्षास्ति भाव्याकांक्षास्तीति चेत् न फलेन शय
नाशनादिना धात्वर्थेनान्वयात् फलसम्बंधिनश्चात्र
कर्त्रे न तिनेकात् नहि शयनादयो धात्वर्थाः कर्त्रे तिने
क संबंधाः न च फलतत्संबंधिव्यतिरेकेनान्यो भा
व्योनान्वयमपेक्षते स्यादेतत् किमिति न प्रयुज्यते क
टः करोति चैत्रमित्यादि अभिहितानभिहितव्यवस्था भावा
दिति चेत् न चैत्रमिति प्रथमान्तस्यासाधुत्वात् द्विती
यान्तस्य तु कर्मवचनत्वेन तत् संबंधात् भाव्यानपेक्ष
णी भावना भावकमात्रमपेक्षते न च कटस्य चैत्रप्रतिभा

वकर्तृत्वविपर्ययात्· अन्नाम्नेन नु तयाविव क्षायां प्रयु
ज्यत एव प्रयुज्यतां तर्हि कटः करोति चैत्र इत्यादि न
नित्यसंदिग्धत्वेन वा क्वार्थो समर्प्यकत्वात्· ततस्तद
पनुत्तये विशेषस्य व्यंजनीयत्वात् प्रयुज्यतां तृतीयया
चैत्रेणेति· एवं देवदत्तः क्रियते कटमिति प्रयुज्यतां द्वि
तीययेति चेत् न· अप्रयोगात्· नह्यनाम्नेनाप्येवं प्र
याणि प्रयुज्यन्ते· लक्षणाविरोधे न कुत एतदेवेति चेत्·
न· लोकस्य पर्यनुयोज्यत्वात्· नहि गार्गीकयेतिपदं
साधिति साध्वाभिधायिपदस्य संनिधिमनपेक्ष्य प्रयु
जते तस्य तद्रूपाचिनैव विहितत्वादिति चेत्· एतदे
व कुतः· लोके तथैव प्रयोगदर्शनादिति चेत् तुल्यं क
रोतीत्यादि कर्मविभक्तिसमभिव्याहारेणैव प्रयुज्यते
क्रियत इति कर्तृविभक्तिसमभिव्याहारेणैवेति किमत्र
क्रियतां इयमेव विशेषमुररीकृत्यानभिहिताधिका
रेनुशासनेन तावान् परामर्षः सर्वेषां तद्धितपदमाद
माद धातिरस्मभिधानानभिधानविभाग एव प्रत्याद
दर्शयांपेशल्यइति स्यादेतत्· भवतु सर्वोस्यां तसा
धारणी भावना कालविशेषसंबंधिनी तु सा लडाद्यर्थः
कालस्तयापरामृष्टा लिङ्घर्थ इति चेत्· न· यत्त्वपदेम
समानार्थत्वप्रसंगात्· विषयोपरागात्तु परागाभ्यां वि
शेष इति चेत्· न· यागय लङ् इत्यनेन पर्यायत्वापत्तेः
कर्तृसंख्याविशेषानभिधानाभिधानाभ्यां विशेषः

त्तिचेत् नयागयत्नवानित्यनेनसांम्यापत्तेः इष्टसा
वायमर्थइतिचेत् इतोवत्सरशतेनाप्यप्रवृत्तेः फ
लसमभिव्याहाराभावान्नप्रवर्त्ततइत्तिचेत् नस्वर्गका
मोयागयत्नवानित्यतोप्यप्रवृत्तेः नतु कस्यहेतोः न
हियत्नोयत्नस्यहेतुर्यत्नप्रतीतेर्वायत्नस्यकारणम
पिलिङ्छा नचसापिप्रतीताप्रयत्नजननीयत्तसैवलि
ङर्थइत्यवगम्यतां अपितुसत्तया नाचलिङः श्रुति
कालेसासती नचलिङैव तांजनयति अर्थविशेष
मप्रत्सायन्त्या तस्यास्तज्जनकत्वेमुस्यत्तिग्रहवैयर्थ्या
त् अनुपत्नवलिङांचइछानुसत्तिप्रसंगात् एतेनवृ
द्धव्यवहाराद्युत्पत्तिर्भवन्तीवात्वस्यात्मनिप्रवृत्तिहेतु
र्योवगतस्तमेवाश्रयेत् स्वयंचकुर्यामितिसंकल्पा
देवायंप्रवृत्तस्ततः सएवलिङर्थइतिनिरस्तं कुर्या
मितिहिप्रयत्नोवास्यादिछावानाद्यः स्वात्मनिवृत्ति
निरोधादिति तद्दितीयः साहिसन्तयैवप्रयत्नाप
यादिनी नचलिङ्प्रयोगकालेसासतीसुकं फ
लेछातन्निसर्गविहितयासत्यपिनप्रयत्नंप्रतिहेतु
रन्यविषयत्वात् तदार्थश्चशास्त्रवैयर्थ्यात् तस्याः
कारणान्तरतएवसिद्धेस्तत्वतिसर्थमपिशास्त्रानपे
क्षणात् तस्यामनोवेद्यत्वात् अप्राप्येचशास्त्रा
वकाशतनइतिधानेस्वर्गकामइत्तिकर्तृविशेषण
योनत्रुक्त्यात् तथाहियजेतेत्यस्ययागकर्त्तास्व

र्गकामइत्यर्थःस्यात्· यदिचफलविषयैवसासाधन
विषयंप्रयत्नंजनयेत् अन्यत्रापिप्रसुवीत· नियामका
भावात् हेतुफलभावएवनियामकइतिचेत्· अज्ञा
तस्यतस्यानियामकत्वे लिङं विनापिस्वर्गेच्छातोयागे
प्रवृत्तिप्रसंगात् ज्ञातस्यतत्साधनत्वस्यनियामकत्वे
तदिच्छैवतत्रप्रवर्तयतु· योयत्कामयतेसततसा
धनमपिकामयतएवेतिनियमात्· नचसातदानीं
सती· नचतज्ज्ञानमेवप्रयत्नजनकंतत्वलिङाक्षिप्यत
इतियुक्तं स्वर्गकामोयागचिकीर्षावानितरतोपिप्रवृ
त्तिप्रसंगात्· लिङैवेच्छाप्रतीयतानिच्छन्नपिसर्वःप्रव
र्त्तेत स्वसंबंधितयात्वागमस्तथानतुसामान्यतइति
चेत्· न· प्रथमपुरुषेणतदनभिधानेतस्याविध्यर्थ
त्वप्रसंगात्· उदनकामस्त्वचिकीर्षावानित्यत्रापि
प्रवृत्त्योपत्तेः अपिचसंकल्पज्ञानाद्यदिप्रयत्नोजाये
त तथापिसंकल्पस्यकुतोजन्मकिमर्थंचसंकल्प
ज्ञानादेवप्रयत्नोस्त्वितिचेत् नन्विच्छाविशेषःसंक
ल्पःसतावत्सुखेस्वभावतः तत्साधनेचौपाधिकः
संकल्पविषयस्तुकथंतत्साधनत्वादेवेतिचेत्· तर्हि
तत्साधनत्वज्ञानाच्चतुसंकल्पस्वरूपज्ञानाद्भवितु
मेति अन्यथेष्टसाधनताज्ञानमप्यनर्थकमापद्ये
त· तस्मात्संकल्पःप्रवर्तकइत्यभ्युपेयते किंतुसत्ता
मात्रेणनतुज्ञातइतिनासौविधिः ज्ञानंचविषयोप

हारेणैवव्यवहारयतीति नद्विषय एवावशिष्यतद्
तिकर्तृधर्मव्युदासः अस्तु तर्हि कर्मधर्मः नेत्यु
च्यते अतिप्रसंगान्नफलं· नापूर्वं तत्वहानितः
तद्वत्वा प्रथमः फलेछायाः प्रवृत्तिं प्रत्यहेतुत्वादति
प्रसंगादित्युक्तत्वात् नद्वितीयोऽव्युत्पत्तेः लिंगो हि
प्रवृत्तिनिमित्तमपूर्वं चवास्यात्· कार्यत्वंवा उभयं
वा नप्रथमः शब्दप्रवृत्तिनिमित्तस्यापूर्वत्वस्यप्र
माणांतराऽवगतावपूर्वत्वव्याघातात्· अनवगताव
व्युत्पत्तेः संबंधिनोऽनवगमे संबंधस्यग्रहेतुशक्य
त्वात्· ततएवावगतावितरेतराश्रयदोषात्· नव
गंधवत्वेनोपनीतायां पृथिव्यां पृथिवीशब्दवद्दूर
विप्रकर्षिणा कार्यत्वेनोपनीतेऽपूर्वे तत्वेननिवृत्ते
नापूर्वे प्रवर्त्तते लिंगितियुक्तं तत्रोभयोरपिप्रतीयमा
नत्वेनसंदेहे कल्पनागौरवप्रसंगपुरस्कारेण पृथि
वीत्व एवसंगतिविश्रान्तेरुपपत्तेः नत्वत्रापूर्वत्वप्र
तीतिः स्यादेतत्· कार्यत्वमुपलक्षणीकृत्यतावदे
षाप्रवृत्ता लिङ्· तदुपलक्षित स्वयागो वाच्यमानो वा
यवावाशब्दे तरप्रमाणगोचरेणाधिकारिविशेषण
स्वर्गसाधनसमर्थः नचाकाम्यफलेकामीनियो
क्तुंशक्यते· ततोऽन्यदेवालौकिकंकिंचिदनेनोप
लक्ष्यते योलिङादिप्रवृत्तिगोचर इति· किमनुप
पन्नमितिचेत्· न· उपलक्षणंहि स्मारणमनुमाप

नेवा-उभयमप्यनवगतसम्बंधेनाशक्यं-नहिसंस्कार
कर्मनोवदृष्टवद्वाकार्यत्वमपूर्वत्वमुपलक्षयतिज्ञा
नायेक्षणात्-ननोहस्तीवहस्तिपकं धूमइव धूमध्व
जंतत्संबंधज्ञानात् उपलक्षयेत्-नत्वन्यथा-तथाव
न्यापसंपाद्नाप्यपरस्परु दितं-नहियुक्तिसहस्रेणव्यप्यवि
दितेसङ्ग-तिग्रहो।अविदितसंगतिर्वा शब्दः प्रवर्त्तय
तइति एतेनभेदाग्रहात् क्रियाकार्यत्वमुपस्थितिरितिनि
रस्तं नह्यज्ञातेभेदाग्रहोव्यवहारांगंअतिप्रसंगात्
किंचापूर्वत्वेप्रवृत्तिनिमित्तेकल्प्यमानेलौकिकीलिंगन
र्थिकाप्रसज्येत-तत्रोपलक्षणीयाभावात्-तत्वकार्य
त्वमेवप्रवृत्तिनिमित्तमितियदि-प्रकृतेपितदेवास्तुल
घुत्वात्-संभवाच्चेति- अस्तुतर्हितदेवप्रवृत्तिनिमित्तं
तर्कसंपादनयात्वपूर्वव्यक्तिलाभइतिचेत्-न-नि
सनिषेधापूर्वयोरलाभप्रसंगात्-नचास्मिन्पक्षेए
कत्वनिर्णीतेनशास्त्रार्थेनान्यत्रतथैवव्यवहारइ
तिसंभवति कार्यत्वस्यैवप्रवृत्तिनिमित्तत्वेननिर्णीत
त्वात् नत्वपूर्वत्वस्यन्यायसंपादनायाश्चतत्राभावा
त्-फलानुगुण्येनहिव्यक्तिविशेषोलभ्येत-नचतत्त
त्रश्रूयते नचाश्रुतमपिकथयितुंशक्यते-बीजाभा
वात्-नहिविध्यन्यथानुपपत्त्याकल्पेत-कार्यत्वप्रत्य
यान्यथानुपपत्त्यावालोकवत् नप्रशमस्त्वदर्श
नेनस्यापेयरूपत्वात्-यतःश्रुतस्वर्गफलत्वेपिसा

७५
75

घ्यविधिर्विहिरुच्यते। न द्वितीयः शाब्दधर्मे
दनपेक्षणात् लोको हि तत् प्रत्ययदृष्टाभ्युपायतन्त्रा
धीनो न तु वेदं ह्यभ्युपगमात्। अन्यथेष्टाभ्युपाय
तैव प्रथमं वेदादवगन्तव्या। प्रमाणान्तराभावात्। ततः
कार्यत्वस्यानुमानिको विधिर्न शाब्दः स्यात्। आनुमानि
कं फलमस्त्वयद्धि कर्त्तव्यं तदिष्टाभ्युपाय प्रथमं वेदा
दवगन्तव्या प्रमाणान्तराभावात्। ततः कार्यत्वस्यानुमा
इतिव्याप्तेः इत्यपि न युक्तं। सुखेन व्यभिचारात्। तद
न्यत्वे सतीति चेत्। दुःखाभावेन व्यभिचारात्। फलं वि
हायेति चेत्तत्तदेव किमुक्तं। इष्टं स्वभाव न इति चेत्।
तर्हि ततोऽन्यदनिष्टं स्यात्। तच्च कर्त्तव्यमिति व्याघातः
तत् सांकल्पमिति चेत् तर्हि तत् साधनत्वे सतीति सा
ध्याविशिष्टं विशेषणं स्वभावतो नेदमिष्टं। कर्त्तव्यं च त
तो नूनमिष्टसाधनमिति साधनार्थ इति चेत्। स्वभाव
तो नेदमिष्टमित्यसिद्धेः अन्योद्देशप्रवृत्तकृतिव्या
प्यत्वात्। अन्यथा तदसिद्धेः ततोऽन्यावान्तादन्यतरापा
यइति। अस्तु नित्यनिषेधापूर्वयोरलाभः किन्त्वछि
न्नमिति चेत्। किन्त्वछिन्नाछिन्नं यदा कामाधिका
रेपितदलाभः न हि लिङ्गाकार्ये स्वर्गसाधनमुक्तं ना
पि स्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्यात्त
त्वर्थं। ब्राह्मणत्वादिवदधिकार्यवच्छेदमात्रेणैवो
पपत्तेः न चेदमनुमानायस्यव्यपदिष्टत्वायत् कर्त्तव्यं

तत्तस्येष्टसाधनमिति अन्ये तु यागस्वाभाविककर्त्तव्य।
तासिद्धेः तदिच्छयैव तत् कर्त्तव्यतायाः सुखेनानैका
न्तिकत्वात् औपाधिककर्त्तव्यतायाश्चेष्टसाधनत्व
मप्रतीत्यप्रत्येतुमशक्यत्वात् किमनया विशेषवि
तयाप्रतीयते तावदेतत् तु इष्टादन्यदिच्छतोऽन्यत्का
र्यमित्येतावतैवानुमानमिति चेत् नन्वनितममभिधा
नीयं योग्यत्वमन्वीयते अन्यदिच्छतस्त्वान्यत् क
र्तव्यमन्वयायोग्यतत् कथम्। त
त् साधनत्वसिद्धिरिति चेत् एवं तर्हीष्टसाधनत्वेका
र्यसमवायिकर्त्तव्यताभि धः नचाभि
ताभिधानेपि तत् साधनत्वसिद्धिः अधिकार्यव
च्छेदमात्रेणान्वययोग्यतोपपत्तेः नच कार्यत्वमपूर्वे
संभवति तद्धि कृतिव्याप्यता चेद्व्रीह्यादिष्वेव सिद्ध
त्वात् कृतिफलत्वं चेद्यागस्यैव ततस्तस्यैवाहत्योत्प
त्तेः कृत्युद्देश्यता चेत् सा स्वर्गस्यैव निसर्गसुन्दरत्वा
त् नत्वपूर्वस्य तद्विपरीतत्वात् स्तनपानादिवदौपा
धिकीति चेत् सापि यागस्यैव स्वर्गस्य साध्यत्वेहि
तौ यागस्य साधनत्वे नैवान्वयात् कालव्यवधाना
न्नैतन्निर्वहतीति चेत् यथा निर्वहति श्रुतानुरोधे
न तथा कल्प्यतां व्यापारद्वाराकथंचित् स्यान्नतु
भिन्नकालयोर्व्यापारव्यापारिभावः कारणं च व्या
पारेण युज्यते अव्यवधानेन पूर्वकालनियमः त

त्वमन्यथात्वनिप्रसंगादितिचेत् न पूर्वभावनियम
मात्रस्य कारणत्वात् कार्यानुगुणावान्तरकार्यस्ये
व व्यापारत्वात् कृषिविकित्सादौ बहुलं तथात्वदर्श
नात् लांछनिकोसावितिचेत् न मुख्यत्वेनिनोधाभावा
त् अस्तु तर्हि पुत्रेण हते ब्रह्मणि विरध्वस्तस्य पितु
स्तमवान्तरव्यापारीकृत्य कर्तृत्वं तथा च लोकयात्रा
विप्लव इतिचेत् न सत्यपि सुते कदाचित्तदकरणा
त् तस्मिन्नसत्यपि च कदाचित् करणादनिकहिकत
यातस्य व्यापारत्वायोगात् यं जनपित्वैव हि यस्यय
त्पूर्वभावनियमनिर्वाहः स एव तं प्रतीतस्य व्यापारो
परः यथानुभवस्य स्मरणं प्रतिसंस्कारः तस्य ह्य
न्वयव्यतिरेकानुविधानेन सिद्धे तदन्यथानुपपत्या
संस्कारः कल्प्यते न त्वन्यथा नथेहापि नचैवं त
था पित्रा स्वभिदुवरारविमोकसमसमयहतस्य हन्तृ
त्वं न स्यात् स्याच्च स्वनिवेशशयानस्य त्वत् पितुरिति
एतेनोभयं चेतिनिरस्तं अस्तु तर्हि क्रिया धर्मए
व कार्यत्वं विधिः दितिप्रसेति
ततः कुर्यामिति संकल्प प्रवर्त्तत इतिचेत् न कर्त्त
व्यमेतन्मयध्या तं कर्त्तव्यममे
दमित्युविनार्थोवात् तत्र प्रथमो न संकल्पाद्विध
तो व्यवहितकार्यसंकल्पा हि कर्त्तव्यमयाति सन्नि
हितकार्यसंकल्पस्तु कुर्यामिति सच न लिङर्थः

सत्तामात्रेणप्रवर्त्तनादित्युक्तं· तदेतत् कर्त्तव्यतायांजा
तीयांप्रवर्त्ततइतिवक्तस्यितौभ्रान्तेर्ज्ञेयामितिगृहीतं
अचित्यन्तुक्रियाधर्मःप्रागभाववत्वतस्मिन् सतिशक्य
त्वंचातस्मिन्सतिकर्त्तारंप्रत्युपकारकत्वंवाप्रथमेकु
तश्चिदपिननिवर्त्तेत॰ द्वितीयेदुःखेपितथाविधेप्रव
र्त्तेत तृतीयेतुवक्ष्ये अस्तुतर्हिकरणधर्मः· नकर
णंहियदस्तद्धर्मोअभिधावास्यात्· तदर्थोभावना
दिः तद्धर्मइष्टसाधनतावानप्रथमः असत्वादप्रव
त्तेश्चनाभिधापिगौरीयसी वाधकस्यसमानत्वात्·
परिशेषोपिदुर्लभः सह· तिप्रतिसंधानाधिकायो
तस्यांप्रमाणाभावात्·अन्यसमवेतस्यापूर्ववदन्यव्या
पारलोपपत्तेः विषयतयापिचस्वव्यापारंप्रतिलिङ·
वद्धेतुत्वाविरोधात्· अधिकत्वेपितितोप्रवृत्तेः·वा
लानांतदभावेपितद्भावात्·शब्दान्तरेणात'च्छाविना
मप्यप्रवृत्तेः नचविलक्षणेवर्णलिङोविषयः तद्वैल
क्षण्यंप्रतिपत्तिप्रतीतिचेत्·अर्थविशेषोपिस्यात्·
प्रवृत्तिमात्रंप्रतिचेदभिधासमवेतंतदितिकुतः त
त्संनिधानादितिचेत्·न·अनियमात्· अन्यस्यनि
षेधादितिचेत्·न·प्रवृत्तिहेतुत्वनिषेधस्यनुसत्वात्·
तत्संनिधिनिषेधस्याशक्यत्वात् शब्दैकवेद्यत्वे
चाप्युत्पत्तेः प्रवृत्त्यन्यथानुपपत्तिसिद्धेप्युत्पत्तिरसि
पिवार्त्ते· नहिप्रवृत्तिहेतुःकश्चिदस्तीतिप्रवर्त्तते २

७७
77

ष्टसाधनतानुस्यात्. सर्वो हि मया क्रियमाणमेतन्मम
समीहितं साधयिष्यतीति प्रतिसंधत्ते. ततइच्छतिकु
र्यामिति ततः करोतीति सर्वानुभवसिद्धं तदयंस्तु
सितसुर्येज्ञानात् प्रयत्नजननीमिच्छामवाप्नवान तद्ज्ञा
नमेवहि लिङ्. श्चाहि रणमनुमिनोती
ति तथावकर्तव्यतैकार्यसमवायिनी ष्टसाधनतां
लिङ् श्चैवइत्यवधारयति नच रंक
र्तव्यतैवास्त अवस्याभ्युपगमनीयत्वात्. कृत
मिष्टसाधनतयेति यथाहिनेष्टसाधनतामात्र
त्रतीत्यप्रवर्तते असाध्येषुव्यभिचारात्. तथाप्रय
त्नविषयस्वरूपमपिप्रतीत्यत प्रवर्तत एव. किंतुप्र
यत्नविषयसमवायिनीमिष्टोपायतामधिगम्याधि
कारी प्रवर्ततइत्यनुभवः तत्र विषयो धातुनाभाव
नाख्यातमात्रेण शेषं तद्विशेषेण लिङा एवमिष्टाभ्यु
पायतायामधिगताद्यामन्वयबलात्. तद्विषयस्ये
ष्टसाधनतावगतिरिति. कर्तव्यतैकार्यसमवायि
नीष्टाभ्युपायता लिङ्. प्रवृत्तिनिमित्तमित्युक्तं कर
णस्येष्टसाधनताभिधाने ज्योतिष्टोमेनेत्यादितृ
तीययानभवितव्यमिति तुदेश्यमवैयाकरणस्या
ववीरणीयमेवतत्संख्याभिधानंहितदभिधानमा
ख्यातेनन च यागेष्टसाधनताभिधानलिङ्किं
त्वन्वयबलात तल्लाभंइत्युक्तं यत्तुसिद्धापदेशाद

पिप्रतीयते इष्टसाधनतानचातः संकल्पात्माप्रवृत्तिनावि
रस्तीतिदेश्यमः तत्रसमुत्कटफलाभिलाषस्यसमर्थस्य
तत्साधनावगमेपिनप्रवृत्तिरितिकः प्रतीयात्‌ सर्वे
पक्षसमानञ्चैतत्समानपरिहारंचेति किंतेनेति सर्वं
समंजसं अत्राभिधीयते अस्मत्प्रयत्नसमवायिनी
ष्टसाधनताप्रवृत्तिहेतुस्तथापिनासौलिङर्थः संदेहा
त्‌ साहिकिंसाक्षाद्देवलिङावगम्यतेस्तनयानादाव
नुमानादिववालेनकिंयातत्प्रतिपादितात्कुतश्चिद
र्थादनुपीयते चेष्टाविशेषानुमितादिवाभिप्राय
विशेषात्‌ समयाभिज्ञेनेतिसंदिह्यते एवंमतिसाना
भिधीयताइत्येवनिर्णयः हेतुत्वादनुमानाच्चमध्य
मादेतियोगतः अन्यत्रकृप्तसामर्थ्यान्लिषेधानुप
त्तितः अग्निकामोदारुणीमथ्नीयादितिश्रुत्वाकुतश्च
सुक्तेहिवक्तारोभवंति यतस्तन्मथनादग्निस्यसिद्ध्य
तीति तरतिमृत्युंतरतिब्रह्महत्यांयोऽश्वमेधेनय
जतइत्यादिष्टाभ्युपायतायांनवगतायामनुमिन्वते
वैतान्त्रिकाः यदश्वमेधेनयजेतमृत्युब्रह्महत्या
तरणमइत्यादिविधिंनिंद च धे त
न्तमः प्रविशंतिये केवात्महतोजनाइत्य
तोनात्मानंहन्यादित्यादिकुर्याः कुर्यामि वि
विहितवलिङ नेष्टोपायतामाह किंतुवहुसंकल्प
नहीष्टाभ्युपायोममेतिकुर्यामितिवाक्यार्थः किंतुप्र

७८
78

त्ति यत्ते ठनम्भरंयोस्यसंकल्पः कुर्यामितिस एवसर्वत्रवा
न्यत्रवकुरेवेछाभिधीयत्ते निङ. स्यवहृतांतथात्वाज्ञा
ध्येषणानुज्ञासंप्रश्नप्रार्थनाशंसालिङि. नान्यत्त्रका
स्ति यांवक्तुनिछामननुविदधानस्तस्याभाहितेति
साज्ञायान्तुश्रोत्तरिपूजासंमानवृत्तिकासा ध्येषणा
वारणाभावव्यंजकात्वनुज्ञा अवधानप्रयोजनासं
प्रश्नः लाभेछाप्रार्थना शुभाशंसनमाशीरिति
नचविधिविकल्पेष्वन्येषुनिषेधउपपद्यते तथा
हि यदाअभिधाविधिःतदानहन्यात्. हननभाव
नानांभिधीयत इतिवाक्यार्थोव्याख्यातांनिरस्तः
यदाकालत्रयायएमष भावनातदानेति संवंधे
असंताभावोमिथ्या यदाकार्यंतदानहन्यान्नह
ननंकार्यमित्यनुभवविरुद्धंक्रियत एवयतः नह
ननेनकार्येनहननकारणकंकार्यमस्तीत्यर्थइत्य
पितथा दुःखनिवृत्तिसुखावाप्त्योरन्यतरसंभवा
त्. हननकारणंकमपूर्वंनास्तीत्यर्थइतितुनिरस्तंकं
हृष्टार्थिनंप्रवर्त्तयेदेवेत्तिसाधुःशास्त्रार्थः अहन
नेनापूर्वंभावयेदितिवाक्यंकारणस्यानादित्वेन
कार्यस्यापितथाभावप्रसंगात्. भावनायाश्चतदवि
षयत्वात् अहननसंकल्पेनेतितुयावज्जीवमवि
छिन्नयंकल्पः स्यात् सकृत्कृत्वेववानिवृत्तः प
श्चाद्धन्यादेवाविरोधात्. सम्पादितात्वनेननियोगा

र्थः यावद्यावद्धननसंकल्पवांस्तावत्तावद्धि यरीत संकल्पेनापूर्वंभावयेदिति वाक्यार्थः तथाऽनृतस्या धिकारित्वादित्यपि वार्त्तं तदश्रुतेः प्रसक्तं हि प्रतिवि ध्यते नाप्रसक्तमिति चेत् न वै किंचिदिह प्रतिविध्य ते तदनापः प्रतिपाद्यते इति हि प्रतिषेधार्थः इह त्वहननसंकल्पकारणकापूर्वं वाक्यार्थः किंच न हन्यादिति यहननापूर्वस्य कर्त्तव्यत्वप्रत्ययो जातो वेदा त् जातश्च हननक्रियायां नागात् निःफलञ्च कार्यादयेक्षितफलं कार्यं गरीय इति न्यायेन हन्या देवेति वेदव्याख्याकौशलमास्तिक्याभिधानिनो मी मांसकदुर्दुरूटस्य इष्टसाधनताप्रक्षेपि न हन्या न हनन भावनेष्टाभ्युपाय इति वाक्यार्थः तथा चा निष्टसाधनत्वं कुतो लभ्येत तर्हीष्टसाधनत्वंय न्न भवति तदवश्यमनिष्टसाधनमुपेक्षणीयस्या पि भावात् यद्वागादि प्रसक्तं प्रतिषिध्यते तदु वश्यमनिष्टसाधनं दृष्टं यथेदं सविषतन्नं न भु ञ्जीयादिति तेन न वेदप्यनुसास्यत इत्यपि न साधी यः प्रतिषेधार्थस्यैव चिंत्यमानत्वात् न हि कर्त्तव्य त्वस्येष्टसाधनत्वस्य वा नायानाऽभावः प्रतिपा दयितुं शक्यते लौकिकानालौकिकप्रमाणसि द्धत्वात् तथापि प्रतिपाद्यते तावदिति चेत् न यास्वरागप्रतिषेधेनानैकान्तिकात्वात् नासौप्र

माणमितिचेत् न- अर्थविपर्ययप्रतिपादनास्या
पितथाभावात् तात्पर्यतः प्रमाण्यमितिचेत् न
विधिनिषेधयोरनन्यपरत्वात् नविधौपरः शा
ब्दार्थइतिवचनात् तथापिनिषेधेतथाभविष्य
तीतिचेत् न- अविनाभावतदुद्देशप्रवृत्त्योरभा
वात् नाप्यस्वराविद्यादिवदस्यनञोविरोधिव
चनत्वंक्रियासंगतत्वादसमर्थत्वाच्च तस्माद्विधि
वेकुरभिप्रायः प्रवृत्त्यादौलिङादिभिः अभि
धेयोऽनुमेयास्तुकर्तुर्विष्टाभ्युपायता तत्रस्वयं
कर्तृकक्रियेच्छाभिधानंकुर्यामिति सम्बोध्यक
र्तृकेच्छाभिधानंकुर्याइति शेषकर्तृकक्रियेच्छा
भिधानंकुर्वीतेति तथाचाग्निकामोदारुणीम
थ्नीयादित्यस्याःनौकिक्याःवाक्यस्यादयमर्थः संप
द्यते अग्निकामस्यदारुमथनेप्रवृत्तिर्ममेष्टेति
ततःश्रोताअनुमिनोत्तिनूनंदारुमथनयत्नोऽ
स्मेरुपायः यद्विषयोहिप्रयत्नोयस्याष्टेनेष्यते
सतस्यापेक्षितहेतुः थाममैव
पुत्रादेर्भोजनादिविषय इतिव्याप्तेः विषंनमा
क्षयेदित्यस्यतु प्रवृत्तिर्मे
मनेष्टेत्यर्थः ततःश्रोताअनुमिनुतेनूनंविषन
क्षणाभावनानिष्टसाधनंयद्विषयोहियत्नःक
र्तुरभिमतसाधकआप्तेननेष्यते सततोऽधिक

तरानर्थहेतुः तथानेनावगतस्वपथामममैवपुत्रादेःक्री
डाकर्दमनस्रपणादिविषयइतिव्याप्तेः लौकिकेष्वेवा
क्येष्वेवंप्रकारःकदाचिद्बुद्धिमधिरोहति नतुवैदि
केषुतेषुपुरुषस्यनिरस्तत्वादितिचेत्. न. निरास
हेतोरभावात् तदस्मिन्नपिप्रमाणंनास्तीतिचेत् मा
भूदन्यतत्तविधिरेवमावङ्मैवप्रयोगेप्रमाणंश्रुति
कुमार्योःकिमत्रक्रियतां लिङ्वालौकिकार्थानि
क्रमेयएवालौकिंकालरववैदिकास्तएवामीषामर्था
इतिविप्लवेतः यावजवगडदशादिवाक्यवदनर्थक
त्वप्रसंगइतिभवस्वस्थः स्यादेतत्तथापिवक्तृणा
मुपाध्यायामेवाभिप्रायोवेदेविधिर्नवेत्. कृतस्वतं
त्रवक्ता परमेश्वरेणेतिचेत्. न. तेषामनुवक्तृतयाभ्या
साभिप्रायमात्रेणप्रवृत्तत्वेनशुकादिवत्तथाभिधाभि
प्रायभावात् भावेपि. नराजश्यामनानुयादिनोभि
प्रायआज्ञाकिंनामराजनरावेतिलौकिकोनुभवइ
ति श्रुतेःखल्वपि कृत्स्नएववेदोयंपरमेश्वर
गोचरः स्वार्थद्वानैवतासर्थंतस्यस्वर्गादिवद्बुधो
नसंत्येवहितेवेदभागायत्रपरमेश्वरोनगीयते त
थाहिसच्छब्देनपुरुषसूक्तेषुविभूसारुद्रेषुशब्दब्र
ह्मत्वेनमंडलब्राह्मणेप्रपंचेपुरस्कृत्यनिः प्रपंचत
योपनिषत्सु परमपुरुषत्वेनमंत्रविधिषुदेहावि
र्भावैरुपाख्यानेषु. उपास्यत्वेनचसर्वत्रेति. सिद्धार्थे

८०
80

तयानतेप्रमाणमितिचेत् न॰ तद्धेतोः कारणदोषशं
कानिरासम्प्रभाव्यक्तार्थसाधारणत्वात्॰ अन्यत्रा
मीषांतात्पर्यमितिचेत्॰ अयप्रतिपदनद्वारा॰शब्दमा
त्रतयावा॰प्रथमेस्वार्थेपिप्रामाण्यमेषितव्यं तस्यार्थस्या
नन्यप्रमाणकत्वात्॰ अतएवतत्रतस्यस्मारकत्वमात्रमि
त्यपिमिथ्या तत्प्रतिपादकत्वेपिनतत्रतात्पर्यमितिचेत्॰
न॰स्वार्थापरित्यागेनज्योतिःशास्त्रवदन्यत्रापितात्प
र्यैकोदोषः अन्यथास्वर्गनरकव्रासश्रोत्रियादिप्रति
पादकानामप्रामाण्येवृद्धविप्लवेत्॰तत्राबाधनात्तप
मितिचेत्तुल्यं नतादृगयंः क्वचिद्दृष्ट इतिचेत्॰स्वर्गोदृष्टो
पितया तन्मिथ्यात्वेतदर्थिनामप्रवृत्तौविधानानर्थक्य
प्रसंगइतिचेत्॰ इहापितदुपास॰नाप्रि ध्यानर्थक्यप्रसंगः
तन्मिथ्यात्वेहिसालोक्यसायुज्यादिफलमिथ्यात्वेकः
द्वेषावानतमुपासीतेतितुल्यमिति वाक्यादपि संस
र्गभेदप्रतिपादकत्वेत्यत्रवाक्यत्वमभिप्रेतं तथाच
यत्पदकदंबकं यत् संसर्गभेदप्रतिपादकं तत्तदन
पेक्षतज्ज्ञानपूर्वकं यथालौकिकं॰ तथाचवैदिकमि
तिप्रयोगः विपक्षेबाधकमुक्तं संख्याविशेषादपि
स्यामभूवंभविष्यामीत्यादिसंख्यासवक्तृगा समाख्या
पिनशाखानामाद्यप्रवक्तनाहते कार्यतयाहिप्राकृसं
ख्योक्तासंप्रतिनुप्रतियाद्यतयोच्यते॰नयास्युत्तमपुरु
षानिहितासंख्यावक्तारमन्वेतीतिसुप्रसिद्धं असिव

तत्प्रयोगः प्रायशो वेदे । ततस्तयाभिहितयापि स एवानुगंतव्यो अन्यथा अनन्वयप्रसंगात् । अथवा संख्याविशेषः समाख्याविशेष उच्यते काठकं कालापमित्यादयो हि समाख्याविशेषाः शाखाविशेषाणामनुस्मर्यन्ते तेच न प्रवचनमात्रनिबंधनाः प्रवक्तॄणामनन्तत्वात् । नापि प्रकृष्टप्रवचननिमित्ताः उपाध्यायेभ्यो पि प्रकर्षे प्रसुतान्यथाकरणदोषात् । तत्पाठानुकरणे प्रकर्षाभावात् । कश्चित् अनादौ संसारे प्रकृष्टः प्रवक्ता रइति को नियामकः नाप्याद्यः प्रवक्तृः समाख्येति युक्तं भवद्भिस्तदनभ्युपगमात् । अभ्युपगमे एव वेदनाथइति तथा विप्रतिपत्तिः स्यात् तद्ब्राह्मणत्वे सत्यवान्तरजातिभेदा एव काठत्वादयस्तदध्येया तदनुष्ठेयार्थो वा शाखा तत्समाख्ययाव्यपदिश्यत इति किमनुपपन्नं । न । क्षत्रियादेरपि तत्रैवाधिकारात् ननु यो ब्राह्मणस्य विशेषः स क्षत्रियादौ संभवति । न च क्षत्रियादेरन्यो वेद इष्यते । न च कठाः काठकमेवाधीयते तदर्थमेवानुतिष्ठन्तीति नियमः शाखासंचारस्यापि प्रायशो दर्शनात् प्रागेवं नियम आसीदिदानीं विप्लव इति चेत् । विप्लव एव नहि सर्वदा कठत्वाद्यवान्तरजातिविप्लवादित्यइतिरेवेयं तस्मादाद्यप्रवक्तृ प्रवचननिमित्तविप्लव एव तर्हि । न एवायसमाख्याविशेषसंबंध इत्येव साध्विति स एव भगवानेवं श्रुतेनानुमितः स्वकेश्वितत्साक्षादपि दृश्यते प्रमेयत्वादेर्घटवत् । ननु तत्र साम

८१
81

ग्रीरहितैः कथं द्रष्टव्यः साहि वहिरिंद्रियगर्भो मनोगर्भो
वा· तत्र न संभवति· चक्षुरादेर्नियतविषयत्वात्· मनसो व
हिरस्वातंत्र्यात्· तदुक्तहेत्वभावे फलाभावादित्यादि· न·
कार्यैकसंख्यायाः सामग्र्या निषेद्धुमशक्यत्वात्· अपि
च दृश्यते तावद्बहिरिंद्रियोपरमेप्यसन्निहितदेशकाल
र्थे साक्षात्कारः स्वप्ने न च स्मृतिरेवासौ पटीयसीमप्य
मिस्मरतं वेत्ति स्वप्नानुसंधानाभावात्· पश्यामि इष्ट मित्य
नुव्यवसायात्· न चारोपितमनुभवत्वमवाधनात्· अनु
पलब्धस्यापि स्वशिरश्छेदादेरवभासनात्· स्मृतिविष
यं योसावितिचेत्· यदि स्मृतिविषये विपर्यासस्तदा वु
मन्यामहे अथ स्मृतावेवायमनुभवत्वविपर्यास इत्य
र्थः तदा प्रमोषनिरस्तः न च संभवत्यपि· न ह्यन्येना
कारेणाध्यवसितोऽन्येनाकारेणानावच्छेदकतयाध्यव
सीयते तथा वस पट इत्युत्पन्नायां स्मृतौ भ्राम्यतस्त
पटमनुभवामीति स्यात्· न त्विमं पटमिति· न त्वयं प
ट इति स्मर्तेनाकारः तस्मात् एवासौ स्वीकर्त्तव्य
इति अस्ति च स्वप्नानुभवस्यापि कस्यचित् सत्यत्वं सं
वादात्· न च काकतालीयमपि न निर्निमित्तं सर्वस्व
प्नज्ञानानामपि तथात्वप्रसंगात्· हेतुश्चात्र धर्म एव·
स च कर्मवद्योगजोपि योगविधेरवसेयः कर्मयोग
विध्योस्तत्स्पयोगक्षेमत्वात्· तस्माद्योगिनामनुभवो
पि धर्मजत्वात् प्रमा· साक्षात्कारिप्रमाणत्वात्· प्रत्य

क्षफलं धर्मोननुगृहीतभावनामात्रप्रभवस्तु नधर्मेतिवि
भागइति अतस्तत्सामग्रीविरहोऽसिद्धः तथापिवि
पक्षेकिंबाधकमितिचेत् द्वेब्रह्मणीवेदितव्येइत्या
दियोगविधिवैयर्थ्यप्रसंगः अशक्यानुष्ठानोपायोपदे
शकत्वात्. नवासाक्षात्कारिज्ञानविधानमेतत्. अ
र्थज्ञानावधिनाअध्ययनविधिनैवतस्यगतार्थत्वा
दिति. एतेनपरमाणुवादयोव्याख्याताइति. तदेवंश्रुत
मधिकृत्यश्रूयते नद्दृष्टुर्दृष्टेर्विपरिलोपोविद्यतइति
एकमेवाद्वितीयमिति. पश्यत्यचक्षुःसशृणोत्यकर्ण
इति द्वेब्रह्मणीवेदितव्येपरंचापरमेवचेति यज्ञेन
यज्ञमयजंतदेवाइति यज्ञोवैविष्णुरित्यादिस्मर्यते
च. सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेति मद
र्थंकर्मकौंतेयमुक्तसंगःसमाचरेति यज्ञार्थात्क
र्मणोन्यत्रलोकोयंकर्मबंधनइति यज्ञायाचरतःक
र्मकर्मग्रंथिर्विलीयतेइति अनुशिष्यतेसांख्यप्रव
चनेईश्वरप्रणिधानमित्यादि तमिमंस्वाध्यायादि
तिनिष्ठैःप्राणायामादिनापूर्त्तेनचश्रीतातपस्विनामन
शनादिनातपसाअहिंसादिभिर्यमैःशौचसंतोषादि
भिर्नियमैरासनप्राणायामादिनायोगेनमहर्षयोपि
विविदिषंति अस्मिन्ज्ञातेसर्वज्ञातंभवतीत्येवंवि
ज्ञायश्रद्धैकतानःस्तत्परोभवेत् तत्रेदंगीयते मन्म
नाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसित्व

त्कैवमात्मानंमसरायणः ओंकारंयन्ननमसा सर्वलो
कमहेश्वरम सुहृदं सर्वभूतानां ज्ञात्वामां शांतिमृच्छती
ति इत्येवंश्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषांनास्पदमादधासिहृदयेतेशैलसाराशयाः किं
तुप्रस्तुतविप्रतीपविधयोप्युच्चैर्भवच्चिंतकाः काले
कारुणिकत्वयैवकृपयातेभावनीयानराः अस्माकं
तुनिसर्गसुंदरचिरंचेतोनिमग्नंत्वयीत्यद्धानंदनि
धेतथापितरलंनाद्यापिसंतृप्यते तन्नाथत्वरितंवि
धेहिकरुणांयेनत्वदेकाग्रतांयातेचेतसिनाप्नुवाम
शतशोयाम्याः पुनर्यातनाः इत्येषनीतिकुसुमांज
लिरुज्ज्वलश्रीर्यद्वासयेदपिचदक्षिणवामकौद्वौ
नोवाततः किममरेशगुरोर्गुरुस्तुप्रीतोस्त्वनेनपदा
पीठसमर्पितेनयावल्लीनगिरिशामयेश्वरजटाजूटस्फु
रन्मंदरस्फाटिकचूर्णपूर्णमुकुलः प्रोक्षामरामावि
धुः तावत्तार्किकचक्रवर्तिमुकुटश्रीवक्रचूडामणे
र्ज्जागर्तूदयनस्यकीर्त्तिरनघासहैजयंतीह्वितिः ॥
॥ः०ः॥ इतिश्रीकुसुमांजलिः समाप्तः ॥ ः०ः ॥

न्यायकुसुमाञ्जलिः (ख)

पत्राणि ४३ (प्रथमस्तबकः)

॥ ई ॥ श्रीकृष्णाय नमः भक्तानां कामदस्तु—रुषा कामं दहन्न
पि । अपि ज्ञानमयः स्थाणुर्यस्तमीशं स्तुवीमहि १ यतः प्र
काशते ज्योतिरपि वाचामगोचरः । कायेन मनसा वाचा परां वा
चं नमामि तां २ न्यायांभोजपतंगाय मीमांसापारदृश्वने । गं
गेश्वराय गुरवे पित्रेऽत्रभवते नमः ३ सदाचारानुमितश्रुतिबो
धितकर्तव्यताकं प्रारिप्सितप्रतिबंधकविघातकमिष्टदेवता
कीर्त्तनरूपं मच्छिष्यप्रयोगरूपं मंगलमाचरन्नेव प्रयोजनाभिधे
यसंबंधमाह सत्यं क्षेति । षो न नघो वाक्यदोषरहितो विष
याशुद्धेः पूर्वोक्तेनैव निरासात् । नीयते प्राप्यतेऽनेन विवक्षितोऽर्थ
सिद्धिरनेनेति न्यायः समस्तरूपोपेतलिंगबोधकवाक्यजातं
स एवाह्लादकतया प्रसन्नं तदेवावांतरवाक्यघटितत्वेनांजलि
मेवेतो विघ्नं यथा स्यादेवं रमयतु दुःखसामग्रीविहीनं करोतु ।
ईशस्य पदद्युगे रमयतु तदैकाग्र्यं करोतीति वा · चेतः कीदृशं
भृंगायमानं भृंग इव मकरंदे संसारिणां दुःखविगमोपायेस
तृष्णं भ्रमदनुसरद्दुःखविगमोपायमिसर्थात् । तत्र सतः स्व
स्य तदन्यानुसरणानौचित्यात् । तत्साधनानुसरणस्यापि
तदर्थतया तदनुसरणरूपत्वात् । परदुःखं दृष्ट्वा दुःखितस्य
परमकारुणिकस्य तन्निदानोच्छेदेन स्वाभवसेवेसनुभव
सिद्धं । यद्वा ये चेतो रमयतु सपूत पतु परोपकारकारणात् ।
भृंगायमानमुपकारलुब्धं भ्रमद्दुःखिनमुपकर्तुं व्याप्रिय
मा—मित्यर्थः । तथापि भूयसो धूमापि विघ्नयस्य सापस्य
सत्वात्किमनेनेत्यत—हा । ईशस्य पदद्युगे · पद्यते गम्यते

ज्ञापनेमोत्नेतिपुत्स्यत्वाप्रत्यापकयुगेप्रमाणंतर्करूपेणनिवेशितस्त
द्विषयतयोस्मादितः अन्वयिव्यतिरेकिवापदयुगंवेदस्यपौरुषे
यत्वेकेवलव्यतिरेकिणोपिदर्शयिष्यमाणत्वात् पद्यापदंज्ञानं
तद्युगंतदुभयोस्मादितंनिमित्तसम्यग्ज्ञानरूपार्थमित्यर्थः।प्रमा
णांतरव्युत्पादनस्याप्यत्रतदर्थत्वादितिभावः।ननुशब्दानुमानरू
पंपद्युदेरामत्रविवक्षितं·श्रुतोहीमादिनातदतीततोयदर्शनवि
रोधात्।ग्रंथेवशब्दोपदर्थनस्यानुमानेतदविरोधमात्रप्रदर्शन
तासमर्थकत्वात्।अनघत्वंन्यायानामुपपादयन्नाह।सत्यत्वेति।सा
तिप्रामाणिकेयक्षेमिसाधयिषितसाध्यधर्मकेधर्म्मिणिप्रकर्षे
णसंशेक्षानंयस्मात्तेनाश्रयासिद्धिर्वाधसिद्धसाधनस्वरूपासिद्धिभा
गासिद्धयोनिरस्ताः।तर्कपक्षेसन्निहीषःपक्षप्रसरःपक्षव्यापको
निस्यप्रसंजनरूपस्तर्कोयस्मात्।सतांपरामर्शकुशलानांपरिस
र्वतःसपक्षेतत्रयाविपक्षेवासत्तयायोमलःसंबंधोव्याप्तिरूपस्त
स्ययःप्रोह्योधअवाधितप्रतिबंधनिश्चयःसाध्यसाधनयोःसा
ध्याभावसाधनाभावयोर्वाव्याप्यव्यापकयोश्वायाधायादकयो
श्वतेनवद्धःस्थिरीकृतउक्तवआनंदोयेनसतथा·निससापेक्ष
त्वादसमर्थसमासस्तेनान्वयव्यतिरेकिछिसपक्षासपक्षयोः
सत्वासत्वेकेवलव्यतिरेकिणिवविपक्षासत्वंपदर्शितमितिव्या
प्यत्वासिद्धिसव्यभिचारविरुद्धनिरासः।विमर्द्दनंतद्विषयभ्रू
तप्रमाणविरोधिप्रमाणप्रदर्शनंतेननविम्लानोनकार्याक्ष
मः२इतिप्रतिपक्षविरहोदर्शितः।ननुतथाविधप्रमाणव्यु
त्यादनंनस्वतःप्रयोजनंप्रयोजनवत्तानिपेरश्रवणाच्चनत

कु॰ वृ॰
२
२

दं गमित्तत आह। अमृतेति। अमृतं मोक्षस्तत्र रसइच्छा रस्यमा
नममृतमिति यावत्तद्दभिहितो भावो द्रव्यवस्यकाशन इति न्या
पात्तस्य अस्यंद असंवद्धसंवंधोपहिताक्रियातुत्पत्तिरिति याव
त्‌॰ तदेवमाध्वीकनस्यभूरुत्पत्तिस्थानां रसपदेनखरूपनइ
ष्यमाणतां दर्शयता दुःखाभावोपिभावे घः पुरुषार्थ इति निर
स्तं। माध्वीकपदेन वोत्कटेच्छाविषयत्वं दर्शयता सुखहानावा
पितुल्यायव्ययतपानायमपुरुषार्थ इति दर्शितं। अमृतं मोक्ष
स्तस्य रसइत्छानस्य अस्यंदः प्रवाहः उत्तरोत्तरानुवृत्तिः सएव
माध्वीकं तस्यभूरुत्पत्तिस्थानमिति तु न व्याख्यानं। मोक्षेच्छायाः पू
र्वं मोक्षज्ञानादेवसंजातत्वादुत्तरोत्तरानुवृत्तेरप्युत्तरोत्तरज्ञानसा
ध्यत्वात्‌। एतावतामोक्षजनकेश्वरविषयानुमितिकरणलिंग
परामर्शविषयलिंगप्रतिपादनद्वारा मोक्षानुकूलत्वमस्य दर्शि
तं। अथवन्यापरत्व अस्त्वां जतिः अंजलिस्थानि कुसुमानि॰
तत्रानघत्वं न्यायोपात्तत्वमपर्युषितादित्वं चेत्‌ एकपक्षेपि न सा
धर्म्यं विना तदिति तदुभयसाधर्म्यमाह सस्रक्षेति। पवि षाक्षी
करण इति धात्वनुसारात्‌ पक्षशब्दोदलवचनः॰ सतू॰ पक्षा
णां प्रसरो यत्र॰ सता पक्षेणानुकूलेनरविकिरणादिनाविका
सो यस्येति वा। तेनहस्तादिनाकलिकाप्रकाशेनेनिषिद्धः। प
द्वा॰ ससक्षप्रसरः सदनुकूलविकाशः सनांसुकृतिनामनुप
हतधारणानां यरिमतः सोस्त्यविशेषस्तस्य यः प्रोद्बोधः प्र
कृस्यंज्ञानं तेन वद्धरुत्सवो येन सतथा। विमर्द्दनकरपुटसंप
र्केण न विम्लानी मान्ययाभूतसंस्थानः प्रमृत्पायोयोरस

२

स्तं प्रस्यंदत इति प्रस्यंदः कर्म्मण्यण् अमृतरसप्रस्यंदमेव माध्वी
कं तस्य भूरुसन्निस्थानं। षष्ठी। अमृतमिरसो यस्य प्रस्यंदत इ-
ति प्रस्यंदः अनयोः कर्मधारयः ननु कर्म्मसु विद्यमानेषु
जन्मानुच्छेदात्तेषां चाभुक्तानामक्षयात् भोगेवा तद्धेतुनाशु
नः कर्म्मांतरजननात्काशेषविशेषगुणोच्छेदो मोक्षः। नापीश्व
रे प्रमाणव्युत्पादनस्य मोक्षहेतुत्वे मानमिति नाप्तिः फलं। किंच
ईश्वरमननस्य मोक्षहेतुत्वे मानाभावः। आत्मा वा अरे श्रोत
व्यो मंतव्यो मंतव्यो निदिध्यासितव्यः साक्षात्कर्तव्य इति श्रु
तौ सामानाधिकरण्याद्यद्विषयकः साक्षात्कारो मोक्षजनकस्त
द्विषयकं मननं मोक्षहेतुः साक्षात्कारश्च न जीवात्ममात्रगोचरे
नं चेश्वरविषयकस्तथा। मिथ्याज्ञानध्वंसद्वारात्वस्य तद्धेतुत्वं नव
जीवमात्रगोचरमीश्वरगोचरं वा मिथ्याज्ञानं संसारहेतुर्यन्नतद्ध्वे
दस्तद्वारं स्यात्। किंतु स्वात्मगोचरं मिथ्याज्ञानमिति तत्त्वसाक्षा-
त्कार एव मोक्षहेतुरित्यत आह। स्वर्गेति। स्वर्गयोस्त्कटरागगोचर
योरपवर्गयोः परापरयोर्मुक्त्योर्मार्गे तु पापमित्यर्थः तथा च परा
परमुक्त्योरेकात्र स्यान साध्यतां दर्शयता जीवन्मुक्तिसहितापर
ममुक्तिः साध्येति दर्शितं। तेन चन प्रवृत्तिः प्रतिसंधानापहीन
त्वे शास्य देहि नश्यत्य पूर्वकर्म्मोपार्तेन शंका निरस्ता। ईश्वरमननं च
न द्वेवरं प्रमाणमस्तु साधन शक्त्यं व्युत्पादयितुमिति तद्वारा प्रमा
णव्युत्पादनमपि मोक्षहेतुः। प्रमाणव्युत्पादने च तत्तत्पक्षमननमपि
द्वौ मननपर्यंतग्रंथव्यापारः। धूमोस्तीति वाक्यस्येव वह्निविषयानु
मितिपर्यंतव्यापारत्वमिति ईश्वरमननांगतपातस्प्रमाणव्युत्पा

कु॰ व॰
३

दनमपि प्रयोजनवदिति सूचितं।ईश्वरमननं च मोक्षहेतुः तमे
व विदित्वातिमृत्युमेतीति श्रुत्या स्वात्मज्ञानस्येवेश्वरज्ञानस्यापि
तद्धेतुत्वप्रतिपादनात्।द्वे ब्रह्मणी वेदितव्ये इत्यत्र वेदनमात्रस्या
कांक्षितत्वेन प्रकृतत्वात्।श्रोतव्यो मंतव्य इत्यादेरन्वपाद्वा।ई
श्वरमननं च यद्यपि मिथ्याज्ञानोन्मूलनाद्वारकोपयोगि तथापि
स्वात्मसाक्षात्कार एवोपयुज्यते।यदाहुः।स हि तत्वतो ज्ञातः स्वा
त्मसाक्षात्कारस्योपकरोतीति।यद्वा श्रुत्या तद्धेतुत्वे प्रमापि नेत
दनुपपत्त्यादृष्टमेव तद्द्वारं कल्प्यते।केचित्तु मोक्षस्यात्र प्रस्तुत
त्वात्स्वर्गपदं मुख्यमेव दृष्टांतार्थमुपात्तमित्याहुः।उपासीस
त्रएयासत्रं यो युजितियुग्नभवति।वद्धृत्ववचनात्।क्वचिद
पवादविषयेप्युत्सर्गः प्रवर्त्तत इति न्यायाद्वा।यद्वा।धातुनिर्देश
तियोयं प्रयोगः तस्य च धातुरूपशब्दाभिधायकत्वेप्यर्थे द्विरे
फपरत्वलक्षणा।भगवदुपासनाफलवत्तां निरूपणं चाक्षिपत
उक्तसंगतिं परिहरन्नत्वादिनां वियति पक्षभावेन न्यायांगं संशय
माक्षिपति।इहेति।इह विचारे संदेहपवन्न्यायपूर्वांगं कुतः।अत्र
हेतुः।प्रसिद्धानुभावे अनुभावो साधारणीकारणतामाह।यं कं
मपीति।यं कमपि मोक्षादिकं स्वाभिमतं पुरुषार्थमर्थयमाना
।यमीश्वरमुपासते मननविषयीकुर्वंतीत्योपनिषदादेः सर्वत्र
संबंधः।शुद्धः प्रकोद्वितीयाभावात्।उद्धः स्वप्रकाशज्ञानात्मकः
द्वितीयाभावेन परप्रकाश्यत्वानुपपत्तेः।पतद्रुभयं वेदांतिसा
धारणं।आदीति।आदौ प्रथमे तो विद्धां श्चिद्रूपः स्वभावतश्चे
तनः।नतु प्रतिबद्धेन तगोपरागादेर्याधिकं चैतन्यं तस्येत्यर्थः।सि

२

दुः। न तु बुद्ध्यादिवत्साध्यः तेन कूटस्थनित्यो न तु प्रकृतिवत्परिणा
मिनित्य इत्यर्थः। एतत्तु सकलक्षेत्रज्ञसाधारणत्वान्न परमात्मो
त्कर्षाभिधायकमित्यन्यथा व्याख्येयं। आदौ सर्गादौ सिद्धान्य
सिद्धो योगर्द्धिसंपत्तुल्यादित्यास्य विधैश्वर्यसंपद्युक्त इत्यर्थः। य
थोक्तं तत्त्वकौमुद्यां वाचस्पतिमिश्रैः। सर्गादावादिविद्वानत्र भगवान्क
पिलो महामुनिर्धर्मज्ञानैश्वर्यसंपन्नः प्रादुर्बभूवेति स्मरंतीति क्लेशे
ति। अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः। कर्म्म धर्म्माधर्म्म
हेतुभावपन्ना साध्यं यागहिंसादि। विपाको जात्यायुर्भोगाः। फ
लपर्यंतमाशेरत इत्याशयाः धर्म्माधर्म्मसंस्काराः शारीरैकनिष्पा
द्यवेदादिनिर्म्माणार्थे कार्यो निर्माणकायः। संप्रदीयते गुरुणा शि
ष्यायेति संप्रदायो वेदः स चानादिरेव भगवताद्योत्यते। भगवतश्चा
हस्याभावेपि तच्छरीरसाध्यघटादिजन्मभोगजनकास्मदादिवच्छरीरि
वतन्निःपाद्यते अनुग्रहको घटादिनिर्म्माणादिसाद्गुर इत्यर्थः लो
केति लोकाविरुद्धैः सर्प्पदहनधारणादिभिर्वेदविरुद्धैर्रोहवनादि
जवधूविध्वंसनैरुपलक्षितावा इत्थंभूततत्सगोतृतीया सो यमित्थंभूतो
पि निर्लेपः पापपुण्यलेपरहित इत्यर्थः करणे वा तृतीया वेदादि
विरुद्धहेतुकभोगजकाविशेषगुणरहितः सव सुखदुःखं धर्म्माध
र्म्मौ चेति मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौ कर्म्मबी
जं धर्म्माधर्म्माकुरमारभते न तु तत्त्वज्ञानानिदाघनिःपीतसकलत्त
पोषरायामिति भावः स्वतंत्रो जगत्कर्त्ता शिवो निस्त्रैगुण्यः पुरु
षोत्तमः पुरुषेषूत्तमः सर्वज्ञत्वात् पितामहो जनकस्यापि जन
कः यज्ञे प्रधानमिज्यं यज्ञपुरुषः सर्वज्ञः क्षाणिकसर्वज्ञः नि

कु० वं०
४

एवरणइति आवरणमदृष्टमविद्यात्मकर्मोपार्जितं वा शरी
रमस्यनास्तीत्यर्थः उपास्यत्वेनेति वेदोयदि मोपास्यभावः का
श्चिन्मंत्रादिरित्यर्थः लोकेति यथालोके व्यवह्रियते चतुर्भुजाद्यु
पेतदेहवान्नतद्वदस्येत्यर्थः यावदुक्तेति यावदुक्तेषु परदुःख
न्नं पुक्तिमत्सर्वज्ञत्वादि तेनोपपन्नः संपन्नइति मध्यमपदलोपी
तत्पुरुषः यावदुक्तेषूपपन्नः प्रामाणिको धर्मो यस्येति ब
हुव्रीहिर्वा नतु यावद्भिरुक्तैरुपपन्नः सहितइत्यर्थः अद्वैताद्य
नंगीकारेण यावद्यथाव्याख्यातार्थस्यैनेयायिकैरनंगीकारात्
यद्वा संदेहपदं कुतइत्युपसंहारात्सर्वोऽप्यपिदर्शनानिपकार्थ
परतयाव्याख्येयं शुद्धो दोषहीनः बुद्धत्वमावो घटादिभिन्नत्वे
सत्यैयाधिकचैतन्यरहितः आद्यो सर्गादौ विद्वान् ज्ञानवान् सि
द्धोनित्यः संप्रदायप्रद्योतको वेदप्रणीयणीपसर्गाद्युत्पन्नाध्याप
क अनुग्राहकः कुलालादिक्रियाति घटादौ सहकारीत्यादिक्रमे
ण नवैवमेकमतेनदर्शनभेदानुपपत्तिः फलेकमतेऽपि प्रका
रभेदात् सर्वथाविरोधाभावे विचारोपयोगि संशयस्याप्यभावप्र
संगात् यद्यपि मीमांसका नीश्वरसांख्यमतेनेश्वरे संप्रतिपत्तिः
तथाप्युपास्यत्वेन धर्मिणि संप्रतिपत्तिरस्त्येव कारुः शिल्पी वि
श्वसर्वं मुस्त्वन्ति मक्षु मे कार्यं यस्य स तथा जातिर्ब्राह्मणत्वादिः
गोत्रं काश्यपादि आर्षेयं प्रवरयज्ञे प्रव्रियमाणतया प्रवरः काश्य
पादयः चरणं शाखा अनुभाधारणकार्यं वेदादि अत
एव भवत्वमादितिभवः तथा च जातिगोत्रादिवत्संसारमभि
व्याप्यश्रुत्यादिप्रमाणासिद्धेपरमात्मनि न संदेहो यतस्तत्रेश्वरै

किंनिरूपणीयमित्यर्थः तथापिधर्म्मिणि भागवतिविहितम॰
ननेप्रकाराकांक्षायां तत्रविप्रतिपत्त्यासंदेहोस्तीति मनास्तिकस्य
मननरूपोपासनैवक्रियत इतिसमाधत्ते तथापीति न्यायेन
चर्चानुमितिरूपोपासनैवेतिसंबंधः श्रवणानंतरगतेत्यनेनश्रुति
प्रामाण्यग्राहकन्यायनिरूपणमपिसूचितं श्रवणानंतराग
तेतिसंगृहीतांवेत्वणोति श्रुतोहीति श्रुतिमूलकत्वात्स्मृतेरपिसिद्ध
साधनं स्वार्थानुमानेनदोषः प्रमाणसंभवस्यव्यवस्थापनादितिचे
त् विनिगमकाभावात् ग्रंथस्यपरार्थानुमानरूपत्वाच्चापयाग्नि
होत्रंजुहोति यवागूंपचतीत्यत्रार्थनक्रमेणशाब्दःक्रमोबाध्यते त
थाश्रोतव्योमंतव्य इत्यत्रापिमननानंतरंश्रवणेश्रतेस्तात्पर्यमिति
चेत् नः दृष्टांतेहोमेद्रव्यांतरसाधनत्वयवागूपाकस्यादृष्टार्थत्वं
चकल्प्यमितिगौरवात्तथाप्रकृतेत्वनुपपत्त्यभावः श्रवणानंतरं
मननस्यान्यथोपपद्यमानत्वात् श्रवणानंतरामतेतिग्रंथविरो
धश्च श्रोतव्यः श्रुतिवाक्येभ्य इतिबहुवचनं कपिंजलानभेतेति
वत्त्रित्वपरमतोरूपांतरेणमननमविरुद्धमिति चेत् नःश्रोतव्यो
मंतव्य इतिसामानाधिकरण्यश्रुतेर्लाघवाच्च येनैवरूपेणश्र
वणंतेनैवमननस्योचित्वात् नचरूपांतरेणश्रुतस्यरूपांतरेणमन
नेश्रद्धामलस्यातनंभास्यव्यापारोनिर्वहति· श्रुतस्यामननात्
अतएवधर्म्मिस्वरूपेसंदेहाभावेपिक्षितिकर्तृत्वादौधर्म्मेसंदेहा
त्तत्रानुमेयमस्तं तथापिधर्म्मिणिसंदेहानुपपादनच्च नवा
तद्रूपमस्तीश्वरे·पत्नवैदेश्रुतमस्ति· तथाचश्रोतव्यःश्रुतिवाक्ये
भ्य इत्यत्रासंकोचादीश्वरपरसर्ववाक्येभ्यएवश्रवणेसतिकथं

मननं एतेनभगवतिभवेसंदेहएवकिंनिरूपणीयमितिकुतः
कुतः पृथिवीतः कर्त्तृजन्यत्वसंशयात्तत्रसंदेहएवेत्यपियोजनामा
त्रमित्यपास्तं यत्तु श्रुतेपिभगवति श्रुतेः प्रामाण्यसंदेहात्तत्प्रति
पादितेपीश्वरेसंदेह इतितत्र श्रोतव्यो मंतव्य इति सामानाधि
करण्यविरोधात् मननस्यप्रामाण्यविषयकत्वात् यदिवश्रु
तिरनवधृतप्रामाण्यैवतदाकथंततः श्रवणेपिबह्वायाससा
ध्येप्रवृत्तिः तथात्वेवेदप्रामाण्यानुमानमात्रोविसादीश्वरानु
मानानुपपत्तिः अथसिद्धसाधनंनहेत्वाभासः उभयथाहिहे
त्वाभासताः करणाविघटकत्वाद्विरुद्धानैकांतिकयोरिवतद्वि
घटनसुर्वेतः स्वतएवप्रतिबंधकत्वाद्बाधप्रतिरोधवत् सिद्ध
साधनंतुनव्याप्तिविघटकंनवस्वतः प्रतिबंधकमतोनहेत्वा
भासः दूषकतात्वयोरंतरभावादितिमतं तन्न व्याप्तिज्ञा
नस्येवपक्षधर्मताज्ञानस्यापितत्कारणत्वात् तद्विघटक
सिद्धसाधनस्यापितद्दोषित्वात् पक्षधर्मताज्ञानंनतत्करणं
किंतुव्याप्तिज्ञानमितिचेत् न लाघवात्करणमात्रस्यप्रयोजक
त्वात् श्रुतिबोधितोपिभगवति बहुविधकर्तृत्वकोटस्यानिरं
जनत्वादिश्रुतेः कुत्रश्रुतिर्मुख्यार्था कुत्रवोपचरितार्थेतितात्पर्य
संदेहात्संदेह इतिचेत् न तथापिधर्मिस्वरूपेसंशयानुपदार
नात् तात्पर्यग्राहकमायाभिधानमात्रस्योचितत्वाच्च वर्त्तृत्वा
दौसंदेहात्कोतिकोधर्मिण्येवसंशयोन्यथाधर्मीक्वापिसंश
यविषयोनस्यादितिचेत् न तथापिश्रोतव्योमंतव्य इत्यात्मज्ञा
नस्यमोक्षहेतुत्वंनतुतद्धर्मकर्त्तृत्वादिनिश्चयस्येतितत्संदेहस्या

नुच्छेद्यत्वात् तथापि निर्द्धर्म्मकस्य तस्य ज्ञातुमशक्यत्वेन तद्धर्म्मेणि
श्चयोपायादरणीयस्तवेत् परस्पराविरुद्धप्रकारेणतावितनोप
पत्तेरिति दिक् अत्रोच्यते साध्यज्ञानं न स्वतः साध्यज्ञाना
विरोधि धारावाहिकबुद्धिसत्वात् नापि साध्यानुमितिविरोधि
प्रत्यक्षाधिगतस्याप्यनुमितिदर्शनात् किंतु सिसाधयिषाघ
टितपक्षत्वविघटनद्वारा सिसाधयिषावत्साध्यज्ञानेच्छा सा च द्वयी
साध्यज्ञानमात्रे तद्विशेषे वः तत्र या साध्यज्ञानसामान्येच्छा सा
श्रौतज्ञानान्निवर्त्तेतां यत्किंचिद्विशेषसिद्धौ वह्निसामान्येच्छावि
च्छेदः अन्यथा सकलविशेषसिद्धेरसंभवेन तद्विच्छेदः क्वापि न
स्यादेव यात्वनुमितिरूपसाध्यज्ञानविशेषेच्छा कथं निवर्त्तेत
तद्विषयस्य ज्ञानविशेषस्यासिद्धेः इच्छायाः स्वविषयसिद्धिनि
वर्त्यत्वात् अत एव श्रोतव्यो मंतव्य इति श्रुत्या मननस्येष्टसाध
नत्वावगतेः श्रौते ज्ञाने वृत्तेपि मननस्यासिद्धत्वात्तत्रेच्छास्त्येवेति
न सिसाधयिषाविघटनद्वारकदूषणाभावस्य सिद्धसाधनस्याव
काशः इच्छाविषयत्वावच्छेदकरूपवत्सिद्धेः सिद्धपदेन विवक्षि
तत्वात् अत एव सिद्धसाधनं दशाविशेषे दोषः पयद्व
दूषणं असिद्ध्युपजीव्यत्वेपि बाधवत्स्वतो दूषकत्वाभावात्
किंतु दूषकतायामुपाधेरिव परमुखनिरीक्षकत्वात् भवेदे
वं यदि सिसाधयिषाघटितं पक्षत्वं तदेव न तस्याः विशेषणतो
पलक्षणतयोरुभयत्रापि दोषात् योग्यतापाश्च तदवच्छेदक
रूपपरिचेयत्वापि न वेत् न सिसाधयिषाविरहसहकृत
साधकप्रमाणाभावस्य तत्वात् स वशिशिष्याभावोपत्रसाध

कप्रमाणासिसाधयिषेस्तत्रविशेषणाभावात् पक्षोभयाभा
वस्तत्रविशेष्याभावात् यत्रवसाधकप्रमाणाभावेसिसाधयि
षामात्रमस्तितत्रद्वयाभावात्सर्वत्राविशिष्टः यत्रसाधकप्रमाणे
सति असतिवासिसाधयिषापाअभावस्तनास्तीत्यस्यापि तत्त्वचरणाः
तथापिसंशयंविनाकथंन्यायावतारइतिचेत् इत्थं संशयोहि
न्यायांगंनतावन्न्यायकारणतयातस्यलिंगपरामर्शात्मनः सं
शयंविनापिसंभवात् कारणत्वासिद्धौफलवैजात्यकल्पने
मानाभावादन्योन्याश्रयात् नापिसहकारित्वेनतादृशसाक्षा
लिंगपरामर्शादिनातन्नाशात् शाब्दलिंगपरामर्शेतत्कार
णत्वाभावाच्चसंशयकारणत्वासिद्धौ तत्कल्पनेपिमानाभावात्
अतएवपरंपरयापितत्सहकारित्वमपास्तं नाप्याश्रयावच्छेद
कत्वेन पर्वतत्वादेरेवतथात्वात् अन्यथापक्षतावच्छेदक
धर्मसाध्ययोः सामानाधिकरण्यभानेनैपक्षे पर्वतत्वाद
रिवसंदिग्धत्वस्याप्यनुमितौभानापत्तेः अथसंशयेनत्वयो
ग्यतोपलक्षणात्साधकबाधकमानाभावोन्यायांगमितिचे
त् न तथापिसंशयस्यातत्त्वात्संशययोग्यतायास्तदंगत्वात्
विशिष्यतद्ग्राहकमानेनविशेषणस्यापितत्त्वविषयीकृता
मितिचेत् न मिलिताभावस्यप्रत्येकसत्त्वेपिसत्त्वात् प्रत्येकं
चनयोग्यताकेवलान्वयिनिबाधकाप्रसिद्धेश्चेत्यन्यत्रविस्तरः
तथापिसंशयस्यानुमितिमात्रहेतुत्वेपिजिज्ञासितार्थानुमि
तौजिज्ञासाद्वारासंशयस्यानुमितिहेतुत्वं यद्वाःशंकाभ्रकनि
वृत्तयेन्यायोपासनेसंशयांगमितिसंशयंविनायोनपरितुष्ये

त्वंप्रतिश्रोतव्योमंतव्यइतिश्रुतेरनन्यगम्यमिन्नविषयकपवधा

र्म्मेविशेषसंशयोधर्म्मिविषयकन्यायप्रवृत्तिहेतुरित्यास्थेयमि

तिविभार्थस्तत्कारणंविशेषविप्रतिपत्तिमादर्शयति तदिहेति

नरितिवा क्वोपक्रमे-संक्षेपेणावांतरविप्रतिपत्त्यविवक्षया-विप्र

तिपत्तौविषयिन्याविषयस्यप्रयोजकत्वंविवक्षितत्वापंचमीनिर्दे

शः तत्रालौकिकेतावत्साक्षात्कारकारणेंद्रियसान्निकर्षाश्रय

त्वंप्रमेयत्वव्यापकंनवा इंद्रियस्यतुनसंनिकर्षाश्रयत्वंकिंतुप्र

तियोगित्वमितिनविप्रतिपत्तिः यपववस्तुषात्र्यस्यसंयुक्तस

मवायः सएवगुरुत्वस्यापीतितस्यापितौकिकत्वापत्तेः किंतुसा

मान्यलक्षणप्रसत्तस्यजन्ययोगजधर्म्मोजन्यजन्यस्वविषयक

सविकल्पकाजन्यजन्यसाक्षात्कारविषयत्वंप्रमेयत्वव्यापकं

नवा-अभावसमवाययोस्तादृशप्रतियोगिसंबंधिसविकल्प

कजन्यसाक्षात्कारविषयत्वेपिप्रत्यक्षत्वात् तत्संग्रहार्थंस्व

विषयेतिविशेषणं अत्रयद्यपिघटोयमितिसविकल्पेघटत्व

स्यतत्कारणकज्ञानविषयतास्ति-तथापितज्ज्ञानाजननिर्वि

कल्पविषयताव्यस्ति नहितत् ज्ञानजन्यज्ञानगोचरत्वंनत

ज्ज्ञानाजन्यज्ञानगोचरताविरोधिपकत्रज्ञानद्वयस्यभावा

दित्याहुः अलौकिकविशेषेत्वदृष्टेप्रयत्नकारणात्मविशेष

गुणनिरूपणिविषयकारणात्मविशेषगुणत्वमानसप्रत्य

क्षाविषयेवर्ततेनवा यद्वा-लौकिकप्रत्यक्षाविषयगुण

त्वसाक्षात्व्याप्यजात्यधिकरणत्वमात्मविशेषगुणेवर्त्ततेन

वा-भावनात्वंतुनगुणत्वसाक्षाद्व्याप्यं अदृष्टत्वंचनजातिः

कु० व०
७
7

॰परलोके तु समानकालीनानेकानन्तिशरीरवृत्तिजातित्वं दुःखाव
च्छेदकत्वासमानाधिकरणवृत्ति नवेति स्वर्गे· नरके तु दुःखपद
स्थाने सुखपदप्रक्षेपात्संशयः  तादृशीव जातिर्वात्यादिभि
न्नशरीरवृत्तिरसाधारणी चैत्रत्वादिः प्रसिद्धेति विशेषतः पर
लोकमात्रे तु सुखदुःखोभयजनकमच्छरीरातिरिक्तशरीरवा
नहं नवेति संशयः चैत्रस्तथाप्रसिद्धः  साधने तु प्रागभावत्वा
घप्रतियोगिकार्य·प्रतियोगित्वप्रागभावान्यप्रागभावविषयप्रती
त्यविषयप्रतियोगिनवा  यद्वा· कार्यप्रतियोगित्वप्रतियोगि
त्वप्रागभावान्यप्रागभावाविषयबुद्ध्यविषयवृत्तिनवा  द्वयो
रपि प्रागभावत्वप्रसिद्धिः यद्वा· कार्यपूर्ववर्तिनि नश्यत
त्वं वर्त्तते नवा  यद्वा· तज्जातीयोत्पत्तिप्राक्क्षणत्वप्रतियोगि
व्यापकतावच्छेदकत्वमप्यंताभावप्रतियोगिवृत्तिनवाविशि
ष्टत्वलौकिके परलोकसाधनत्वं वर्त्तते नवा  परलोकसाधने
वालौकिकत्वं वर्त्तते नवेति विप्रतिपत्तिः तथा च कार्यकारणभा
वाभावे क्षित्यादिकर्तृत्वान्नेश्वरसिद्धिः परलोकाभावे च तत्साध
नयागादिदृष्टस्यभावे तदुपदेशकतयापि नेश्वरसिद्धिः आदृ
ष्ट्यासिद्धौ तदधिष्ठातृतयापि नेश्वरसिद्धिरिति चार्वाकाभि
प्रायः  अन्यथेति  अदृष्ट्यादिसत्त्वेपि वेदानामाप्तोक्तत्वेन
प्रामाण्यावधारणं विना तद्बोधितस्वर्गादिसाधनयागादेव
हुवित्तव्ययायाससाध्ये न प्रवृत्तिरित्याप्तो वेदकारः सिध्यतीति
नास्ति  अन्यथा वेदानां नित्यनिर्दोषत्वेन स्वतः प्रामाण्या
वधारण्यपरतः प्रामाण्येपि कर्मयोगसिद्धसर्वज्ञपूर्वकत्वा

तेषांपरलोकसाधनयागाद्यनुष्ठानसंभवादित्यर्थः तदभावेति
भावत्तुवेदानांपौरुषेयत्वाद्योगसिद्धपूर्वकत्वेनाश्वासाद्वाप्तोक्त
त्व तथापितत्रक्षित्सारेः कर्तृजन्यत्वेप्रत्यक्षादिबाधान्नतत्सि
द्धिरित्यर्थः सत्वेपीति बाधकाभावान्तत्त्वेपिसन्नप्रमाणं प्रमा
णपदंहिभावकरणकर्तृष्वनुसत्ताप्रमातत्साधनदाश्रयेषुवर्तते
यथार्थेनधिगतार्थाधिगतिश्चप्रमा तथाचपक्षिश्वरः कर्तास्या
स्मभावांस्तत्करणेन्द्रियाद्रियादिमांस्तत्समवायिकारणंचस्यात्
नायंतथेतिविपर्ययानुमानादित्यर्थः अप्रमाणपुरुषस्यव
चः कः श्रद्धास्यतीतिभावः तत्साधकेति कार्यत्वादेरुपा
ध्यादिदुष्टत्वात् क्षितिपेदारेः कर्तृजन्यत्वेसाधकमेवनास्तीत्य
र्थः तत्रवार्त्ताकस्यायंभावः कार्यकारणभावेप्रत्यक्षंनताव
न्मानंधर्मिस्वरूपप्रत्यक्षेपितत्रसंशयात् नवान्वयव्यतिरेका
नुविधानज्ञानसहकारिविरहत्वमतिवाच्यं तन्मात्रस्यव्यभिचा
रिसाधारणत्वात् नियमान्यथासिद्धोश्वशंकाकतंकित
त्वेनावधारणात् नाप्यनुमानं तस्यमपामानत्वेनास्वीकारा
त् तत्साधनेपिकविरोपितद्यसिद्धावन्वापिनोसंभवात् तद
प्रसिद्धौव्यतिरेकात्तानात्केवलव्यतिरेक्यनवतारात् ममत्वप्र
मितस्यासत्त्वात्यायभ्युपगमान्ननिषेध्याप्रसिद्धिरित्यत आह
तत्रेति तेषुमध्येप्रथमः पक्षोयतः कल्पः कल्पना असतत्त्वा
त्तिसत्तद्विषयः तथाहि कार्यकारणभावानभ्युपगमेपरप्रय
त्निपत्नकप्रयोगानुपपत्तेर्यथापथातन्निराकरणायप्रयत्नस्त
थातथातस्येवापत्तेरितिव्याघातएवेत्यर्थः तथापिसाधकंवि

कु० वृ०
४
4

नानतासिद्धिरितिचेत्तत्राह सापेक्षत्वादिति विवादपदस्य
सापेक्षत्वात्सहापेक्षयावर्त्तमानत्वात्कादाचित्कत्वादित्यर्थः त
त्त्वं किं त्रिकालासंबंधित्वमुत किं चित्कालसंबंधरूपं कार्यायाग्र
स्य क्षसिद्धमिमनन्यथासिद्धमेतस्मादनंतरमिदं भवतिपतत्पू
र्वभावीत्यपि प्रत्यक्षं तत्रमानं प्रत्यक्षत्वेवानन्यथासिद्धत्वनि
यमांशस्यानवधारणहेतुशंकानिवर्त्तकस्तर्को दर्शयिष्यतइतिभा
वः यद्वा प्रत्यक्षसहकारित्वेनानुमानमेवोपन्यस्तं यद्वा प्र
थमतोनुमानप्रामाण्यं प्रसाध्य कार्यं सहेतुकं कादाचित्का
त्वात् यन्नैवं यथाकार्यं नवसाध्याप्रसिद्धिः किंपक्षागेप्रत्य
क्षेणैवतत्सिद्धौतद्विषयेत्वनुमानात् नचोतत्तेः कादाचित्क
त्वेपि नसहेतुकत्वं तथात्वेवोत्पत्तिमत्तापत्तावनवस्थेतिवा
च्यं कार्यस्याद्यक्षणेनसत्तरूपसंबंधयवह्युत्पत्तिः कार्यक्ष
णस्वरूपयोश्चोत्पत्तिमत्वे नहेतुमत्वात् यद्वोत्पत्तिगर्भः किं
चित्कालसंबंधः कादाचित्कत्वं अतएवनप्रागभावेव्यभिचा
रोनचोत्पत्तेरुत्पत्तिगर्भः स्वरूपतिनतयाप्यभिचारः एतेनानुमा
नपक्षेहेतुरसिद्धः सापेक्षत्वादित्यत्रहेतोरसिद्धावाश्रयासिद्धिः
सापेक्षत्वस्य कार्यधर्मत्वस्य हेतावर्त्तनोस्वरूपासिद्धिश्च कां
र्यस्यैवपक्षत्वेसापेक्षत्वादित्यस्यहेतुमत्वादित्यर्थेसाध्यावि
शेषः कादाचित्कत्वादित्यर्थेच प्रागभावेनव्यभिचारस्तस्या
त्वं ननु हेतुरपि यदि सदातनः तदातत्सापेक्षस्यकार्यस्यापि
तथात्वापत्तिरिति कादाचित्कत्वमहेतोरिवाकाशादेः सहे
तोरपि सपक्षाद्व्यावृत्तत्वमिसस्यासाधारण्यं स्यादित्याहेतुः

कादाचित्कोवाच्यः तथाचतस्यापि कादाचित्कत्वं हेत्वपेक्षापेक्षयानव
स्थापत्तिः अहेतुकत्वेच तद्वदेव कार्यमहेतुकं कादाचित्कं स्यादित्य
त आह अनादित्वात् हेतोरपि कादाचित्कत्वं स्वहेतुकादाचित्क
त्वादेव प्रामाणिकी चेयमनवस्था बीजांकुरवन्न दोषायेत्यर्थः
ननु कारणमात्रसिद्धावप्येकमेकजातीयं वास्तु कारणं कार्यजात
स्य तथा चास्मदादिभिरेव शक्यं ज्ञानमिति न तदर्थमुपदेशेन वा विल
क्षणसामग्रीजन्यं कार्यं सिध्यतीत्यत आह वैचित्र्यात् भिन्नजाती
यकारणानंतरं तथाभूतकार्यविषयकं प्रत्यक्षमेव विचित्रसाधने
मानमुपन्यस्तं यद्वा वैचित्र्यं कार्यस्य विचित्रहेतुकत्वे लिंगमेवो
भयत्राप्यभिन्नत्वाभिन्नजातीयत्वयोर्हेत्वोः कार्यस्य भेदविजाती
यत्वे आकस्मिके स्यातामिति तर्कः सहकारीत्यर्थः तथापि दृश्य
मानविचित्रहेतुकमेव कार्यमस्त्विति नादृष्टासिद्धिरित्यत आह वि
श्ववृत्तितः विश्वेषां प्रेक्षावतां परलोकार्थिनां यागादौ प्रवृत्तिः
प्रेक्षावत्प्रवृत्तित्वेन सफलता फलसाधनत्वं च यागादेराशुविना
शित्वेन न स्यादिति तज्जन्यं फलानुकूलमदृष्टं कल्प्यत इत्यर्थः त
थापि तददृष्टं किं भोग्यनियतमुत भोक्तृनियतं अंत्येपि किं प्रति।
भोक्तृनियतं साधारणं वेत्यत आह प्रत्यात्मेति सुखदुःख
साक्षात्कारस्य प्रत्येकात्मनियतत्वात् लाघवाच्च तदुपादकं प्रतिभो
क्तृनियतमेवादृष्टं कल्प्यत इत्यस्ति हेतुरलौकिक इत्साधत्वकार्य
संग्रहः यथोक्तप्रत्यक्षानुमानयोरन्यथासिद्धिनिरासाय तर्कमा
ह नत्वयमिति अनेकविधेति मुमुक्षुवैराग्यायुरतोकिकइत्सा
धत्त्वकार्यसंग्रहः यथोक्तप्रत्यक्षानुमानयोरन्यथैवा तवि।

कु०व०
९
१

विन्नादृष्टसाधनेनापयुक्तं· निरपेक्षत्वं किंचित्सदार्थावाधिकोत्तर
त्वव्याप्यकालासंबंधत्वं· नच प्रतियोग्यप्रसिद्धिः तस्यासत्त्व्याति
वादिनो व्यावहारिकस्यसापेक्षत्वस्य स्वीकारात् ननु निरपेक्ष
त्वेनैकेन व्याप्येन स्यादेव न स्यादेववेति व्यापकं रूपद्वयं विरुद्धं कथ
मापाद्यते· नह्येकं मिथोविरोधिद्वयव्याप्यं· तुशब्दश्चासंगतः का
दाचित्काभावस्यात्र तंत्रस्यैवानिष्पापादनत्वात् अत्राहुः नि
रपेक्षत्वेन कादाचित्कत्वव्यतिरेकप्रवापापाद्यः सच वस्यादेव न स्याद
वेति पक्षद्वयेपर्यवस्यति अतएव तु शब्दोपि संगच्छते यद्वा का
र्योनरपि संस्यात्स्यादेव नित्यं स्याद्वाकाशवदितिस्वमते तन्मतेतु
नस्यादेवकेवलान्वय्यसंताभावप्रतियोगिस्यात् खपुष्पवत् उ
भयत्राकादाचित्कत्वं नस्यादिति यद्वा यत्तदुत्तरकालानुत्पत्ति
कोयघटोयद्येतदुत्तरकालानुत्पत्तिकालेसत्त्वेसपूर्वकालोत्पत्ति
कानपेक्षोत्पत्तिकः स्यादेतत्पूर्वकालवृत्तिः स्यात् यद्वा यद्य
यमेतत्कालीनोत्पत्तिको घटः सहेतुको नस्यादेतत्पूर्वकालीनः
स्यात् यद्वा घटोयदि घटव्यवहितकालानधिकरणपदार्था
धिकरणक्षणोत्तरत्वव्याप्योत्पत्तिर्नस्याद्घटव्यवहितकालःस्या
त् तत्कालवृत्तिपटादिवदिति तत्रतत्रसत्वापादनमितिस्यादे
वेत्यस्यार्थः अन्यकालानुत्पत्तिकोयं घटोयद्येतत्पूर्वकालान
पेक्षोत्पत्तिकः स्यादेतत्कालोत्पत्तिको नस्यात् यद्वा· सर्वातकाला
वृत्तिरयं घटोयदि निरपेक्षः स्यात् किंचित्कालावृत्तित्वेसतिकिं
चित्कालवृत्तिर्नस्यात् तेनपक्षविशेषणमहिम्नालीकत्वंसिध्य
ति यद्वा· यत्तावत्कालपूर्वापरकालावृत्तिर्घटोयद्येतावत्कालपू

र्वोपरकालात्वावच्छिन्नत्वे सत्येतत्कालाव्यवहितपूर्वे कातन्नत्तिपदार्थोधि
करणक्षणो नरत्वव्याप्यकालो नस्यात् पतावत्कातन्नत्ति नेस्यादि
त्तिनस्यादेकस्यस्यार्थः अतएव कातांतराव्रत्तित्वे सत्ये तत् कातव्रत्ति
र्नेस्यादिति कादाचित्कत्वाभावायाह नमपीति संप्रदायविदः कार्यका
रणभावमाहकमाने कादाचित्को भावो निर्हेतुको भावत्वाद्व्योमवदि
तिसत्प्रतिपक्षमाशंकते अकस्मादिति अत्रकिंशब्दोयदाहेतुमा
त्रपरस्तस्यतदानञासंबंधाद्धेत्वभावेभवनंलभ्यते पदातुभवनक्रि
यापानक्रियापानञासंबंधस्तदाप्रसज्यप्रतिषेधेन भवननिषेधोर्थः
किंशब्दसमस्यमानेनामिनञाभवतीत्यस्यान्वयादसामर्थ्येप्यसूर्यं
पश्याइतिवत्समासात् अशाब्दस्यैववाक्यंसमासंविनाप्रयोगः अ
मानो नाः प्रतिषेधवचनादितिकोशात् नहुभयंनिरस्यति हेतुभूती
ति अथहेतुभवनयोर्निषेधस्यशेषाभ्यनुज्ञाफलकत्वात्सर्युदा
सनञाहेतुव्यतिरिक्तात्भवनंप्राप्तंअहेतुश्चकार्यस्वरूपमवस्तुवात
दास्वानुपारव्याविधिस्तन्निषेधति स्वानुपाख्येति स्वकार्यमनु
पाख्यानिर्धर्मको लीकः अथाश्वकस्मादिशब्दवदश्वसनयवा
पमकस्माच्छब्दः स्वभावपरः किंशब्दोस्वभावपरोवा तदास्वभावा
देवकार्यस्यकादाचित्कत्वमित्यर्थः तत्राह स्वभावेति सर्वत्रहेतु
माह अवधेरिति नियतावधिसंबंधित्वेनैवविवादपदस्यक
दाचित्कस्यकार्यस्यसतर्केणप्रत्यक्षेण विषयीक्रियमाणत्वादित्यर्थः
क्रमेण तर्कमाह हेत्विति भवनस्यसत्वस्याविशेषात् सदात
नत्वेकार्यस्यकादाचित्कत्वव्याघातइत्यर्थः भवेनेति भवनसो
पत्तेः सदाप्रतिषेधेप्याकाशादिवमध्येप्यभवनप्रसंगात् क

कु० वृ०
१०
10

दाचित्तु भवन ग्राहि प्रसवाधस्यर्थः उत्पत्तेरिति स्वोत्पत्तौ पूर्व्वं
यदि स्वयं भवेत्तदानिपतकालोत्पत्तौ हेतुः स्यात् । नचैवमसतो
पि हेतुत्वे प्राक्पश्चादपि कार्यसत्वप्रसंगेन तदनुपलब्धि विरोध
इत्यर्थः कार्यकारणयोरभेदे विरोधांतरमाह पौर्व्वापर्येति
पटार्थिनः पटमेव नोपाददते किंतु तत्पूर्व्ववर्त्तिनस्तंतून्नि
ति लोकव्यवहार सिद्धकार्यकारणभावविरोध इत्यर्थः तत्वा
स्य । पौर्व्वापर्यस्येत्यर्थः अनुपाख्यस्यार्थक्रियाजनकत्वाभावेप्य
निष्प्रसंगांतरमाह अनुपाख्यस्येति यत्तस्यदानुत्पत्तिक्षणा
पघेत्तस्य टोत्पादकानुपाख्यान्तरकान्तरकातः स्यादेतत्स्य टाधि
करणं स्यादित्यर्थः यद्यपि स्वभावः कार्यं तद्धर्म्मो वा आद्यः
स्वधर्म्मादित्ति निरासेनैव निरासेनैव निरस्तोः स्ये । धर्म्मस्य कारण
त्वमंगीकृतमेवः तथापि यथा परमाणुतत्परिमाणयोरका
रणत्वोपि स्वभावादेव

११
॥

देशावन्नियतकालस्वभावइत्यनेनास्यपौनरुक्त्यं एवं हि सापेक्षत्वा
दित्यत्रयथापरमाणुत्वपरिमाणादीनांनित्येष्वपिनियतदेशत्वं
तथाघटादीनांनियतकालत्वंस्यादित्यप्रयोजकत्वमुक्तं संप्रतितु
कादाचित्कत्वस्वभावोनिर्हेतुकः स्वभावनियमत्वात् नित्यस्वभा
ववदित्यत्रसत्प्रतिपक्षत्वमुक्तमित्यर्थभेदात् पूर्वंयन्नियतंतत्का
रणानियम्यं यथाजातेःक्वाचित्कत्वमित्युक्तं संप्रतितुस्वभा
वोननियम्यतइत्युच्यतइत्यपौनरुक्त्यमित्यन्ये नसर्वस्येति
एकनियतोधर्मःस्वभावइत्युच्यतेन घटादिसर्वस्यभावैस्तदास्वभावत्व
मसाधारणत्वेनोपपद्यतेसत्तादेरिवेतिस्वभावत्वव्याघातइत्यर्थः
नचैवमितियद्याकाशस्याकाशत्वंनसर्वस्यतत्त्वव्याघातादितिवि
परीतमनाशंकनीयं तदाकादाचित्कस्वभावस्याहेतुकत्वेसदात
नत्वमनाशंकनीयं कादाचित्कत्वस्वभावभंगप्रसंगादित्यर्थः
कादाचित्कत्वस्वभावसिद्धौतद्विपरीतकल्पनायांव्याघातःस्या
त्। नासिद्धिश्चनिरवधिस्वभावत्वेवासावधिस्वभावत्वेवाप्रकारां
तराभावात् द्वितीयेप्यनियतावधित्वेनियतावधित्वेवा तत्रप्र
यमद्वितीययोराह निरवधित्वइति येयेनिरवधयोऽपिप
तावधयश्चभावाइत्यास्तेषांनियतकादाचित्कत्वस्वभावविरहा
न्निरवधिस्वभावस्यानियतावधिस्वभावस्यवाकादाचित्कत्वस्व
भावविरोधः नहिविरुद्धयोरुष्णशीतयोरेकस्वभावत्वं तथा
चकादाचित्कत्वव्याघातस्तत्स्वभावत्वव्याघातइत्यर्थः तृतीय
माशंक्यसंप्रतियातमुत्तरमाह नियतावधित्वइति वस्तुतोऽ
स्मिन्सतीदंभवत्यसतिनभवतीतिप्रत्यक्षेणानियतपूर्वभाव

१२
12

भावस्यग्रहात्प्रत्यक्षमेवकारणत्वेमामंकयसंप्रतिपात्तमुत्तरमा
तस्यचानन्यथासिद्धत्वग्राहकस्तर्कः स्यादेवेत्यादिनाप्रदर्शितश्र
तिरहस्यं ननुकादाचित्कत्वंसापेक्षनिरपेक्षत्वाभ्यांव्याप्त
त्वेनासाधारणं तथाहिनसामग्रीनिरपेक्षंकार्यं सदात
नत्वापत्तेः नापितत्सापेक्षं सामग्र्यपिहिनतन्निरपेक्षा त
त्सदातनत्वेनतत्कार्यसदातनत्वापत्तेः नापितत्सापेक्षा अन
वस्थानात् ततःप्रागभाववद्यथासामग्रीनिरपेक्षापिकादा
चित्कीतथाभावोपिघटादिःस्यादित्याशयवानाह स्यादेतदि
ति उत्तरस्यध्वंसस्यपूर्वो घटएवावधिर्नतुघटध्वंसः पूर्वस्य
प्रागभावस्योत्तरः प्रतियोग्यवधिः ननुप्रागभावःमध्यमस्य
घटादेः प्रागभावोध्वंसश्चेसुभयमवधिर्निरूपकोऽस्तिस्यर्थः
दर्शनस्येति सर्वलोकसिद्धत्वादित्यर्थः दर्शनेनवेत्कारणंसि
ध्यतितदास्तित्वाद्यैकर्त्तुरदर्शनाद्धर्मादेश्चादर्शनात्तदासि
द्धौनतदधिस्यात्सिद्धिरितिनिगर्वः अनंगीकारेदंडमाह
नहीति अन्यथाप्रागभावप्रध्वंसयोरप्यनुपलभ्यमानपू
र्वोत्तरावधिकत्वनाप्रसंगइतिभावः तद्वदिति तथावावा
धि सिद्धावपिनतत्प्राव्यत्वनियमसिद्धिरितिनतावतैवकारण
सिद्धिरंगतः सिद्धसाधनंचेतिभावः प्रवाहइति एषकार्यका
णप्रवाहोऽनादिमानुतत्तत्सामग्रीमान् ततःसामग्र्यपिस्वसा
मग्रीपरंपराधीनेतिनतज्जन्यकार्यस्यानादित्वप्रसंगः नचा
नवस्था बीजांकुरवदनादित्वपाप्रामाणिकत्वादित्यर्थःप्रा
गभावप्रध्वंसयोस्तुपूर्वोत्तरकोटिकल्पनेभावोन्मज्जनमे

ववाधकमितिभावः अनादित्वं च ध्वंसस्याप्यप्रागभावप्रतियो
गित्वं-तथाप्येतद्व्यक्तितीयकार्ये सैव व्यक्तिस्तत्र कारणं न तज्जा
तीयमिति- नैतावता कार्यजातीये कर्तृजातीय कारणं अव्यव
हितप्राक्क्षणवृत्तितद्व्यक्तेरेव कारणत्वापत्तौ यागादीनामकारणता
न्नालौकिकसाधनसिद्धिरतो न क्षित्यादिकर्तृत्वेनादृष्टाधिष्ठा
तृत्वेन वेश्वरसिद्धिः न चैवं नियतजातीयकार्यानुत्पत्तिरेकक
र्यानुकूलशक्तिमत्त्वेन तदुत्पत्तेः अत्राह नविजानीति वित
क्षणजातीयेषु पकायाः शक्तिस्तद्वान्नप्रवाहइतिसंबंधः वि
जातिविरुद्धजातिरेकशक्तिमांश्चेति वा वक्ष्यमाणयुक्तेरित्यर्थः
नहि तृणादेर्व्यभिचारेणाग्निकारणत्वं कथंचिदप्युपपद्यत आ
ह तत्त्वइति सामान्यविशेषाक्रांतगोचरयोरन्वयव्यतिरेक
योस्तत्त्वे नियतत्वे व्याख्येयत्वं वतापुरुषेण भावितव्यमित्यर्थः
प्रागभावो हीति यद्यपस्य प्राक्कोटिस्तथैव भाववरूपमायकार्य
पूर्वावधिश्च स्यात्स्यादिति शेषः अन्वेष्यापत्तिमाह अनुप
लभ्यमानेति यत्र प्राक्कोटिः सामग्रीनोपलभ्यास्तत्रानादि
त्वमिष्यमेवेत्यर्थः तावन्मात्रेति अहरस्य पूर्वकोटित्वेनानादि
भावमात्रावाधिस्वभावत्वे यथा तत्र दिवसे तस्य सत्त्वं तथागत
दिवसेपि तद्दिवसनादिभावोत्तरस्य तत्कार्यस्य सत्त्वप्रसंगः एवं
तत्पूर्वपूर्वदिनव्यासपितत्कार्यस्यादित्यर्थः तथा चांगांतुका
देव तस्मात्कार्यकादाचित्कत्वं निर्वहतीति भावः तदहर्वादि
ति समासांतविधेरनित्यत्वात्समाधेयं तदवधिस्वभावत्वे
यत्रादिनैयमध्यक्षस्तत्रैवानेनोत्पत्तव्यमित्येषोपितस्य स्वभा

१३
13

वद्गतिशंकते तदहरेवेति अत्राहध्वंदेननकातमात्रमभिप्रेतं न
दनादित्वेतावन्मात्रावधेर्घटादेरप्यनादित्वाप्रसंगादित्यनाघानि।
त्यप्रवाहसिद्धये तथाविधएककालोपाधिर्वाच्यः तथा च तस्याप्य
नादित्वे यादृशावधिस्वभावत्वेतदुत्तरस्यापि दिनस्यानादित्व
प्रसंगो घटस्येवेति परिहरति तस्यापीति वस्तुतउत्पत्तिगर्भे
कादाचित्कत्वानुरोधादवधिस्वीकारेणवोत्तरणोत्पत्तिर्नियम्य
तद्रूपवधः प्राच्यत्वनियतत्वसिद्धो कारणत्वंसिद्धं तथा चोत्पत्ति
र्यदि किंचिदुत्तरत्वनियतास्यादनादिः स्यादितिनिष्कर्षः नत्वपू
र्वेति आगन्तुककारणघटितसामग्र्यजन्यं कार्यं नियतकालो
त्पत्तिकं न स्यादित्यर्थः तथापीति जात्यपेक्षयाकारणत्वेनिरस्ते
व्यक्त्यपेक्षयाव्यभिचारेण तत्सुनिरसमितिवापूर्वोक्तपवाधि
संधिः नियतेति कार्यनियतजातीयत्वेकारणजातिनियम्यस्य
हेतुत्वादित्यर्थः अथस्वभावादेवकार्यं नियतजातीयं स्यात्तत्राह
यदिहीति किमयं कार्यस्यैवमहिमायाद्भिन्नजातीयेभ्योपिजा
यमानं सजातीयमेव भवति हेतोरेव वायद्भिन्नजातीयमपिस
जातीयमेव जनयति आद्ये कार्मपुक्षकं तर्कद्वयमाह यदिही
ति अपघटोयदिपटजनकपावज्जन्यः स्यात्पटजातीयः स्या
त् एवं यदिपावद्धूमजनकजन्यः स्याद्धूमजातीयः स्यात् एव
मन्यजातीयत्वमप्यापाद्यघटादावपितज्जातीयत्वमापाद्यमि
ति सर्वजातीयत्वापादनार्थः घटभिन्नंकार्यंयदियावद्घटजन
कजन्यंस्याद्घटजातीयंस्यादित्येकजातीयत्वापादनार्थः द्विती
येकारयापक्षकं तर्कद्वयमाह यवमिति घटसामग्रीयदिपट

प्रयोजकयावद्रूपवत्तीस्यात्सटजातीयजनानीस्यात् एवंधूमादिजा
तीयजनकत्वमप्याद्यं घटान्यकार्यसामग्रीयदिघटप्रयो
जकयावद्धर्म्मवत्तीस्याघटजातीयजनिकास्यादितिक्रमेणापा
दनं ननुयद्येकजातीयकारणनियमात्कार्यजातिनियमस्तर्हि।
भिन्नजातीयेभ्यःकारणेभ्योनाभिन्नजातीयंकार्यंतत्स्याह कथमि
ति अत्रमीमांसकमुत्तरयति एकेति कार्यानुपपत्त्याधिलिंगकानुमा
नद्वयभंगप्रसंगेनतन्निराकरोति यदिहीति यावदिति यत्र
कृत्स्नकारणाभावंविनाप्यन्यस्मादेकजातीयंदृश्यते तत्रविजाती
येष्वेककार्यानुकूलाशक्तिःकल्प्यतेनत्वन्यत्रापीतिनोक्तदोषइ
त्यर्थः निमित्तस्येति तृणादिषुकारणतावच्छेदकरूपस्यादर्शना
त् नचशक्तिरेवतया अन्योन्याश्रयप्रसंगात् कारणत्वग्रहे
हितत्कल्पनमन्यथाऽसंभोपितत्कल्पनापत्तेः तत्कल्पनेवका
रणत्वग्रहस्तस्यान्वयव्यतिरेकावच्छेदकत्वात् दृश्यस्यवत्तृण
देरनिमित्तत्वात् कारणतानवच्छेदकत्वादित्यर्थः तृणादिषु
व्यभिचारमग्निकुर्वद्रूपत्वादतीन्द्रियाज्जातिविशेषाद्येपरिहरं
तितेप्यतएवनिरस्ताइत्याह एतेनेति ननुतृणादयोग्नेर्नानिमि
त्तकारणानि नवतत्साजात्यवैजात्याभ्यांकार्यसाजात्यवैजात्यं
किंतुसमवायिनस्तथाभावात् तच्चाग्नावस्त्येवेतिशंकते कार्ये।
ति तथापितृणादेर्व्यभिचारेणवकारणत्वंनस्यादितियपरिह
रतितयोरिति नहीति व्यभिचारिणोपिकारणत्वाघातादि
तिभावः किंत्विति तृणादौचैकैकाभावेप्यग्नेर्भावात्कारण
त्वंनस्यादित्यर्थः नचसमवायिसाजात्यादिकमपितत्कार्यत

याल्वेतंत्रं॰ तद्भावेपि कार्यवैजात्यदर्शनादित्याह नवेति अपि
त्विति सामग्रीच तृणादिघटिताभिन्नैवेतिभावः अन्यथेति
नचसमवायिनोद्रव्यस्याभेदेपि कारणतावच्छेदक धर्म्मभेदा
द्दुग्धादीनां जातिभेदः स्यात्॰ तथाहि द्रव्यजननेस्पर्शवत्वम
वच्छेदकंगुणकर्म्मजननेतुमूर्तत्वद्रव्यत्वेतथेतिवाच्यं द्रव्यत्वे
नैकेनैवरूपेणसंयोगविभागौप्रतिकारणत्वेपितयोर्जातिभेदा
त्कारणतावच्छेदकस्याकारणत्वाच्चेतिभावः नकार्यमात्रेनीति
रेषापितुद्रव्यस्यसतोःतोनद्रव्यादिभिः समानोपादानैर्व्यभिचा
रइत्याह नचेतिसमवाय्यभेदेकार्यद्रव्यंदधिदुग्धरूपंनभिद्ये
त क्षीरपरमाणवएवाम्लद्रव्यसंयोगान्नद्भकार्यद्रव्यादधि
आरभंते अतएवक्षीरंनष्टंदधिजातमित्ततोकिकोयमनुभ
वइत्याह आरब्धेति नन्वतीन्द्रियेषुपरमाणुषुदर्शनाभावाद्ध्या
रंभकोयोग्यावयवोवाच्यः॰ तत्रवक्षीरत्वंयोग्यानुयताधिवाधितं
प्रसुतावयवावयविवृत्तिजातित्वेनपृथिवीत्ववद्दधित्वस्यपरमा
णुवृत्तित्वमनुमेयं नचतंतुत्वेनव्यभिचारः॰ तस्यपटावयवेअ
श्ववयविनितंतौवृत्तेरितिवाच्यंतदवयववृत्तित्वेसतितदवयविवृ
त्तित्वस्यविवक्षितत्वात् द्व्यणुकवृत्तिजातित्वस्यतिंगत्वाद्वा न
वद्दाधित्वंनपरमाणुवृत्तिपृथिवीत्वव्याप्यजातित्वात् घटत्वव
दितिवाच्यं व्यंजकाभावस्योपाधित्वात्॰ पटत्वव्यंजकसं
स्थानविशेषस्यपरमाणावभावाद्दधित्वव्यंजकरसविशेष
स्यवत्तत्रसत्वात्॰ नचरसविशेषवदवायवित्वंतद्व्यंजकंगौ
रवात्॰ गंधवदवायवित्वस्यपृथिवीत्वव्यंजकत्वेतस्यापि

परमाणावव्वृत्त्यापत्तेश्च यद्वा· दधिद्व्यणुकं दधित्वाश्रयोपा
देयं कार्यत्वे सति दधित्वात्· स्थूलदधिवत्· न च कार्यत्वं व्यर्थं·
स्वतोनैकान्तिकपरिहारार्थत्वात्· दधिद्व्यणुकोपादानं वा न क्षीरा
रंभकं दध्यवयवत्वात्· दध्यारंभकदध्यवयवत् अत्रोच्यते क्षी
रपरमाणूनां तत्रावश्यकत्वाल्लाघएवावयवाः क्षीरमारब्धवंतस्त ए
वसहकारिविशेषाद्दध्यारभेतालाघवात् अनुमाने चानुकूलतर्का
भावो दधित्वं यदि पार्थिवपरमाणुवृत्ति स्यात् सटत्ववृत्ति स्यादिति प्र
तिकूलतर्कपराहतत्वं च· न च लाघवोपकार्यमाणाभावो दध्या
रंभकः परमाणुर्न दधित्वाश्रयः नित्यपार्थिवत्वात्· पटारंभ
कपरमाणुवदित्यनुमानस्य सत्वात्· न च व्यंजकाभावत्वमुपाधिः
दधित्वाश्रपरमाणोवरसविशेषवत्वं दधित्वव्यंजकमस्तीति
वाच्यं· प्रतिकूलतर्केण रसविशेषवदवयवित्वस्य तद्व्यंजकत्वात्
किं चैवं दुग्धोत्कर्षापकर्षयोर्दध्युत्कर्षापकर्षप्रयोजकत्वानुप
पत्तिः अनुपादानोत्कर्षादेरनुपादेयोत्कर्षाद्यप्रयोजकत्वात्·
न चेंधनोत्कर्षादिना वह्नेस्तत्वेन व्यभिचारः यस्योद्भूतरूपस्यो
त्कर्षार्थं तद्वृत्तिद्रव्यत्वव्याप्यजातीयं यद्दुपादीयते तत्तदुपादा
नोपादेयमिति व्याप्तेः इंधने च वह्निवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजा
तेरभावः उद्भूतरूपस्येति विशेषणान्नानुद्भूतरूपवद्वह्न्युत्कर्षा
र्थमुपात्तवह्न्युत्कर्षेण व्यभिचारः उपादेयतासाक्षात्परंपरासाधा
रणी विवक्षितेति यदोत्कर्षार्थोपात्ततन्तूत्कर्षे व्यभिचारः न च य
द्दधितन्न दुग्धारभ्यमिति स्मृतेर्दर्शनाद्दधिद्व्यणुकं न दुग्धत्वा
श्रयपरमाण्वारभ्यमिति वाच्यं दधिद्व्यणुकारंभके परमाणौ

कु० वृ०
१५
15

दुग्धत्वस्यावृत्तेः सत्तान्यद्रव्यत्वसाक्षाद्व्याप्यजातेरेव परमाणोवृ
त्तेः द्रव्यत्वस्यापिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् तद्भिन्नतद्व्या
प्यासाप्यत्वे सतितद्व्याप्यस्यैवसाक्षाद्व्याप्यरूपत्वात् नचान्यप
रमाणवस्तत्रादृश्यात्कस्मादध्यारंभकाः तदुक्तशेषाद्यनुविधाना
नुपपत्तेरुक्तत्वात् दध्यर्थंदुग्धोपादानानुपपत्तेश्च अपिचय
यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदुपादानोपादेयंयथामहापटध्वं
सजन्यः खंडपट इतिनियमाद्दुग्धध्वंसजन्यं दधि दुग्धोपादानो
पादेयं नचप्रतिबंधकद्रव्यध्वंसजन्यद्रव्येण व्यभिचारः ध्वंस
त्वेन कारणत्वस्य विवक्षितत्वात् प्रतिबंधकाभावस्य संसर्गा
भावत्वेनहेतुत्वात् नचस्यूतदुग्धध्वंसजन्यं दधिनतदेव पयज
न्यमिति व्यभिचारः परमाणुश्च न तदवयव इतिवाच्यं साक्षा
त्परंपरासाधारण्योपादेयत्वस्य विवक्षितत्वात् एतेनेक्षौ शङ्क
तस्तु रसविशेषत्वतिरेव दुग्धत्वादिजातिर्द्रव्यवृत्तित्वेपि तद्व्यं
जकस्यावश्यकत्वात् द्रव्यत्वादिसामानाधिकरण्यबुद्धिश्च
परंपरासंबंधात् तथाचदुग्धारंभकाएवावयवाः पाकज
रसविशेषशालिनो दध्यारंभकाइतिनविरोधमत्याहुः तृणा
देरग्निं प्रतितृणाद्यन्यान्यत्वेन कारणत्वं गृह्यत इति नव्यभिचा
र इति व्याप्तिपदार्थवादिना यत्समाहितं तत्राप्यनुमानमात्रभंग
इत्याहदिशेति एतेनेति नियमोविनाभावः वह्निं विनातस्य
स्मादपि धूमसंभवेन ततो वह्न्यनुमानाभावापातात् तृणादिवह्न्या
वृत्त्यात्तत्रापिकारणत्वग्रहसंभवादित्यर्थः कार्यकारणभावा
सिद्धौ स्वभावनियमोपिदुरवगमः कार्यानुपलब्धिप्रसंगरूपविप

पक्षबाधकसाध्यत्वात्तस्येतिभावः तदेव गस्यंतारभावाद्व्यक्ती
नामेवकारणत्वमित्युपसंहरति तस्मादिति वह्न्यवांतरजातीये
त्तृणादीनां प्रत्येकं कारणत्वस्वीकारादेवसर्व्वं समंजसमित्याह फू
त्कारेणेति प्रकारनियमः सहकारिनियमः वह्न्यनुकूलयक्तिम
त्वेनकारणत्वेनमणिफूत्कारत्नोमादपिकार्योपपत्तेरित्यर्थः नवोप
तध्विबाधितंवैजात्यमित्याह तेनैवेति विवादपदमग्नयोवह्नित्व
व्याप्यजातिमत्तः नियतसहकार्यनुप्रवेशेनजायमानत्वात् प्रदी
पदारुदहनवदितिकारणविशेषसंबंधव्यंग्यत्वात्तज्जातीनामि
त्यर्थः नवदृष्टांतः साध्यविकलइत्याह दृश्यतेचेति तत्रैतेतादि
कारणविशेषव्यंग्यत्वंयथा जातीनांतथात्रापीतिनादृष्टचरकल्प
नमित्यर्थः यद्यपिदुरूहत्वान्नैषविशेषआपाततः स्फुरतितथा
पिविशेषानाकलनेपितदनुकूलकारणमात्रमनुमायतेतदाक।
लनेनतुविशेषोप्यनुमीयतएवेत्याह यत्त्विति नन्वग्न्यवांतरजा
तीये तृणादीनांकारणत्वंनयुक्तंकारणगतैकशक्तिमपहाय का
र्यगतबहुतरजातिकल्पनेगौरवात्· तृणादिजन्याग्निनिष्ठावां
तरजातेर्योग्यानुपलंभबाधितत्वाच्च यत्रतत्कारणप्रयोज्यंप्रयो
ज्यंप्रदीपादौवैजात्यमनुभूयतेतत्रैकशक्तिमत्त्वमपिकारणेनाग
स्ति अतएवानुमानमप्रयोजकं अथास्तितृणादीनांफूत्का
रादिसहकारिता· तत्रफूत्कारादीनांसहकारित्वंतृणाद्यवच्छि
न्नंप्रतिस्यात्तृणादिसाधारणैकशक्तिमंतंप्रतिवा नाद्यः तृण
त्वाद्यवच्छिन्नस्यप्रागुक्तानैयत्याभावेनकारणत्वाभावात्तत्सहका
रित्वस्यदूरनिरस्तत्वात् ·नांत्यः तृणादिवारणेरपिफूत्कारस

मवहितादप्यग्न्युत्पत्त्यापत्तेः नच फूत्कारादिविशिष्टेतृणादौ शक्ति
र्नैकैवतद्वृत्तिवाच्यं तस्यतृणादिभिन्नत्वेतृणादीनामजन्यजनक
त्वापत्तेः तदभिन्नत्वेयत्तृणंफूत्कारेणाधधीयतेतत्रशक्तिः
फूत्कारसमवधानेसतिवान्यनाद्यः फूत्कारादसमवधानेपि
तस्मात्तृणादेरग्न्युत्पत्त्यापत्तेः नापरः तथासतिसैवशक्तिः
तृणेफूत्काराद्दहणोनिर्मथनादितिशक्तावनियतहेतुकत्वा
पत्तेः तत्राप्येकशक्तिमत्वेनानवस्थापत्तेरिति मैवं यथा
ह्यन्वयव्यतिरेकाभ्यांतृणफूत्कारयोरन्योन्यसहकारित्वंतथैवत
च्छक्त्योरपिपरस्परसहकारित्वेनवह्न्यनुकूलत्वंतथैवकार्यदर्श
नात् नतुमणिफूत्कारयोः सहकारित्वमितितनतच्छक्त्योःपरस्प
रसहकारित्वं कार्यविशेषात्कारणविशेषानुमानंनुवह्नित्वग्वि
दाविष्यतएव निरूपितनियतवह्न्यादिकारणकेधूमादावनुमा
नंस्यादेव अन्यथाकार्यवैजात्येपिवह्नित्वेनधूमविशेषएवकार
णत्वंनतुधूममात्रइतिशंकयातत्राप्यनुमानंनस्यादिति अत्रा
सत्यितृवरणाः तृणारणिमणिफूत्कारव्यक्तीनामनंतत्वेनप्रति
व्यक्तिभावहेतुजनितानंतशक्तिस्वीकारेगौरवं तावदनंतव्यक्ति
जन्यानंतवह्निव्यक्तिषुजातित्रयकल्पनेलाघवमितितद्देवकल्प
ते नचजातौयोग्यानुपलब्धिबाधः गोमयत्वाश्विकप्रभवत्वाश्वि
कयोरीषत्श्यामत्वकपिलत्वव्यंग्यवैजात्यस्यप्रत्यक्षसिद्धत्वा
त् तृणादिजन्याग्निष्वपितृणजन्यत्वज्ञानानंतरंमणिव्या
वृत्तानुगतबुद्धेर्जातिविषयत्वात् बाधकाभावात् ननुतृणा
दीनामग्नौकारणत्वग्रहेशक्तिवैजात्ययोरन्यतरकल्पनंतद्ध

हश्चनान्वयव्यतिरेकाभ्यांव्यभिचारात् अथारणिमण्यभाववति।
स्तोमविशेषे तृणं विना न वह्निस्तृणान्वयेऽवश्यं वह्निरित्यन्वयव्यति
रेकाभ्यां तत्रैव स्तोमे इतरकारणासमवधाने तृणान्वये वश्यं वह्निरि
ति नियतेनान्वयेन वा रासभादिव्यावृत्तेन वा तृणादिकारणताग्रहः
न न तृणं विनापि वह्निरिति ज्ञाने सति वह्निनियतपूर्ववर्तित्वस्यका
रणत्वस्य ग्रहीतुमशक्यत्वात् अबाधितताभावग्रहे भावग्रहस्याभा
वात् मैवं उक्तग्राहके वह्निनिष्ठकार्यतानिरूपितकारणतावच्छे
दकरूपवत्वं तृणस्य तृणनिष्ठकारणतानिरूपितकार्यतावच्छे
दकरूपवत्वं वह्नेर्वा अकार्यकारणव्यावृत्तं परिच्छिद्यते न तु तृण
त्वेन कारणत्वं वह्नित्वेन कार्यत्वं वा तच्चोभयथापि संभवति वह्नि
त्वेन कार्यत्वमेकशक्तिमत्वेन कारणतया वा तृणत्वेन कारणताव
ह्निविशेषत्वेन कार्यतया वा तत्र विनिगमकमुक्तमेव एतेन म
ण्याद्यजन्यवह्नौ तृणादीनां हेतुत्वं गृह्यत इत्यपास्तं अन्योन्याश्र
यात् मणिजन्यत्वग्रहे तदजन्यत्वग्रहः तृणाजन्यत्वे च तद्ग्रह इति
तथापि यत्र कार्यवैजात्याभावः सामग्रीभेदश्च तत्र का गतिः य
था द्रव्यनाशः क्वचित्प्रतियोग्याश्रयनाशात् क्वचिदसमवा
यिकारणनाशात् न चाश्रयनाशाजन्यद्रव्यध्वंसत्वावच्छिन्नं
प्रत्यसमवायिकारणनाशस्य नियतत्वात् कारणत्वग्रहः तदुक्तग
त्यान्योन्याश्रयात् उच्यते निमित्तकारणेतरकारणनाशत्वे
न कारणत्वं यथा विद्यमानाश्रयकद्रव्यनाशेऽसमवायिनाशो
हेतुः एवं समवायिकारणकद्रव्यनाशे प्रतियोग्याश्रयनाशः
तथाप्युभयजन्ये द्रव्यनाशे का गतिः आश्रयनाशाजन्यद्रव्य

नाशं प्रत्यसमवायिनाशस्य हेतुत्वात् तस्य चाश्रयनाशजन्यत्वा
त् अत्राहुः तत्रेतरसमवधाने तदुभयभावाभावाभ्यां व्यक्ति
विशेषभावाभावाद्यक्तिविशेषं प्रति तदुभयव्यक्त्योरेव नान्यथा सि
द्धयोः कारणत्वं ग्राह्यं तदतिरिक्त नन्वकार्यवैजात्येन तृणस्य व
ह्निविशेषं प्रवह्नित्वेन धूमविशेषं प्रत्येव कारणत्वं न धूममात्रं प्र
ति एवं च कथं कार्यात्कारणं क्वापि नानुमीयेत तदिदं चोपस्थितरूपेण व्य
भिचाराभावात्तेनैव रूपेण कार्यत्वग्रहस्तर्हि कारणतायामपि य
त्रोपस्थितरूपे व्यभिचारस्तत्रैव रूपान्तरेण कारणताग्रह इ
ति तुल्यमित्याह पर्वतेहीति एवं वह्नेर्धूमविशेष एव प्रयोजक
त्वाद्वह्निव्यतिरेकाद्धूमव्यतिरेको नानुमीयेतेत्याह एतेनेति नि
षेध्यतयेति शेषः तथा चेति विपक्षबाधकमानवेदनीयो हि स्वभा
वनियमो बौद्धानां बाधकं च कार्यानुपपत्तिर्न तत्स्तदङ्गेकथं म
नुमापकः स सिध्येदित्यनुमानमात्रविलयात्त्रिधैव तदुपगमा
दित्यर्थः तदेतद्दूषणं बीजत्वसामान्यं प्रत्यक्षसिद्धमङ्कुरे न प्रयो
जकं किं तु तद्विशेषः कुर्वद्रूपत्वमतीन्द्रियमिति वदतो बौद्धस्यैना
स्माकमित्याह प्रत्यक्षेति अप्रामाणिकबीजकुर्वद्रूपत्ववदप्रा
माणिक एव कार्यविशेषोपस्य कारणविशेषापेक्षेति बौद्धस्य
दोषस्त्वित्यर्थः अस्माभिस्त्वप्रामाणिको विशेषो नोपेयत इति
भावः अस्माकं त्विति यत्र कारणसामान्यं कार्यसामान्य
व्यभिचारि दृश्यते तत्रैव विशिष्यकारणताग्रहः यत्र न दृश्य
ते न त्रोपस्थितसामान्येनैव कार्यकारणभावग्रहः यदि वत्तृणा
दिवह्निविशेषाद्धूमविशेषः स्यादित्युच्यते तदा नेदमनिष्टम्।

मित्यर्थः ननुकार्यकारणभावग्रहोनतावद्व्यक्त्योरेवसहिव्य
क्तिमात्रमपेक्षतेतद्विशेषंवा॰ नाद्यः॰ यदिघटोयावत्पटजातीया
पेक्षणीयापेक्षःस्यात्पटजातीयःस्यात्॰ घटजातीयश्चनस्या
त्॰ अतएव॰ बाधकात् विशेषोपिपूर्ववर्तित्वमात्रं॰ तद्व्यक्तित्वं
वा॰ नाद्यः॰ यावत्पटादिजनकजन्यत्वेघटादिव्यक्तीनामभेदा
वेजात्यापत्तेः रासभादिसाधारण्याच्च अतएवनांत्यः व्यक्त्यो
रेवकार्यकारणभावेपूर्वंपूतदनिश्चयेप्रवृत्त्याद्यनुपपत्तेश्च ना
पिजात्यपेक्षया॰ भर्जितविनष्टबीजादिव्यक्तिषुतदापत्तेः नोप्या
पत्तिः तस्यसर्वथाकार्याजननात् शिलाशकलतुल्यत्वात्तथै
वं बीजादिव्यक्तीनामेवबीजत्वादिनासामान्येनानन्यथासिद्ध
त्वान्वयव्यतिरेकवत्वेनकारणत्वात् कश्चित्कार्यव्यतिरेक
श्चसहकारिवैकल्यात् अतएवशिलाशकलादिवैषम्यं नहि
यस्मिन्सतिकार्यंभवत्येवतत्कारणंअपितुयस्मिन्नसत्येवभवतिए
तच्चभर्जितविनष्टेपिसामान्यतोस्त्येव नचसामान्येनापिस्वरूपे
णयाव्यक्तिःकार्यंजनयत्येवसाकारणंनत्वन्येतिवाच्यं यागा
दौबहुविघ्नप्रत्यपायाससाध्येयागत्वेपिकिमियंव्यक्तिःस्वर्गजनिका
नवेतिसंशयेप्रवृत्त्यभावापत्तेः यदिवसायापव्यक्तिर्नरकजनि
कातदाकृतेनप्रायश्चित्तेननरकंजनयिष्यत्येव अन्यथातुप्राया
श्चित्तंविनापिनरकंमित्युभयथापिप्रायश्चित्तेप्रवृत्त्यनुपपत्ते
श्चेति किंपुनरिति दहनगतंसामान्यंदहनसामान्यंतेजस्त्व
वह्नित्वादितेननोत्तरविरोधः तृणादीनामिति तथाचसामा
न्यमाकस्मिकस्मादितिभावः तेजोमात्रेति तेजःपदंकार्यते

जः परं॰ नचस्यर्यातोकेनव्यभिचारान्नपवनस्तेजोमात्रेनिमित्तमि
तिवाच्यं निर्वातदीपस्यवार्तं विनानाशदर्शनेन नत्रयवन नि
मित्तजन्यत्वनिश्चयादन्यत्रापितेजस्त्वेनपवनजन्यत्वानुमाना
त् नचवह्नित्वमुपाधिः तेजः शरीरस्य पांचभौतिकत्वेनपवन
जन्यतयातत्रसाध्याव्यापकत्वात् आगमोप्यत्रास्त्येवस्येके
पवनोत्कर्षेणवह्न्युत्कर्षदर्शनात्तेजोमात्रेतस्यनिमित्तत्वं नवह्नि
मात्रे॰ सामान्यस्यसामान्यंप्रतिप्रयोजकत्वेविशेषस्योपाधित्वा
ऽतिप्रसंगादित्यन्ये पिंडितस्य॰ सुवर्णस्यरिव्यभिचारादिदृष्टांता
र्थेतत्राऽप्रश्नात्॰ एतावताकारणमात्रेसिद्धेसापेक्षत्वादित्यत्र
सिद्धसाधनंशंकरेतयापीति एकमित्येकदंडिमतसमुत्थाप
नं एषांब्रह्मणाएवसत्कृतकारकारणत्वात् एकजातीयमि
तिसांख्यानांमतंतेषांपुरुषाणांभेदात् प्रतिपुरुषंवमहत्त
त्त्वानांभेदेपिप्रकृतिविकारत्वात् प्रकृतेश्चैकत्वादेकजाती
यत्वात् तथाकारणस्यैकव्यक्तिकत्वेनैकजातीयत्वेनवाने
श्वरसिद्धिरस्मदादिनापितद्ध्यंसुशक्यत्वादितिप्रकृतसंगतिः
नचाविचित्रात्कारणाद्विचित्रंकार्यमदस्यचरमित्याह दृश्यते
हीति तिमिरमात्रोकाभावः तदपहारआलोकस्तत्करीदीपः
पीडितरूपः रूपांतरं घटादिरूपं॰ प्रदीपेनचस्वरूपभेदसहका
रिभेदाविस्यर्थः तथाचतद्दृष्टांतेन्येषामपिविचित्रकार्याणामव
विचित्रकारणजन्यत्वमनुमेयमितिभावः नचैवंचित्र्यादिति दृ
ष्टांतेप्यविचित्रकारणजन्यत्वमसिद्धमितिभावः एकस्येति ए
कस्यकारणस्यसंबंधीनक्रमः समस्यैकजातीयस्यचकारण

स्यसंबंधिनवैचित्र्यंकार्याणां शक्तिविशेषोनकार्यवैचित्र्येहेतुः
धर्म्मभिन्नोयतः चोहेत्वर्थे विचित्रकार्यजनकस्वभावादपिनका
र्यवैचित्र्यमुपपाद्यं एकत्रकार्येयत्स्वभावोजनकस्तदितरकार्येज
ननेपितत्स्वभावोवाच्यः अन्यथैकस्वभावभेदादेकात्वादिहानि
प्रसंगप्तु स्येकस्वभावजन्यत्वेन विजातीयकार्याणामप्येकजातीयंस्या
दित्यर्थः अक्रमादिति क्रमप्रयोजकसहकारिविधुरदित्यर्थः क्र
मवदिति सहकारिविरहेपिक्रमिककार्योजेनशीलत्वादक्रमस्यापि
क्रमिककार्यजनकत्वंस्यादित्यैगपद्यवदितिसप्तमीसमर्थाद्वतिः य
थाकार्ययौगपद्ये अयुगपत्स्वभावोपिदीयः कारणंएवमक्रमोपिक्र
मिककार्येषुकारणंस्यादित्यर्थः तत्कार्यंतथाक्रमवदित्यर्थः अयम
पीति समर्थस्यवितंवानुपपत्तेरनेकानिक्रमिकाणिकार्याण्युत्पत्त्यनं
तरमेवकुर्यादित्यत्रसमर्थोपिनतथाक्रमवत्तावत्कार्यकरणस्वभावस्यो
त्पादादितिनविरुद्धधर्म्माध्यासइतिक्षणभंगपक्षेपरिहारः संभवीस्थै
र्यपक्षेतुक्रमिकसहकार्यपेक्षांविनातादृशः स्वभावएवनस्यादित्य
र्थः पूर्वपूर्वक्रमिककार्येनपेक्ष उत्तरोत्तरकार्योत्पादसत्तापेक्षोवा
आद्ये· पूर्वेति वितंवहेत्वभावादित्यर्थः अंसे क्रमेति तस्यैवद्विती
यस्यकारणस्यापेक्षणादित्यर्थः एकजातीयंकारणंदहनजनकै
कस्वभावंवा· अदहनजनकैकस्वभावंवा· उभयजनकस्वभावंवा
आद्येदोषमाह नासाविति कारणाभावादित्यर्थः भवन्वादह
नात्मकोभवेदित्याह दहनोवेति इतरदहनवत्तद्धेतुस्वभावप्र
सूतत्वादित्यर्थः दहनजनकैकस्वभावस्यादहनजनकत्वेव्याघातो
पीतिभावः द्वितीयेतुयथाव्याख्यातवैपरीत्यंफक्किकार्थः नासोदह

नोदहनो वास्यादितिकृत्वा· तृतीयेत्तू भयात्मकइत्यत्रव यटोयदि
यावद्दहनजनकजन्यः स्यात्पटो नस्याद्दहनो वास्यादित्यदहनद
हनत्वयोरापादनं अदहनोयंपदितयास्याद्दहनः स्यादित्युभयथा
पादनमितिना प्रसिद्धिः ननु दहनजनकस्यैवधर्म्मभमुपादापाद
हनजनकत्वोक्तदोषइतिशंकते शक्तिभेदादिति स धर्म्मभे
दो न धर्म्मभिन्नस्तथासतिधर्म्मिणोभिन्नत्वात्तदभिन्नस्यशक्ति
रूपधर्म्मस्यभेदानुपपत्तेः नापि धर्म्मिभिन्नः तस्यैवकारणांत
रत्वेप्रतिज्ञातैकजातीयकारणत्वव्याघातापत्तेः नापि धर्म्मिन्ना
भिन्नोविरोधादितिपरिहरति धर्म्मिभेदेति परस्परवितक्षणा
नेकजनकस्वभावस्यत्वमितिनोभयात्मकत्वमेवस्येत्याह असं
कीर्णेति जनितादहनस्यदहनेजनपितस्येअदहनजनकस्वभा
वत्वमनुवर्त्ततेनवा आद्ये· नहीति अस्यादहनत्वेनाभिमतस्यअं
से· पुनरेकजातीयकारणत्वव्याघातः तस्यैवादहनजनकस्व
भावमतिक्रम्यस्वभावांतरेणजनकत्वादितिभावः तथाचेति द
हनोयघदहनजकस्वभावजन्यः स्याददहनः स्यादेवं विपरी
तमप्यापाद्यमित्यर्थः विचित्रकार्याणामपिविचित्रकारणज
न्यत्वेप्रत्यक्षानुमानेप्रमाणमुपसंहरन्नेवाह तस्मादिति ननु
स्वरूपमेवविचित्रमस्तुकृतंसहकारिवैचित्र्येणेत्यतआह नवे
ति ननुसहकारिवैचित्र्यानुप्रवेशंविनैवतयोरात्मलक्षण
स्वरूपमुपादायकार्यवैचित्र्यमुपपत्स्यतइत्यत्तआह नावेति
तदनपेक्षः सहार्यनयेक्षः तथाविचित्रकार्याजेकः बौद्धमतेस
होत्पन्नविचित्रसहकारिसहितस्यैवविचित्रकार्यजनकत्वादित्यर्थः

तदेवंविलक्षणसामग्रीविचित्रकार्यजनिकेति प्रसाधितं संप्रति
दृश्यकारणमेतत्कालिकैवसा तथा तदधिष्ठानं वात्मादिभि
रेव शक्यमिति पुनरपि सिद्धसाधनमाक्षिपति आस्त्विति विश्व
वृत्तितद्वृत्तिश्चेषां लोकानां वृत्तेः प्रवृत्तेरेवादृष्टं सिध्यतीत्यर्थः त
देवप्रपंचयति विफलेति भूतचैतन्येभूतानामेव परिहातिभेदा
द्वासनात यथोत्तरकार्यमिति तिन परलोकसिद्धिरित्यत्रादोषमाह य
दिहीति दृष्टंयागापि पूर्त्ततडागादि नहीति वक्तवदनिष्पा
ननु वंधीष्टसाधनताज्ञानजन्यत्वात्प्रवृत्तेरित्यर्थः प्रागेवेति नि
पात समुदायोऽतिशयार्थः तामेति तथावदृष्टसाधनताज्ञाना
देव तत्प्रवृत्तिर्नैपरलौकिके ष्टसाधनताज्ञानादित्यर्थः नहीति वि
एनीतायामेव यागक्रियायां लाभाद्युत्साहादितिभावः यद्वाऽस
त्यपतो लाभादिहेतुत्वेनास्तिकै रपि तत्करणप्रसंगादितिभावः
यतोवेति लाभाद्युद्दिश्यापि यागादौ प्रवर्त्तमानाय परेण धनमद
ष्टार्थमेवेति तत्सिद्धिरित्यर्थः स्वात्यर्थमिति दृष्टार्थमेव तद्दा
नमिति नादृष्टसमुद्देश्यमित्यर्थः नीतिनर्म्मोक्तिराजादिभिः प्रयो
जनमुद्दिश्य दानाद्युत्स्यतपस्विभ्यः प्रयोजनानुसंधानेन दा
नाभावादित्यर्थः त्रैविधेति त्रिवेदी वेदोपितपस्विनः परप्रतार
णार्थं तपासि प्रवर्त्तत इत्यर्थः वेदेति संध्योपासनाकरणेनिंदोप
देश्यात्प्रायश्चित्तोपदेशाच्च नित्यं नित्येव यदिफलार्थिनः प्रवृत्तिः
स्यात्तदायागवान्नित्यता भंगदुःस्य फलपतत्रप्रवृत्तिः कार्यताज्ञा
नं हि तत्र प्रवर्त्तकं तच्च लोके पाकादाविष्टसाधनताज्ञानाका
र्यताज्ञानानुमित्यानिर्वहति वैदिके नित्येकार्यताज्ञानं वे

कु०व०
२०
२०

दाधीनमितिकिमिष्टसाधनताज्ञानेव नवनिष्टापूर्वमेवफ
लंतथापिविनिष्टतामंगात् काम्यस्याते धर्म्मिग्राहकमानाका
म्यसाधनत्वेनैवसिद्धेर्गौरवप्रयोजनत्वाभावाच्च लोकेप्रवृत्तावि
ष्टज्ञानान्वयव्यतिरेकाविष्टसाधनताज्ञानजननद्वाराकार्यत्व
ज्ञानएवोपक्षीणाविनिष्फलत्वानंनप्रवृत्तिहेतुः नवान्यत्रापिनिः
फलेप्रवृत्तिप्रसंगः वेदस्येष्टसाधनत्वस्यवालिंगस्यकायता
ज्ञानहेतोरभावादिति जरन्मीमांसकमतंदूष्यांतरमित्यर्थः अत्र
सोपहासमाह गुरुमतमिति गुरोः प्राभाकरगुरोः गुरुमहद्वा
मतमेतन्नलस्मद्गुरोर्मतमित्यर्थः निःफलेप्रेक्षावतांप्रवृत्तेरनु
त्पादनियमात्प्रयोजनज्ञानस्यप्रवृत्तिहेतुत्वेमनिःफलेकार्यत्व
स्यायोग्यतयावेदेनवेदेनवोधयितुमशक्यत्वात् प्रवर्त्तकस्य
कार्यत्वज्ञानस्यासंभवात् अतएवेष्टसाधनताज्ञानंकार्यता
ज्ञानएवोपक्षीयमनन्यथासिद्धत्वादितिभावः दृष्टेरिति तथा
चनिःफलएवान्यैःप्रतारणादाकुमारंप्रवृत्तिरितिनतत्रप्रयो
जनगवेषणमितिभावः विप्रतिपत्तुरन्यथाज्ञातमर्थमन्यथावो
धयतिभ्रांतोवा आद्येःवृद्धानामिति अंत्येःकथंचैनमिति
प्रत्युतानादिप्रवृत्तितयाद्दष्टफलनिरपेक्षतयावादृष्टफलत्व
मेवानुमेयमितिभावः यतइति एवंयाखंडप्रवृत्तिर्दृष्टफलनि
रपेक्षायरलोकसाधनंस्यात् अन्यथायंपरिशेषस्तत्रैवव्य
भिचरेदित्यर्थः हेलितिहेतुदर्शनेनकर्मताघवाहिनाताह
शीतत्प्रवृत्तिरन्यथासिद्धा अत्रतुब्रह्मचर्यादिदुःखमयकर्म्मप्र
धानतपानतत्संभवइत्यादिद्वितीयस्तवकेवक्ष्यमाणत्वादि

त्यर्थः नन्विस्यापूर्त्तीनांहेतुदर्शनेशून्यत्वेपीदंप्रथमतयवप्रतो

रकत्वद्बोधकागमस्यप्रामाण्यभ्रमेणग्राहयित्वाप्रेक्षावतःप्रव

र्त्तयेदित्यतआह अनादाविति एवंभूतेविगीतेनादौपरलौ

कसाधनेप्रकारांतरंसादित्वंविगीतत्वंच यदिवैदिकव्यवहार

तिरिक्तोऽनादिरविगीतश्चव्यवहारः प्रामाणिकः स्यात्तदाऽयमा

धुनिकोवैदिकव्यवहारः परप्रतारणपरइतिनिश्चीयेत नत्वेव

मित्याहनत्विति तस्मादयमेवव्यवहारः प्रामाणिकोनप्रतार

णपरइत्युपेयमिति अनभ्युपगमेत्वप्रामाणिकत्वाविशेषात्पा

खंडापाखंडमतभेदोनस्यात् तथावप्रमाणेनखंडिताःपाखंडाइ

त्यपिनस्यादित्याह अन्यथेति अस्त्विति ननुतज्जन्यमदृष्टमि

त्येवकारार्थः तथादृष्टाधिष्ठातृत्वेनेश्वरानुमानमाश्रयासिद्धमिति

तिभावः क्षणिकत्वादिति आशुतरविनाशित्वादित्यर्थः चिरध्वस्त

मिति फलस्यस्वर्गादेःकालांतरभावितयानतत्राशुविनाशिनः

साक्षात्साधनत्वमितिप्रतीतसाधनत्वान्यथानुपपत्यातज्जन्यापू

र्वकल्पनमित्यर्थः अतिशयंविनाचिरध्वस्तंकर्म्मनफलायाल

मसमर्थमितियोजना साक्षात्साधनत्वाभावेपिसाधनत्वस्य

फलसमयपर्यंतस्थापिव्यापारव्याप्तत्वादितिभावः ननुचादृष्टा

सिद्धावपिभूतधर्म्मएवतदस्त्वित्यतआह संभोगइति संभोगः

समीचीनोनियतोभोगः निर्विशेषाणामदृष्टस्वरूपविशेषरहि

तानामात्मनांनस्यात् संस्कृतासंस्कृतानांसाधारणत्वादित्यर्थः

अत्रस्वहेतुवतोत्यन्तस्वरूपविशेषवंतिशरीरादीनियतात्म

नोभोगसाधनानिसंत्विति शंकते ईदृशानीति एतद्धिकल्प

कु० कं
२१
21

स्वव्याघातादभिमतसिद्धिभ्यां परिहरति तदिदमिति रूपं स्वरूप
मतीन्द्रियस्वभावत्वमित्यर्थः सहभेदोऽतीन्द्रियः सहकारी यद्वा ·
रूपं धर्मो जातिरूपोऽजातिरूपो वा आद्येन तावदिति व्यक्ति
योग्यतैव जातेर्योग्यत्वादित्यर्थः अंत्ये · शंकते सिध्यत्विति
नैतावताप्यात्मधर्मापूर्वसिद्धिः भूतवृत्त्यतीन्द्रियधर्मादेवोप
पत्तेरितिभावः गुरुत्वादीत्यादिपदेन मम मीमांसकाभिमतशक्त्या
दि गृह्यते तत्र शक्त्यापत्त्योपपत्तिं प्रमाणयति तथाहीति शंको
विप्रतिपत्तिः कारणानि स्वजन्यानुकूलतादृश्यातीन्द्रियभाव
भूताधर्मवर्त्तिन वा · आत्मन्यदृष्टं तथा प्रसिद्धं यद्वा · कारणता
वच्छेदकधर्मत्वमतीन्द्रियत्वव्याप्यं न वेति सामान्यतः विशिष्यतु
वह्निदाहानुकूलतादृश्यातीन्द्रियभावभूतधर्मवान्न वा · करतलान
संयोगो वा तादृशधर्मसमवायी न मवायी न वा आत्मा तथा प्रसि
द्धः अनुकूलत्वं च कार्याभावव्याप्याभावप्रतियोगित्वं कारणकारण
साधारणमिति नाप्रसिद्धं नाप्रसिद्धी अर्थापत्तेरदृष्टादृष्टान्यतर
वैगुण्येनान्यथोपपत्तिं निराकरोति तत्रेति दाहकोऽस्यस्य सस्य
पूर्ववत्सत्वादित्यर्थः न च मंत्रादिना स एव नाश्यते पुरुषान्तरेणा
स्यानुभवादिति भावः तस्यैति अदृष्टस्यादृष्टसाकल्यमात्राय
त्वादित्यर्थः ननु परमाणुकर्मण्यध्ययनतुल्यत्वेऽप्येकत्र फलाभा
वे वंध्यासंप्रयोगे वाऽदृष्टविलंबो दृष्टः दृष्टापहारे सत्यपि नैवं
अदृष्टविलंबो हि न तन्नाशानुसारी · मरणाद्यपसरणानुपदं दा
हाभावापत्तेः अदृष्टासादकस्य तत्राभावात् अदृष्टजनको
वा च मनादेः साधारण्यात्तत्राप्यन्वयापत्तेः अशुचेरेव तदुसा

देशौ चेत्सत्ति तदभावापत्तेः अदृष्टासंताभावतत्राभावात् कदा
चिद्दाहात् दाहादिकार्यविशेषे यावददृष्टसमवधानेवश्यमदृष्ट
सद्भावात्तदभिप्रेत्यैतदुक्तमित्यन्ये ननु मण्यादिना दाहप्रतिप
क्षस्यादृष्टभेदस्यासादनाद्दाहाभावः स्यात् नवाग्न्यंतरेणापित
स्य दाहाभावापत्तिः प्रतिनियतान्निसाध्यदाहप्रतिपक्षस्यैवाद
ष्टस्य तेन जननात् ओषधतिलकाम्यादिषु तेपकारि पुरुषनिष्ठ
स्य तस्योत्पादात् अदृष्टविशेषार्जितप्रतिपक्षसमवधानस्यवा
प्रतिबंधकत्वं सवदाहाभावकल्पः नैवं तस्योत्तंभकाभावस
हितमण्यपजन्यत्वे नियमेनादाहार्थिनस्तत्राप्रवृत्त्यापत्तेः तज्ज
न्यत्वे तु प्रथमोपास्थितोपजीव्यतया तदुत्साहकस्यैवाभावहेतुत्वौ
चित्यात् प्रतिबंधकाभावस्य तथाभ्युपगमात् अन्यथेति अ
विनश्यदवस्थकर्मण्यपीत्यर्थः अतो यदभावात्कार्याभावस्तद
द्धेत्वादावभ्युपेयं तेन विना तदभावाधीनदाहाद्यनुपपत्त्यार्था
पत्तेः शक्तिसिद्धिरिति भावः ननु ततः किंचिद्दाहप्रयोजका
भावस्तत्र सिध्यतिः नत्तू क्तनूपः पद्भावे दाहाभाव एव दाहप्र
योजकोस्त्विन्वयाद्यनुविधानादुभयवादिसिद्धत्वाच्चेत्यत आह
नवेति तुच्छो हीति तुच्छत्वविधिरूपरहितत्व [illegible] कारणत्वं वि
धिव्याप्तमित्याशयात् न तत्तीकत्वं मीमांसकैस्तथानंगीका
रात् यत्तवाग्रेस्फुटं व्यतिरेकव्यभिचार प्रतिबंधके ।पक
प्रतिबंधकसत्वे तदन्यप्रतिबंधकाभावेपि कार्यानुदयादन्व
यव्यभिचारोपीति भावः सामान्यतो व्यतिरेकव्यभिचारमुक्ता
विशिष्यतमाह मणीति परस्परव्यभिचारेण प्रतिबंधकाभा

कु० व०
२२
22

वहेतुत्वस्यगृहीतुमशक्यत्वान्नेनान्यथोपपत्तिरित्यर्थः तावता
मुपसंग्राहकश्चैकतुपाधिर्नास्तीत्यभिमानः तत्रप्रागभावेतिव
क्तव्ये ध्वंसपदगम्याभावविशेषणतयाप्रागभावस्याप्राप्तेः प्रा
गित्येतन्मात्रमुक्तं प्रतिबंधकत्वान्यथानुपपत्तिरूपामन्याम
र्थापत्तिमाह अकिंचिदिति प्रतिबंधजननंविनाप्रतिबंधक
त्वानुपपत्तिरित्यर्थः अथशक्तिनाशरूपप्रतिबंधजनकत्वात्त
त्वं तत्राह किंचित्करत्वइति प्रतिबंधकाभावमात्रकारण
त्वेदूषणांतरमाह मंत्रादीति यदिप्रागभावादिष्वनुगमकम
भावत्वमेव तदान्योन्याभावेपितदस्तीतिप्रतिबंधकसत्वेपित
दन्योन्याभावमाश्रित्यकार्योत्पत्तिप्रसंगः संसर्गाभावत्वंवतद्व्या
वृत्तंनिर्वक्तुमशक्यमित्यर्थः सिद्धमर्थमुपसंहरति अतोतीं
द्रियमिति अनुगुणत्वंकार्याभावव्याप्याभावप्रतियोगित्वंस
हकारिणोप्यस्तीतिशक्तेःसहकारित्वाभ्युपगमेपसिद्धांतःश
क्तिमत्कारणंनतुशक्तिरितिस्वीकारादितिविशिनष्टि अनुग्रा
हकमिति कारणतावच्छेदकमित्यर्थः यस्यापकुर्वतामिति
कर्मणःकारकस्यैवसंबंधमात्रविवक्षयाषष्ठी यस्येत्यनंतरं
स्वरूपमितिशेषइत्यन्ये तथाचकारणतावच्छेदकशक्तेःप्रति
बंधकेननाशात्तत्प्रतिबंधकेकार्याभावउपपद्यते नित्यानि
त्यघटितसामग्र्यांनित्यकारणशक्तेरनुत्पन्नभावत्वेनाऽनाशे
प्यनित्यकारणशक्तिनाशात्कार्याभावः नचैवंपुरुषांतरस्या
पितत्तोग्नेर्दाहानुत्पत्तिःप्रतिनियतकरतलानसंयोगगतदा
हानुकूलशक्तेर्नाशादितिभावः शक्तेःप्रदेशांतरेप्युपयोग

माह यस्येति तृण्यादीनां व्यभिचारात्कारणत्वमनुपपद्यमानम
नुगतं सामर्थ्यमतीन्द्रियं कल्पयतीत्यर्थः भावो यथेति यथा येन
प्रकारेणान्वयाद्यनुविधानेन कारणत्वमाह केण भावः कारण
मतस्तेनैवाभावोपि कारणं तथात्वेपि भावत्वव्याप्यं कारणत्वमि
ति यदि ब्रूयात्तत्राह कार्यवदिति तर्ह्यभावो नियतोत्तरक्षणवर्त्ति
त्वेन कार्योपि न स्यात् भावत्वव्याप्तत्वात्कार्यस्य अथ वैपरीत्य
स्यापि सुवचत्वान्न तथा एवमभावः कारणमपि न तस्य भावत्व
व्याप्तत्वेमानाभावादित्यर्थः द्वितीयामर्थापत्तिं दूषयति प्रतिबं
धइति सामग्र्यंतर्गतमंत्राद्यभावविषयक प्रतियोगिरूपः प्रति
बंधस्तत्कारणं वपुरुषः प्रतिबंधकोन तु मण्यादिः सर्वं किंचित्के
रपदेष्वुभयसिद्धमित्यन्यथोपपत्तिरित्यर्थः ननु तुच्छत्वमेव तत्र
मानमुक्तमित्यत आह नहीति तुच्छत्वं हि भावनिषेधरूपत्वमु
क्तं तच्चाप्रयोजकमन्वयादिरहितत्वस्योपाधित्वात् न वान्या
निषेधरूपत्वेनैवाकारणत्वं भावस्याप्यभावनिषेधरूपत्वेना
कारणत्वापातात् अथाकारणत्वेतं तमस्वरूपत्वं भावस्या
स्वरूपमेतिमतं तर्ह्यभावेपि तुल्यमित्यर्थः परिवर्तेति कार
णत्वमभावव्याप्यमिति भावः कारणं न स्यादित्यर्थः नियतपू
र्ववर्त्तित्वमात्रं कारणत्वं तच्चाभावेप्यस्तीति भावः कारणतामा
ह कमप्युभयसाधारणमित्याह अन्वयेति नवसत्ताविशिष्ट्या
स्य कारणत्वं जातेरप्यत्वापातादित्यार्यः अभावस्येति अ
न्वयाद्यनुविधानेतुल्येप्यभावसन्निधिरकाशास्येवान्यथासिद्ध
इत्यर्थः तुल्यमितितुल्यमिति अभावस्यैव कारणत्वे भावसन्नि।

धिस्तथैवकिंनस्यादित्यर्थः प्रतियोगिनमिति विध्युत्सारण
प्रयुक्तः सन्निधिरभावस्येत्यन्यथासिद्धमित्यर्थः तुल्यारिति
भावस्याप्यभावोत्सारणाप्रयुक्तः सोप्यन्यथासिद्धः स्यादित्य
र्थः अभावस्यापीति भावाभावयोः स्वरूपमेवमिथोविरो।
धो नतूत्सारणमन्यदित्युभयंसमानमित्यर्थः वस्तुतकुप्रसंयो
गाभावस्यगत्तावनुपलब्धेश्चाभावाविज्ञानेविहिताकरणस्यप्र
त्यवाये निर्दोषत्वस्यवेदप्रामाण्ये ज्ञानोजनकत्वस्यमीमांसके
रपिस्वीकारादिभावस्यकारणत्वानभ्युपगमेपसिद्धांतइतिर
हस्यं अनुपपन्नइति प्रमाणाभावादितिशेषः प्रतिबंधके
ति तत्रापिप्रतिबंधकस्याभावोनतुतत्सद्भावइतिनव्यतिरे
कव्यभिचारइत्यर्थः ननुप्रतिबंधकोत्तंभकसत्वेपिकथंप्रतिबं
धकस्याभावइतिस्यतआह असत्वातिपक्षोहीतिउत्तंभकाभाव
विशिष्टोयः प्रतिबंधकस्तस्याभावः कारणमुभयसद्भावेप्यस्ती
त्यर्थः प्रतिबंधकाभिमतइतिप्रतिबंधपदंप्रतिबंधकत्वेना
भिमतइत्यर्थः अतोनविरोधः पक्षेति कार्याभावोन्नेयंप्र
तिपक्षत्वंकार्यसत्वेनास्तीत्यर्थः तथापीति यत्रोत्तंभकाभावेस
तिप्रतिबंधकस्याभावस्तत्रविशेष्यस्यप्रतिबंधकस्यैवाभावः कारणं
यत्रतुप्रतिबंधकसद्भावेसत्युत्तंभकसत्वात्कार्यंतत्रोत्तंभकाभाव
स्यविशेषणस्याभावएवकारणमितिसामग्रीभेदइत्यर्थः विशि
ष्टस्यापीति विशेषणाद्यभावेसर्वत्रविशिष्टाभावोप्यस्तीतिसएव
वानुगतः कारणमित्यर्थः तदेवोदाहरणेनोपपादयतिनही
ति दंडिनीत्यदंडानांदंडाभाववतामन्येषांनाभावः किंतुदंडाभा

वस्यैवेतिनकिंस्वभावएवान्येषामपीतितोकसिद्धमेवेत्यर्थः नेदंवस्तु
स्यमितिपथ्याहीति पुरुषेदंडाभाववैशिष्ट्यंकेवलं·प्रतिबंधकेत्तू
त्तंभकाभाववैशिष्ट्यं यथाकेवलदंडसद्भावेविशेषणविशेष्योभ
याभावात् दंडपुरुषसद्भावेविशेषणदंडाभावविरहादुभयाभा
वेविशेष्यपुरुषाभावात्केवलस्यविशिष्टपुरुषाभावोनुगतोऽबाधि
तव्यवहारबलात्सर्वत्रप्रतीतिसिद्धः तथाकेवलोत्तंभकसद्भावेवि
शेषणविशेष्यद्वयाभावादुत्तंभकप्रतिबंधकसद्भावेविशेषणोत्तंभ
काभावविरहादुभयाभावेचविशेष्यप्रतिबंधकाभावादुत्तंभकाभा
वविशिष्टप्रतिबंधकाभावोनुगतविशेषणाद्यभावव्यापकोदाह
कारणमित्यर्थः ननुविशिष्टंनार्थांतरंयेनतदभावोनुगतः।
स्यात्किंतुविशेषणविशेष्यतत्संबंधाइतितेषांप्रत्येकाभावस्यका
रणत्वेसामग्रीभेदस्तदवस्थः नव्यासज्यप्रतियोगिकोऽन्य
एवायमभावः केवलप्रतिबंधकसत्वेपितदभावाद्दाहापत्तेः एक
सत्वेपिद्वयमिहनास्तीतिप्रतीतिलस्यसमुदायविरोधिनोपवत्
समुदायसत्वयवविरहात् तादृशभावानभ्युपगमाच्च व्यास
ज्यवृत्तिधर्मसमानाधिकरणप्रत्येकपर्यवसितप्रतियोगिकाभा
वादेवतज्जन्यप्रतीत्युपपत्तेः अथविशिष्टविरोधित्वमेवानुग
तंविशेषणाद्यभावानांकारणतावच्छेदकंयत्रविशिष्टंनतत्रतद
भावइति सहानवस्थाननियमस्यविरोधस्यानुभवसिद्धत्वा
दितिचेत्· न· सहिपरस्पराभावरूपतपरस्पराभावव्याप्यत्व।
पावातदाक्षेपकतयावा नाद्यः विशेषणाद्यभावस्यप्रत्येकं
विशिष्टाभावतयातत्प्रत्येकाभावाभावस्यविशेषणादेर्विशि

कु० वं०
२५
२५

स्यत्वापातात् तदभावाभावस्यतत्वात् नचोभयाभावाभाव
त्वमुभयंविशिष्टं· तथासत्यभावद्वयस्य विशिष्टयाव त्वेप्रत्येकाभा
वाद्विशिष्टाभावव्यवहारानापत्तेः नात्यो विशेषणाद्यभाव
स्यविशिष्टाभावत्वेतदव्याप्यत्वात्तदनापेक्षकत्वाच्च अभेदे
तयोरभावात् अथविशिष्टानतिरेकेपिप्रतियोगिभेदादि
वप्रतियोगितावच्छेदकविशेषणभेदादप्यभावोभिद्यते य
था वायोरुष्णस्पर्शत्रयप्रत्येकरूपाभावेनिश्चितेपिरूपत्वा
वच्छिन्नस्यतथाभावानिश्चयाद्वायोरूपंनवेतिसंशयः एवमुक्त
भकावच्छेदेनमण्यादीनामभावःप्रतिबंधकसत्वेप्युक्तभका
भावविरहादस्त्येवेतिसएवानुगतोहेतुःस्यादितिचेत्· न· ए
वं क्षणत्वयातीतविशेषणावच्छिन्नत्वेनप्रतिक्षणंघटादिना
शेक्षणभंगापत्तेः प्रत्यभिज्ञानानुपपत्तेश्च दंडित्वावस्था
यांकेवलोपमासीत्पुरुषद्वयादौविशेष्यवतिसविशेषणेहीति
न्यायेनकेवलाद्यभावस्यैवप्रतीतेः अतएवविशेषणावच्छिन्न
प्रतियोगिकोविशेष्याभावएवविशिष्टाभावःप्रत्येकाभावानु
गतोहेतुरित्यपास्तं अत्रास्मत्सितृचरणाः विशेषणविशेष्य
योःसंबंधाद्विशिष्टव्यवहार इतितयोःसंबंधाभावाद्विशिष्टा
भावइतियतोयद्व्यवहारस्तदभावात्तदभावव्यवहारस्यौचित्यात्
अतएवएसएवत्रयःसंबंधःसएवतत्तत्स्यवैशिष्ट्यमितिनानु
गमः तदिहप्रतिबंधकोत्तंभकाभावयोःसंबंधाभावःप्रत्येका
भावव्यापकोनुगतोदाहादिहेतुःसर्वत्रप्रतिबंधकोत्तंभकायोः
संबंधोनास्तीतिप्रतीतेः नचैवंप्रतिबंधकोत्तंभकाभावौपन्नत

त्रापिदाहापत्तिरभावाधिकरणयोरतिरिक्तसंबंधाभावादितिवा
च्यं तदभावेपिस्वरूपसंबंधस्यभावात् अथातदुभयस्वरूपा
भावस्यदाहहेतुत्वेतदुभयाभावेउत्तंभकत्वेपरंदाहःस्यात् प्रति
बंधकाभावोत्तेजकयोरेवतदुभयाभावत्वादितिचेत् न·सं
बंधांतरंविनाविशिष्टप्रत्ययजननयोग्यत्वस्वरूपसंबंधत्वा
त् तदभावस्यप्रतिबंधकाभावेप्रतिबंधकोत्तंभकसद्भावेउभ
याभावेवाऽविशिष्टत्वात् ननूत्तंभकप्रयोगेमणेरभावोनप्रध्वं
सप्रागभावत्वा· तयोःप्रतियोग्यसमानकालीनत्वात् नवोत्तंभ
काभावाध्वंसप्रयुक्तस्तूत्तंभकाभाववत्वेनमणेर्ध्वंसवेतिवाच्यं
क्षणभंगापत्तेरुक्तत्वात् ध्वंसस्यानंतत्वेनोत्तंभकायनपेपिदा
हप्रसंगाच्च नाप्यत्यंताभावः कादाचित्कत्वात् नचविशेषण्या
द्यभावप्रत्यासत्तिकादाचित्कत्वात्कादाचित्कत्वप्रतीतिकार्यो
नुदयाविति नवाच्यं प्रत्यासत्तित्वावच्छेदकानुगतधर्माभावस्या
भावात् विशिष्टविरोधित्वस्यवनिरस्तत्वात् मण्यादेःस्वावय
ववृत्तितयाकरादौतदत्यंताभावस्यसदातनत्वामाणीसमवधा
नेपिदाहापत्तेश्च नैवं क्लृप्तसंसर्गाभावत्रयवैधर्म्येप्यबाधि
तप्रतीतेस्तुरीयस्यैवतत्सिद्धेः क्लृप्तविशेषबाधात्सामान्यबाधे
त्वेप्यानादिसंसर्गाभाववैधर्म्याद्ध्वंसस्याप्यसिद्ध्यापत्तेः अबाधित
सामान्यबुद्धेर्विशेषांतरमादायपर्यवसानामितितुल्यं यद्वाऽ
हमूततेघटोनास्तीतिवत्संसर्गावच्छिन्नप्रतियोगिकाभावविशे
षस्यसतिप्रतिबंधकेतत्राभावःसर्वसमयावच्छेदेनसंसर्गितया
संताभावएवंताहृशश्चमण्याद्यभावोघटाभाववद्भूततेकरे

कु०वृ०
२५
25

पिवर्त्तेते नचैवंप्रागभावप्रध्वंसयोरप्यसिद्धिरत्यंताभावभेदेनैव
कालभेदात्कथंतेघटोनास्तीतितज्ज्ञप्त्युपपत्तेरितिवाच्यंअ
त्यंताभावस्यघटसत्वकालेपिसत्वात्तदापिघटोभविष्यतीतिघ
टसत्वविरोधिबुद्ध्यापत्तेः प्रतियोगिसत्वविरोध्यभावस्वीका
रात् नवमणिसंयुक्तकरेपितत्संयोगात्यंताभावोस्त्येवतस्या
प्यप्यत्तत्तित्वादितितत्रापिदाहापत्तिः समानाधिकरणप्रा
तियोगिसत्वविरोधिनस्तस्यहेतुत्वात् प्रहरंमादहेत्यत्रसाव
धिमंत्रपाठेमंत्रनाशेप्युद्देश्यज्ञानाहितसंस्कारविषयकाल
स्यप्रतिबंधकत्वमिति अथेति विशेषणाद्यभावत्रयघटि
तंसामग्रीत्रयमेवदाहहेतुरस्तुकिमनुगतेनविशिष्टाभावेने।
त्यर्थः कार्यस्येति अन्यान्यव्यभिचारेणान्वयव्यतिरेकयोर
शक्यग्रहत्वादित्यर्थः ननुतत्तत्कारणप्रयोज्यदाहेजातिभेद
इतिनव्यभिचारइत्यतआह जातिभेदेति दाहत्वेजात्य
त्ययोग्यानुपलंभवाधितत्वात् योग्यव्यक्तौवायोग्यजात्य
भावादित्यर्थः ननुतृणादिजन्याग्निष्विवकारणभेदव्यंग्यो
जातिभेदःस्यादित्यतआह यथोक्तेनेति गौरवादितिभावः
तत्सत्वेपिनसिद्धांतक्षतिरित्याह भावेवेति विशेषव्यभि
चारमपाकरोति प्रागिति प्रतिबंधकसंसर्गाभावत्वस्योपा
धेरनुगताननतिप्रसक्तस्यसत्वादित्यर्थः नन्वन्योन्याभावस्या
पत्स्यसंसर्गाभावत्वस्योपाधेरभावात्प्रतिबंधकसत्वेपितद
न्योन्याभावात्कार्यस्यादित्यतआह यस्त्विति प्रतिबोध
नीयः प्रतिबंधावोधनीयइतिपर्यायः तथाहि अन्वयव्यति

रेकाभ्यां व्याप्तिकारणत्वयोर्न्न हि हे मीमांसकैरपि संसर्गाभावस्या
कारणत्वांगीकारात् । अन्यथा व्यापकसामग्र्याः सत्वेपित
दन्योन्याभावाद्व्याप्यकार्याभावापत्तेः तत्रापि प्रतिबंधकाभा
वेशक्तिरस्तीति प्रतिबंधकसत्वे तदन्योन्याभावमादायशक्तिस
त्वप्रसंगश्चेतिभावः माभूदिति ज्ञातसभावेपि संसर्गाभावस्यापि
संसर्गाभावत्वरूपेके पाधिनैवकारणत्वमित्यर्थः नचतन्निर्व
कुमशक्यं अधिकरणे प्रतियोगिनमारोप्य यत्र निषेधबुद्धि
स्तत्र संसर्गाभावो यत्र तु प्रतियोगितावच्छेदकमारोप्य निषेधीः
सोन्योन्याभाव इत्यस्य सुवचत्वात् ननु प्रतिबंधकाभावो न हेतुरेकदंडान्वये
घटोत्पत्तिवदेकप्रतिबंधकसत्वेपि तदन्याभावात्कार्योत्पत्त्यापत्तेः
नहि यावत्कारणतावच्छेदकावच्छिन्नं तावदन्वये कार्यमित्यत आ
ह एतेनेति अभावकारणत्वांगीकारेणयथा वीजजातीयेस
त्यपि वीजांतराणामभावादंकुरेण न भाव्यमित्ययुक्तं तथेदम
पीत्यर्थः प्रतिबंधकत्वावच्छिन्नप्रतियोगिकः सामान्याभा
वः कारणं सत्वयावद्विशेषाभावनियतइतिनैकप्रतिबंधसत्वे
तदन्याभावात्कार्योत्पत्तिः यद्वा । प्रतिबंधकाभावत्वेन न कारणं
अन्योन्याश्रयात् कारणीभूताभावप्रतियोगित्वस्य प्रतिबंध
कत्वात् किंतु मण्याद्यभावकूटस्य सच तत्र नास्त्येवेति
भावः मुख्यइति प्रतिबंधकस्य सामग्र्यंतर निकारणविग
मार्थत्वादित्यर्थः येनेति तथाच कार्यानुत्पाद हेतुतया
मंत्रादेरेव प्रतिबंधकत्वमस्त्वित्यर्थः कात्स्न्येति कात्स्न्यभा
गभावस्वरूपातिरिक्तापत्त्याप्रेरभावात् स्वरूपस्यचत

दजन्यत्वादित्यर्थः प्रागभावावच्छेदकेत्यत्र कर्म्मधारयः कालो
पाधिमात्रस्यसंग्राहः जन्यत्वेपीतिशेषः लोकेकारणाभावात्का
र्याभावइतिहेतुपंचमीप्रयोगऔपचारिकइत्याह तस्मादिति
मुरारिमिश्रास्तु नप्रतिबंधकाभावः कारणंनवाशक्तिः किंतुत
त्त्वकालीनदाहविशेषंप्रति तत्तत्कालप्रतिबध्येतरवह्निः कारणत्व
मितिप्रतिबंधकाभावः कारणतावच्छेदकोदंडत्ववन्नतुकारणं
आकाशादेरेकव्यक्तिकेक्वचित्प्रतिबंधेप्यन्यत्रशब्देतत्तेरत
थात्वेपिनैर्पादेरेवतथात्वेनकारणत्वमित्याहुः तन्न दंडसं
युक्तचक्रत्वेनकारणत्वेसहकार्युच्छेदापत्तेः अन्वयव्यतिरेकतौ
त्वेनोभयस्यापिहेतुत्वंविनिगमकाभावादित्यस्यापितुल्यत्वात्
यद्धर्मभवगस्यैवयत्रयदवगमस्तत्रतस्यतदवच्छेदकत्वात् प्रति
बंधकाभावमनवगम्यापिवह्नेर्दाहहेतुत्वावगमात् अन्यथा
शक्तिस्वीकारेपित्वदुक्तोदोषःस्यादित्याह नचेदेवमिति त
दभावेविपरीतधर्म्मांतराभावे पूर्वमिति निसेनिसेनसा
शक्तिरनिसेभावहेतुजेतिपराभ्युपगमादित्यर्थः विजातीय
ष्विति शक्त्यानुकूतशक्त्यंतरपरंपरानुसरणेऽनवस्थानंवे
त्तिभावः तदनुत्पादेति प्रतिबंधकेनशक्तिनाशादुत्तंभ
केनप्रतिबंधकशक्तिनाशेपिपुनर्वह्नौशक्तिर्नस्यात् पू
र्वस्यानाशादन्यस्याश्चहेतोरभावादित्यर्थः नन्वनुमानमस्तु
शक्तौमानं तथाहि कारणानिस्वजन्यानुकूताद्दिक्षभावंस्र।
तातींद्रियधर्म्मवंति कारणत्वात् आत्मवत् तच्चादृष्यंत
थाप्रसिद्धं नचात्मत्वमुपाधिः अंत्यशब्दध्वंसकारणकाता

काशयोः साध्याव्यापकत्वात् तत्रासंशब्दस्यैव तथात्वादिति
सामान्यतः विशिष्यतु पिंडीभूतो वह्निः कार्यानुकूलताद्धिस्यातीं
द्रियधर्मसमवायी जनकत्वात् आत्मवत् नचात्मत्वं नित्यत्वं
चोपाधिः स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात् क
रवह्निसंयोगो वा पक्षः नचात्मत्वं द्रव्यत्वं वोपाधिः द्व्यणु
केकत्वस्पर्शादौ साध्याव्यापकत्वात् मण्यादिसमवहितो वा व
ह्निर्दाहजनकदशायां वृत्तिदाहानुकूतभावभूतधर्मशून्यः दा
हाजनकत्वात् दाह्यासंयुक्ताग्निवत् अत्रानुकूलत्वं नस्थि
तिस्थापकेनार्थान्तरवारणाय तत्र तदभावात् क्रियापावेगे
नादृष्टस्यदात्मसंयोगेनवोपपत्तेः किंतु तथाभूतो धर्मः सिध्यति
सेतदर्थं तत्त्वकारणतावच्छेदकसाधारणं निरुक्तं अदृष्टस्यव
दात्मसंयोगवारणार्थमपि द्वेति नच तज्जनकत्वे मानाभा
वः कार्यस्यादृष्टजन्यतयाव्यधिकरणगुणजन्यत्वात् तस्य
च तत्समानाधिकरणगुणजन्यत्वव्याप्यत्वात् स्पर्शवद्वेगवद्
व्याभिघातजन्यक्रियायां तथादर्शनात् उष्णस्पर्शव्यावर्त्तना
यातीन्द्रियेति तत्त्वं तु साक्षात्कारनियामकप्रत्यासत्त्यनाश्रय
त्वं प्रतिबंधकाभावनिवारणाय भावभूतेति उच्यते अनुमा
नानां विपक्षबाधकाभावेनाप्रयोजकत्वे उभयसिद्धप्रतिबंध
काभावेनैवोपपत्तेः नच सहचारदर्शनव्यभिचारादर्शनाभ्या
मेव व्याप्तिग्रहः साध्ये शंक्यतिरिक्तविशेषणान्तैनैवाहेतुना
तत्सिद्धावेवं तत्तदतिरिक्तविशेषणपरंपरातत्सादृशानंतधर्मा
सिद्ध्यापत्तेः नच घटवत्क्षितिः क्षितिवत् घट इतीश्वरानंसवद्ध

कु॰ व॰
२७
27

क्यानंत्यं कार्यमात्रेणेश्वरत्वेनद्धि कर्तृकत्वेनवाकारणता गौ
रवात् किंतुकर्तृत्वेनेतितदापादकाभावात् प्रतिकूलतर्कप्र
तिघातश्च शक्तेर्भावहेतुजन्यत्वेनशक्त्यनुकूलाप्यन्याशक्ति
रेवं तत्तदनुकूलाप्यन्यान्येत्यनवस्थापातात् भावभूतेतिचव्य
र्थे नव्यापकेनव्यर्थविशेषणता व्याप्यताग्राहकद्रव्याप
कताग्राहकेपिताघवस्यसहकारित्वात् द्वितीयाद्यनुमानेषु
बहिरिंद्रियाग्रह्यत्वमुपाधिः तुल्ययोगक्षेमत्वेपिसंदिग्धो
पाधित्वात् अस्मत्सित्वरणास्तु जनकत्वस्यकेवलान्वयित्वेन
व्यतिरेकाप्रसिद्ध्यानान्वयव्यतिरेकित्वं नचशक्तावेवतत्प्रसि
द्धिरन्योन्याश्रयात् नापियंडापूर्वेपरद्विसंख्ययोस्तत्प्रसिद्धिः
अप्रत्यक्षयोः शब्दैकवेद्ययोस्तयोर्व्याप्तिग्राहकेणाप्रत्यक्षे
णसाध्यहेतुव्यतिरेकस्यग्रहीतुमशक्यत्वादित्याहुः प्रोक्षण
जन्यः कालांतरकार्यानुकूलतातींद्रियोधर्मोस्तीत्युभयसिद्धं
सवव्रीहिसमवेतोनवेतिनाधेयशक्तौसंशयः यथेप्रथमंसं
स्कारसाधनस्यार्थांतरतापत्तेः किंतुप्रोक्षणंव्रीहिनिष्ठातींद्रि
यधर्मजनकंनवा व्रीहिगुरुत्वजनकेतज्जनकत्वप्रसिद्धं त
त्राधायकंशक्तावाह दृश्यतेहीति ननुव्रीहीन्प्रोक्षतीत्ये
तावन्मात्रंश्रूयतेनतुप्रोक्षणस्यसंस्काराधायकत्वमपीत्य
तआह कथमिति कालांतरेवघातादौप्रोक्षितस्यैवव्रीहे
र्विनियोगोनस्यादित्यवश्यंप्रोक्षणाजन्यः संस्कारोव्रीहिनि
ष्ठः स्थिरोभ्युपगंतव्यइत्यर्थः नन्ववघातादौकथंप्रोक्षि
तस्यैवव्रीहेरन्वयः व्रीहीनवहंतीत्यस्यव्रीहिमात्रान्वयेप्युप

पत्तेः अथावघाते व्रीहिविशेषाकांक्षायां प्रोक्षितानामेवान्वयः व्य
क्तिवचनानां संनिहितविशेषपरत्वमिति न्यायात् अन्यथा प्र
करणोपस्थितत्यागेनतदन्योपस्थितिकल्पनेवगौरवमितिचेत् त
र्ह्येकस्य द्रूपं यत्रप्रोक्षणं तत्रावघातो नतु प्रोक्षणविशिष्टेष्ववघा
त इति तस्य कारणत्वाज्ञानान्न तज्जन्यातिशयकल्पनं प्रोक्षिता
व्रीहयोवघातापकल्प्यंत इतिवाक्यशेषादितिचेत् न तेनाप्यतो
न प्रोक्षणे व्रीहावववघातान्वयो बोध्यत इति प्रोक्षण ध्वंसस्य हेतुता
पत्तेः मैवं प्रोक्षणं अवघातजनकं प्रमाणतस्तदर्थमुपादी
यमानत्वात् व्रीहिवत् नच हेतुत्वसिद्धिः अप्रोक्षितेवघातासं
भवादितिभावः यतावतातज्जन्यव्यापारमात्रसिद्धावपि नस्यसंस्का
रः सिध्येत् ध्वंसेनैवोपपत्तेरिताशंकां निराकरोति नापीति तेषा
मिति ननु ध्वंसव्यापारत्ववादिनां व्यापारस्य यावत्फलं फलतोत्पादक
ताऽप्रसिद्धिः नच व्यापारकालस्य फलपूर्वकालत्वनियमेनफलता
नंत्यापत्तिः तुन्नरकातीनकीर्त्तनादिनाश्यापूर्वे व्यभिचारात् मै
वं विवादास्पदीभूतः कालोयदि चैत्रस्वर्गान्तरत्वेसति तत्स्वर्गज
नकयागव्यापारवान् स्यात्तत्स्वर्गाधारः स्यादित्यापादनार्थत्वात्
अपूर्वेति प्रतिनियतकालावच्छिन्नस्वर्गजनकस्वभावत्वादित्य
र्थः तुल्यमिति तर्हि तद्ध्वंसस्यापि सपक्षस्वभावइत्यग्रेसन्नपि स्व
र्गोत्पादक इत्यर्थः अथनयागध्वंसो व्यापारः प्रतियोगध्वंस
योरेकत्राजनकत्वादुपजीव्ययागकारणभंगापत्तेः प्रस्तुतप्र
तिबंधकतापत्तेः कारणीभूताभावप्रतियोगित्वादितिमतं तद
पितुल्यमितिभावः स्यादेतदिति यथान्यत्रातीतेनाप्युपत

क्षणेनोपलक्ष्यव्याप्तिबुद्धिस्तथाप्रोक्षणेनापिव्रीहेरितितादृशा
नामेवोपयोगोन्यथासिद्धइत्यर्थः नाहीति अन्यत्राप्युपलक्ष
येनोपलक्ष्यस्यव्यावृत्तबोधोनजन्यते स्वरूपव्यापारयोरसत्त्वा
त् किंतुतज्ज्ञानेनेत्यर्थः नहिज्ञानमेवतज्जन्यंस्यादित्यतआ
ह तज्ज्ञानमपीति ननुस्वकारणमपितद्देवेत्यतआह नति
ति अनुत्पादितव्यापारध्वस्तेनेत्यर्थः तत्रापीति उपलक्षणा
भिमतेपीत्यर्थः स्रगादिस्तन्निर्म्मितोदृष्टान्तः स्वगुणाकृष्टा
इति स्वगुणसहकारिणइत्यर्थः स्वगुणोत्पादितादितिवा
आद्ये इष्टेति अंत्यमाशंक्यानिराकरोति नापीति उपलक्ष
णैरिति जन्मांतरज्ञानेच्छाप्रयत्नैरित्यर्थः सिद्धसाधनपरम
त्रेष्टहानिपरं यथाश्रुतेपसिद्धान्तप्रसंगात् तस्मादिति य
द्यपिपुरुषनिष्ठातिशयेनसिद्धसाधनं तथापिव्रीह्यादिगते
निसाध्यंविशेषणीयं योयदुद्देशेनोपादीयतेसतत्रातिशय
जनकइतिव्याप्तिरितिसंप्रदायविदः अस्खलितचरणास्तुसो
तिशयोताद्यवात्फलसमानाधिकरणइतिव्रीहिनिष्ठपव-
तेननत्वमवहितत्वंव्रीहेः साक्षात्संबंधात्पुरुषनिष्ठत्वेवव्रीही
णांसाक्षात्संबंधाभावात् परंपरासंबंधेतुगौरवं नचविहि
तत्वेनपुरुषनिष्ठइतिशयजनकत्वमनुमेयं अप्रयोजकत्वा
त् चिकित्सादिनाव्यभिचाराच्चेत्याहुः दृष्टांतस्यसाध्यवैकल्य
मपाकरोति अन्यथेति प्रोक्षणादिजन्यातिशयसिद्धावपितस्य
व्रीहिनिष्ठतानसिध्यतीत्याह संस्कारइति प्रतिशयधर्म्मि
ग्राहकमानादेवलाघवसहकृतात्मपकपक्षसिध्यतिपुरुनि

निश्चयश्च तथाहि व्रीहिगतत्वेनतावत्सकतव्रीहिनिश्चयकपव·
पकव्रीहिनाशेतन्नाशापत्तेः नचयावदाश्रयनाशेतन्नाशःताद्य
वदाश्रयनाशस्यैवतंत्रत्वात् वृक्षादौकिंविदाश्रयनाशात्तन्ना
शेपिखंडपटन्यायेनपुनरुत्पत्तिरित्यनेकोवाच्यः नचैवमेकव्रा
हिनाशेफलानुदयस्तावत्संस्काराणामभावादितिवाच्यं संस्का
रत्वेनैवप्रयोजकत्वात् किंचित्तत्समवधानेपिदंडादिवत्कार्य
सत्वादितिगौरवं नचविनिगमकाभावः प्रोक्षणमपूर्वजन
कंदृष्टद्वाराभावेसतिकालांतरभाविफलजनकतयाविहितत्वात्
·यागवत् नचाप्रयोजकत्वंयागादीनामपूर्वजनकतायामुक्तरूप
स्यैवप्रयोजकत्वात् अन्यथाननुगतत्वादितिभावः कृष्यादि
नाव्यभिचारंभावंपरोक्तदृष्टांतस्यासिद्धिंवाह स्वगुणपूति अ
त्रदृष्टद्वारस्यैवसंभवान्नव्यभिचारोनवातत्रपरमाणावतिश
यइतिदृष्टांतःसाध्यविकलइत्यर्थः यद्यपिपाकजरूपादयोपि
तन्निष्ठातिशयापर्वेतिनसाध्यवैकल्यंतथाप्याधेयशक्त्यभावमा
त्रेतात्पर्यं नचाधेयशक्तिपाकजयोरतीन्द्रियत्वाविशेषात्ततः
कल्पनायामविशेषः परमाणवदावयविरूपादिसजातीयपा
कजरूपाद्युत्पत्तेरावश्यकत्वात्तत्रैवनियतकार्यजननोपपत्तौ
शक्त्याधानकल्पनेगौरवादितिभावः योपदुद्देशेनोपादीयत
इत्यत्रपरोक्तानुमानेव्यभिचारमाह यथाहीति देवतायाःसि
द्धत्वेयथाप्रीतिभागितयोद्देश्यत्वंतथाव्यापारभागितयाव्रीहे
रपीत्यर्थः नचपक्वतफलार्थितयापाकक्रियातेतत्तद्गतमेवतद
नुकूलमतिशयंजनयतीतिव्याप्तेरनुमानंस्यादितिवाच्यंश

त्रुवधमुद्दिश्यप्रवर्तितेनश्येनयागेनअभिचारादितिभावः नन्वात्म
निष्ठसंस्कारस्यव्रीहीणांसंबंधाभावान्नमिथः सहकारित्वंस्या
दित्यतआह यथेति संस्कारवदात्मसंयोगोमेघस्येवव्रीहिर
पितुल्यइत्यर्थः नवपरंपरासंबंधेगौरवं· प्रामाणिकत्वादिति
भावः नन्वात्मनोनधिकृतस्याधिसंभवान्नतन्निष्ठः संस्कारः
संभवतीतिव्रीहिनिष्ठएवस्यादित्यतआह यथावेति कर्त्रवै
गुण्येसंस्कारोनोत्पद्यतेतस्मात्गुण्यस्यापिहेतुत्वादित्यर्थः नचा
ग्नेयप्रधानयागाद्यभावाद्यत्रप्रधानापूर्वाभावस्तत्रप्रोक्षणजन्यापू
र्वस्यकथंनाशस्तस्यभोगेतरानाश्यत्वादितिवाच्यं इतरांगपूर्ववत्तु
ल्यत्वादितिभावः बर्हिषइवेति उत्पादितांगापूर्वस्यबर्हिर्योगस्ये
वविनियुक्तविनियोगविनियोगविरोधादित्यर्थः यद्वा· बर्हिस्तृ
णातिबर्हिषिहविरासादयतीतिवचनाद्यथाबर्हिषः पुनरुपयो
गोनतथाव्रीहेरितिव्यतिरेकेदृष्टांतः ननुव्रीहिभिर्यजेतेति
यागसाधनत्वेनव्रीहीणांविधानात्तत्स्यादित्यतआह उपयो
गेवेति विचित्राहीतिसंस्कारमाहात्म्यमेवेदंयन्निष्ठव्यापारेण
पुरुषेव्यापारोजनितस्तस्यव्रीह्यादेःसहकारीनान्यस्येत्यर्थः वि
धेरिति व्रीहीनवहंतीतिविधेः पूर्वोक्तन्यायेनप्रोक्षितव्रीहिष्वे
वतात्पर्यादित्यर्थः प्रोक्षिताव्रीहयोवघातापकल्पंतइतिवाक्य
शेषसहकृतस्यैवविधेर्दुर्तैध्यत्वादित्यप्याहुः व्याप्रियमाणोद्दे
श्यसहकारित्वंसंस्कारस्यनासांदृष्टिकमित्याह यथावेति न
नुव्रीहीन्प्रोक्षतीतिद्वितीयाश्रुतेःक्रियाजन्यफलभागित्वं
व्रीहीणांप्रतीयते नचापूर्वस्यव्रीहिवृत्तित्वं· साक्षात्संबंधस्या

त्सर्गिकत्वादित्याह कोऽयमिति प्रोक्षणक्रियाजन्यजलसंयोगे
नधात्वर्थावच्छेदकफलेनसाक्षात्संबंधाद्व्रीहेः कर्मत्वमित्याह
प्रोक्षणादीति नवजलसंयोगस्यफलत्वेपिव्रीहिष्विभावः कपिंजल
न्यायेनव्रीहित्रयजसंयोगेनैवबहुवचनोपपत्तेः कालांतरेफलो
पादानस्यफलोद्देश्यमात्रप्रयुक्तत्वात् अन्यथाशक्त्याधानप
क्षेपितुल्यत्वात् नचविध्यपेक्षितफलभागित्वंद्वितीयार्थः तद
प्रसक्तेः ग्रामंगच्छतीत्यादौतदभावात् संयोगस्यापिविध्यपेक्षि
तत्वाच्च अन्यथातदनुपयोगापत्तेः नवजलसंयोगावच्छिन्नः क्रि
याविशेषः प्रोक्षणमितिकथंतदेकथंतदेकदेशस्यतत्साध्य
तान्वयइतिवाच्यंसंयस्योपलक्षणत्वेनापदार्थत्वात् अन्यथाप
त्रनाधेयशक्तिः शकून्प्रोक्षतीत्यादौतत्रकागतिः वस्तुतोज्ञान
विषययोरिवव्रीहिपुरुषसंस्कारयोः स्वरूपमेवसाक्षात्संबंधोन
तुसंयुक्तसमवायइतिभावः पराभिप्रेतमनुमानमुद्राव्यानैकां
तिकत्वंस्फुटयति नन्विति पुत्रेष्टीति वैश्वानरंद्वादशक
पालंचरुंनिर्वपेत्पुत्रेजातेइतिपुत्रजन्मनिमित्तकोयागः यस्या
यमर्थवादेयस्मिन्जातेएतामिष्टिंनिर्वपतिसपूतएवतेजस्वी
अन्नादइंद्रियावीपशुमान्भवतीति पितृयज्ञः पितृश्राद्धादि न
नुनताभ्यामपितत्पुत्रगतमेवापूर्वंजन्यतेविहितक्रियायायापाग
स्यैवकर्तृगतापूर्वजनकत्वात् नचमुक्तेकर्त्तरितददृष्टनाश
सुत्रादौफलायुक्तिरितिवाच्यम् अदृष्टस्यफलनाश्यतयापुत्रा
दिफलाभावेनादृष्टस्यानाशात् अत्राहुः फलोपधायकमपूर्वं
कल्प्यतेफलाश्रयेतस्यप्रथमोपस्थितत्वेनोस्वरूपसतोदोषस्या

गस्यवैगुण्यात् अत्रकिंविकरत्वमात्रंवासाध्यं अतींद्रियत्वे
नविशेषितंवा· आद्येसंयोगजननेनसिद्धसाधनं अंत्ये· वह्नाव
पूर्वेहेतुहविःसंयोगजनकेनहविस्त्यागेस्येनानैकांतिकमित्याह
हविरिति किंवानेति प्राभाकरंप्रत्यनैकांतिकं भाट्टानांप्रमेये
ज्ञातताजननात् कृषीति प्रोक्षणवदपूर्वद्वारैवानागतका
र्यहेतुःस्यातामित्यर्थः इत्येनैवेति साकजानामावश्यकतया
ततएवनियतकार्योपपत्तेरित्यर्थः ननुबीजपूरतात्सारसाव
सेकस्याश्वतरविनाशिनः कांतांतरीयारुणपुष्पजनकत्वंत
दाधेयशक्त्याविनानविर्वहतीत्यतआह तथाचेति तत्रापि
तत्साहित्येनोत्पन्नयोकजादेरावश्यकत्वात्तयेत्यर्थः अत
एवश्वात्यादिनियतकार्यान्यथानुपपत्त्यापरमाणावपिनतत्क
ल्पनमित्याह अतएवेति कार्यसजातीययाकजवत्वंपरमा।
णूनामावश्यकमितिनतत्कल्पनंयेनकल्पनाप्यामविशेषः
स्यादित्याह· नह्यस्तीति शीतमित्युपष्टंभकजताभिप्रायं
सौरभशैत्ययोरेकाधारत्वाभावात् आद्यातिशयोद्युत्युक्तं·
अंत्यातिशयोकुरादिरित्यात्राभेदेनान्वयः अंत्यातिशयोवां
कुरादिरितियावत् अंत्यातिशयोकुरसमवायिकारणमित्यर्थः
यद्वा आद्यातिशयोवीजस्योछूनत्वं अंत्यातिशयोवीजस्या
छूनतरत्व· प्रलयेकार्यद्रव्याभावेपिपरमाणुषुनियतकार्यो
न्नीतस्वभावानांपाकजानामामन्यद्द्रव्यस्यैवसद्भावात्ततएव
सर्गादावपिनियमइत्याह कल्पादाविति उपसंपादनं· सह
कारिसमवधानोत्पादनं नचेति यद्यस्मदादिव्यापारंवि

नापिसर्गादावंकुरोत्पत्तिरिति शेषः यतइति यद्यपिकृष्यादि
हेतवदृष्टस्यैवप्रतिबंधकत्वमुन्नीयते यद्वा· सर्गाद्यंकुरविजा
तीयएवेदानीमंकुरोयस्यकृष्याद्यपेक्षा· अतएववैजात्याभावेदू
षणमाह अव्यवस्थेति व्यभिचारेणकृष्यादीनांकारणत्वव्य
वस्थैवनस्यादित्यर्थः यद्वा·भोगानियमप्रसंगाद्वेत्यर्थः अदृष्टा
नीति कृष्यादिजन्यांकुरेकारणमदृष्टंदृष्टस्यकृष्यादिद्वारैवहेतु
रित्यर्थः संस्थानेति संस्थानपदंसंयोगमात्रपरंपरमाणावप
वसंयोगाभावादित्येके क्वचित्पाकविशेषंक्वचित्परंपराजन्यस
मानजातीयरूपादौशरावादौसंस्थानविशेषमपेक्षंतेपरमाण
वइत्यन्ये एतच्चोभयमुपलक्षणं· तुल्यपाकजसंस्थानेब्राह्म
णादावदृष्टविशेषस्यापितैरपेक्षणात् नर्हिपाकजोत्पत्त्यर्थ
मेवशक्तिरभ्युपेयेतेत्यत आह तेनेति ननुहारीतमांसंहरिद्रा
जतावसिक्तंहरिद्रानलसाधितंभोक्तारंव्यापादयतीत्युभयवा
दिसिद्धंतत्रावश्यंतेनशक्तिराधेया नचाधश्यकत्वात्साकजा
देवोपपत्तिः· तस्ययतातानलसाधितस्याव्यापादनेनानैकांति
कत्वादित्यत आह निमित्तेति पाकजमात्रंनहेतुः किंतुनिमि
त्तभेदेनासादितः पाकजविशेषइत्यर्थः अग्नेःसहकारित्व
मुक्त्वासौरालोकेतदाह दशरात्रेति ताम्रपात्रइत्यनेनपाक
जविशेषस्यप्रत्यक्षत्वंवदताशक्त्यपेक्षपातत्रविनिगमकमुक्तं
उद्भवानुद्भवौविशेषगुणौप्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकौत
द्व्यत्तिजातिविशेषौपाकजत्वव्याप्यांतरविरहेणानुपपत्त्याशक्तिरा
स्थेयेत्यत आह पार्थिवेति नन्वन्यधर्म्मस्यान्यत्रसह

कु०वं०
३१
31

कारित्वं यथायाच्ञायदानेधिकंपुण्यं धर्म्मविशेषवत्त्वस्यपात्र।
त्वादित्यत आह उपयोगेवेति यजमानधर्म्मस्यभोगादिना।
स्येपूजकस्यधर्म्मानुसारप्रसंगाच्च तत्त्वेचांडालादिस्पर्शेने
नापूज्यत्वाच्चेतिभावः निमित्तभेदेति यद्यप्युद्भूतानुद्भूतपरमा
णुरूपादेवतत्कार्येरूपमुद्भूतमनुद्भूतंचोत्पद्यतइतिनिमित्तभेद
स्तत्राप्रयोजकः तथापिसाक्षात्कारं प्रयोजकतयोद्भवत्वक
ल्पनात् परमाणुगुणेषुतदभावात्तन्नास्तीत्यदृष्टविशेषादे
वानुद्भूतरूपादप्युद्भूतरूपंजायतइत्युपपेयं नचयाऽवयवि
रूपत्ववृत्तिजातिःसापरमाणुरूपवृत्तिरितिव्याप्तिः चित्रत्वजा
तौव्यभिचारात् उद्भवानुद्भवादयश्चसतद्गुणसंविज्ञानबहुव्रीहि
णाकठिनकरकाविद्युदादीनांसंग्रहइत्यप्याहुः देवताद्युत्सा
राधनीयतामासादयतीत्यध्याहार्यं उपनायकेति परमाणु
क्रियाजनकमदृष्टमित्यर्थः अहंकारेति नचदेवतानांविशे
षदर्शनत्वान्नममइतिवाच्यं अभिमानिनीत्यनेनाहार्यारोप
रूपस्यदर्शितत्वात् ज्ञानस्यनाशेपितज्जन्यसंस्कारसत्वात् अ
स्पृश्यस्पर्शादिनातन्नाशात् अचेतनदेवतापक्षेत्वाह अंशे
षांत्विति आद्यपूजायांनपूजितप्रत्यभिज्ञानमित्यतउक्तं प्रति
ष्ठितेति अत्राप्यस्पृश्यस्पर्शनादिसंसर्गाभावसहकृतस्ये
तिद्रष्टव्यं प्रतिष्ठितंपूजयेदितिविधिवत्तात्तज्ज्ञानस्यावश्य
कत्वात् अतएवतदभावेपूजानिःफलैवेतिभावः घटःतुल्य
नहीति सामग्रीपरीक्षासामग्री अवनतिहेतोर्दृष्टस्यादृ
ष्टस्यचाविघटनेसदैवोन्नमनप्रसंगादित्यर्थः तस्माद्भूतार्थे

परिच्छेदिकाशक्तिस्तुतादिसामग्रीजन्येत्यभ्युपेयमिति भावः ज
येतरेति जयभंगनिमित्तस्य परीक्षात्मसमवेतस्यादृष्टस्य वृत्तिः
स्वकार्यजननाभिमुख्यं तल्लाभायेवेत्यर्थः यद्यपीति पापवानपु
ण्यवान्वायमनेन विधिना तु तामारूढ इति यद्देवताज्ञानं स
एव देवतासन्निधिरतः परीक्षाविधेर विशेषे पि कर्मोन्नाय
कं नमनादिकं लिंगमभिव्यंजयति देवता· तादृशं च ज्ञानं न परी
क्षाविधिं विनेति सोपि प्रयोजक इत्यर्थः परविप्रतिपत्तिर्देव
तावैतन्ये सोहमिति ननु यत्र पापविस्मरणादिना पापवत्त्वप्र
त्यभिज्ञानं तत्र न कुतो जयः न वस्तुतस्तादृशं प्रत्यभिज्ञानं जय
हेतुः· तथापि भंगहेतुपापवत्त्वप्रत्यभिज्ञानाभावेन भंगानुप
पत्तेः नच स्वरूपसदेव पापवत्त्वं भंगहेतुस्तस्यैव प्रयोजकत्वे परी
क्षाविधेरनत्वापत्तेः मैवं पापतदभावयोः स्वरूपसत्वे सति।
योहं पापवत्त्वादिनासंदिह्यमानः सोहमनेन विधिना तु तामारू
ढ इति प्रत्यभिज्ञानस्य तंत्रत्वात्· तच्च न परीक्षाविधिं विनेति तस्या
पितत्वात् यत्र तु सभाक्षोभादिना तादृशप्रत्यभिज्ञानाभावस्त
त्र गत्यंतरमाह आप्रथवेति तेनं परीक्षाविधिना ननु तादृशवि
धिवाक्याभावात्परीक्षाविधेर्द्धर्मजनकत्वे मानाभाव इत्यत
आह निमित्तत इति साक्षात्तादृशविधिवाक्याभावेप्यभिश
पनिमित्तकत्वात्परीक्षाविधेरितरनैमित्तिकवदभिशप्तः सम्प्र
प्रतिज्ञो जयकामस्तु तामारोहेदिति विधिकल्पनमित्यर्थः वि
जयेति कालांतरभाविजयसाधनतानुपपत्तेरपूर्वकल्प्या।
नान्वेत्यर्थः पराजयेति भंगतत्क्षणानिष्टफलसाधनत्वेन

कु०वृ०
३२
32

निषेधविधेरुन्नयनात् भंगफलश्रुतेश्चाधर्म्मजनकत्वंकल्प
तइत्यर्थः यद्यपितुलारोहरणादेरधर्म्मजनकत्वेमानाभावः
पूर्व्वोधर्म्मोदेवावनमनोतत्रेत्वयापिपरीक्षाविधिंविनावनम
नेपिभंगाभावान्नियमेनतस्याधर्म्महेतुत्वं जल्पकथामाश्रि
त्यैवइति अथेति उत्तरं नेति शक्तिपदार्थमेवननिषेधा
मइत्यर्थः तर्हिशक्तिस्वीकारएवस्यादित्यभिप्रेत्याह कोसाविति
पूर्व्वकालेति ननुपूर्वकालत्वंप्रागभावावच्छिन्नकालत्वंप्रागभा
वनप्रतियोगिजनकोभावः अन्योन्याश्रयात् नापिविनाश्य
भावः नाश्यप्रागभावनिरूप्यत्वात् उत्पत्तिमानभावोध्वंसइ
तिचेत् कासावुत्पत्तिः आद्यसमयसंबंधः सइतिचेत् किमा
द्यत्वं स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारस
मयसंबंधइतिचेत् न परस्पराश्रयात् नापिप्रतियोगय
त्नानतिरिक्तकालीनावधिकसामयिकयावत्परत्वाश्रयस
मानकालीनः कादाचित्कोभावः प्रागभावः प्रलयकालपरमा
णुक्रियाप्रागभावाव्याप्तेः नचतदापिब्रह्मांडांतरवर्त्तिद्रव्येणा
परत्वाश्रयेणपरत्वनिरूपणं तस्यविशिष्याज्ञानात् नियत
त्वमपिव्यक्त्यपेक्षया जात्यपेक्षयावा नाद्यः वह्निव्यक्तेः पूर्व
रासभस्यापिभावात् अतएवनांत्यः नहिक्वापिवह्निजा
तीयपूर्व्वकालेनरासभसत्वं देशतोनियमइति चेत् सोपि
संयोगीसमवायीवा प्रत्यासन्नमात्रंवा आद्येगुरुत्वादीना
मकारणत्वप्रसंगः द्वितीयेधूमंप्रतिवह्नेरकारणत्वप्रसं
गः तयोरेकदेशसमवायित्वाभावात् अंत्येव्योम्नः का

र्यमात्रे कारणत्वापत्तिः अनन्यथासिद्धत्वे सतीतिचेत् नका
रणेत्तरत्वेन तत्सिद्धेः कारणत्वज्ञानापेक्षितत्वात् नापिका
र्याभावव्यापकाभावसम्बंधैकदेशप्रतियोगित्वंकारणत्वं ध्वो
मादेः सर्व्वकार्येतत्वापत्तेः नापिसामग्र्येकदेशत्वं कारणस
मूहस्यसामग्रीत्वात् उच्यते गंधानधिकरणकालावृत्तिरभा
वः प्रागभावः नचतत्रमानाभावः गंधत्वं स्वाधिकरणानधिक
रणकालवृत्तिः कार्यमात्रवृत्तिजातित्वात् पटत्ववत् सा एवस
र्वमुक्तिकातः अन्यथासिद्धिश्चपंचधायिनसहैवयस्यकंप्रति
पूर्व्ववर्त्तित्वज्ञानंयथाघटंप्रतिदंडरूपस्य अन्यंप्रतिपूर्व्ववर्त्तित्वज्ञा
तएवयस्ययंप्रतिपूर्व्ववर्त्तित्वज्ञानंयथाशब्दंप्रतिपूर्व्ववर्त्तित्वज्ञात
एवघटंप्रसाकाशस्य अन्यत्रक्लृप्तपूर्व्ववर्त्तिनएवकार्यसंभवेतत्स
हकृतत्वं यथागंधवतिगंधानुत्पादादिगंधंप्रतिगंधकादाचित्का
भावस्यनियतपूर्व्ववर्त्तित्वकस्यनादिगंधप्रतियोगिकजन्यतेन्द्रयप्रागभा
वादीनां यत्रवजन्यपूर्व्वभावेज्ञातेजनकस्यपूर्व्वभावोज्ञायतेतत्र
जन्येनजनकमन्यथासिद्धं यथाकुंभकारेणकुंभप्रतितत्पिता य
माद्यैवयस्यान्वयव्यतिरेकौतेनतदन्यथासिद्धं यथादंडेनदंड
त्वं पतावदन्यथासिद्धभावेयस्यनियतपूर्व्ववर्त्तित्वंतत्कारणं सा
हकारीति नचत्रामाश्रयः कारणत्वादेवसहकारित्वस्य प्रयु
क्तत्वंचनजन्यत्वं प्रागभावस्याजन्यत्वात् नापिजनकत्वमसंभ
वात् नापिव्यापकत्वं शितोष्णकतेपितादृशाभावस्यसत्वेनत
त्रातिव्याप्तेः नापिव्याप्यत्वं कार्यसंसर्गाभावमात्रस्यसहका
र्यभावाव्याप्यत्वात् शिसादौकार्याभावेसत्यपिसहकार्यभा

कु०वृ०

३३

33

वस्यासत्वात् नचकार्यप्रागभावस्तद्व्याप्यः· निमित्तासमवायिनोः
कार्यप्रागभावाभावेनतद्व्याप्तेः इच्यते यस्यकार्याभावव्याप्य
त्वंइतराभावावच्छिन्नंतत्कारणं वीजेंकुराभावव्याप्यतानवीज
त्वेनावच्छिद्यते· इतरसमवधानेसतिवीजादंकुरसत्वात् किंति
तराभाववत्वेनावच्छिद्यते इतराभावेवीजेंकुराभावनियमात्· शि
तायांतुतच्छितात्वेनैवावच्छिद्यते यद्वा· अन्यासमवधानावच्छि
न्नकार्येतुसतिव्याप्यत्वंकारणत्वं रासभादेश्चात्वतएवकार्या
भावव्याप्यतयाऽन्यासमवधानवैयर्थ्येनानवच्छेदकत्वादिति
ततोधिकेतिकारणस्योभयसिद्धत्वात्तदन्यशक्तिनिषेधकंकिमि
त्यर्थः अनुग्राहकत्वेति कारणत्वस्यशक्तिपदवाच्यत्वेप्यनुग्रा
हकत्वस्यकारणत्वसहकारिसाधारणत्वात्ततः सहकारिष्वपिश
क्तिपदप्रयोग यत्सन्निधाननियतंकार्यंतस्यैवानुग्राहकत्वादि
त्यर्थः ततइति मंत्रादिप्रयोगेकिंभावरूपोनुग्राहकोनास्त्यभा
वरूपोवेतिविप्रतिपत्त्याकथायामभावस्यानुग्राहकत्वेप्युत्सादि
तेक्वान्यत्रप्रमाणंवाच्यमित्यर्थः भोक्तॄणामिति भोक्तृप्रसा
सत्तेरविशेषात् किंचिच्छरीरंकस्यचिदेवभोगंजनयतीतिप्रति
नियतभोगान्यथानुपपत्त्याप्रतिनियतंभोक्तृकर्मोपार्जितत्वं
शरीरादावभ्युपेयमित्यर्थः विशिष्येत्यभ्युपगमवादः असाधा
रणइति प्रतिनियतभोगजनकइत्यर्थः विपर्ययेति भूतधर्म
स्यनीलादेस्तथात्वादर्शनादित्यर्थः द्वित्वादिवदिति यथाभू
तधर्म्मोद्वित्वादिर्यस्यैवापेक्षाबुद्ध्याजनितस्तस्यैवभोगजनक
स्तथाऽपूर्वमपितद्धर्मः स्यादित्यर्थः द्वित्वादेरसाधारण्यंनि

एतच्चेतनगुणोपग्रहणेनेत्याह तस्यापीति ननुभूतधर्म्मान्तरस्य साधारण्येप्यपूर्व्वतद्धर्म्मस्तत्कार्यत्वमात्रेणैवासाधारण्यं स्यादि त्याह तथापीति कार्यकारणभावमेवाह शरीरादीनामिति प्रकृतेपीति यथाशरीरादीनांचेतनगुणबुद्ध्यादिसहितानांनिपत भोगजनकत्वंतथापकृतेपितेषां तत्सहितानामेवतज्जनकत्वमस्ति तिकृतमपूर्व्वेणेत्यर्थः शरीरादेरिति नशरीराद्युत्पत्तेः पूर्व्वंबु द्ध्याद्युत्पत्तिसंभवइतितदन्यचेतनगुणापूर्व्वसिद्धिरित्यर्थः देवदत्ता द्यशरीरं स्वाव्यवहितभाक्तातवृत्तिदेवदत्तसमवेतविशेषगुणजन्यं कार्यत्वेसतितद्भोगसाधनत्वात् तन्निर्म्मितस्रग्वत् घटादीनांपक्ष समत्वान्नतैर्व्यभिचारः नचसंस्कारेणार्थान्तरं तस्यभोगजनकत्वेना कल्पनात् संस्काराजन्यत्वेनपक्षविशेषणाद्वेतिभावः ननुचेत नेननभोगोनाप्यदृष्टंतस्यकूटस्थत्वात् किंतुबुद्धाविति चेतनधर्म्म स्यनियामकत्वमयुक्तमितिसांख्यमतंदूषयन्ति एतेनेति चेतने ऽपूर्वानाधानेसाधारण्यविग्रहत्वप्रसंगेनेत्यर्थः शिष्यहितैषि तयातन्मतंप्रपंचयति एवंहीति अकारणमित्यनेनप्रकृते र्भेदः अकार्यमित्यनेनचरमपरिणतिघटादेर्भेदः ननुबुद्ध्या द्यकारणत्वेतस्यतत्रमानाभावइत्यतआह कूटस्थेति अकार णत्वादेवकूटस्यानित्यधर्म्मानाश्रयः कार्यत्वाभावान्नस्वरूप तोनाशोऽकारणत्वाच्चकार्यकारणयोस्तादात्म्यतयापिननाशो ऽतएवापूर्व्वंनतस्यगुणः चैतन्यस्वरूपत्वमपिधर्म्मधर्म्मिणोस्ता दात्म्यात्कूटस्थत्वेनचैतन्येनचनिरूप्यतइतिनतत्रमानाभावइत्यर्थः बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्यातत्कल्पनमितिभावः

कु०वृ० ३५ 35

आत्मनोऽकारणत्वेपि समुपाधारयति आदीति आदिपदान्म
हदादिव्यवच्छेदः तस्य प्रकृत्यनंतरमुत्पादात् कारणमिति पुरु
षव्यवच्छेदः पुरुषाद्भेदकमाह अचेतनेति अत्रहेतुमाह परि
णामिनीति अनित्यधर्म्माश्रयः ततः कार्यधर्म्मात्मतयाना
त्यतिततो घटादिवदचेतनेत्यर्थः ततइति प्रकृतेर्महत्तत्वमंतः
करणं बुद्ध्याख्यं प्रकृतेर्महान्महतोऽहंकारस्तस्मात्पंचतन्मात्रमि
तिसांख्याः ननुकिमर्थंमहदादिसर्गोमंतव्यानि सर्वै तन्यमेवविष
यप्रकाशस्वरूपमस्त्वित्यतआह नहीति चितिः पुरुषचैतन्यं
विषयबंधनं विषयावच्छेदः चैतन्यविषयावच्छेदस्येत्यानित्या
यतश्चिद्रूपस्य हेतुसापेक्षत्वे हेतोरिंद्रियादेरंगीकारापत्तिरितिनि
रपेक्षतयासर्वदातत्स्वभावादनिर्मोक्षः पुंसः स्यादित्यर्थः। तर्हि
प्रकृतिरेवसाक्षाद्विषयबंधनस्वभावास्त्वित्यतआह नापीति
प्रकृतेः साक्षाद्विषयप्रकाशस्वभावत्वेतस्याः सदातनत्वेपुनरप्य
निर्मोक्षः पुंसः स्यादित्यर्थः। ननुविमयस्यैवचैतन्यसंबंधित्वस्वभा
वत्वयाचविषयनाशे पुंसोमोक्षः स्यादित्यतआह नापीति
विषयस्यपरंपरयाचैतन्यसंबंधिस्वभावत्वेद्वारीभूतस्येंद्रियादे
रंगीकारापत्तिरितिसाक्षात्तद्वाच्यं तथाचेदं दृश्यमिदं नदृश्यमिति
नस्यात् व्यवहितस्यापिविषयस्ययावत्सत्वमवभासप्रसंगादित्य
र्थः ननिंद्रियमात्रद्वाराविषयस्तदीयः स्यात्किंमनः कल्पनये
त्यतआह नापीति इंद्रियसंबंधेप्यासंगेनदर्शनाभावादित्य
र्थः ननुमासंगानुरोधान्मनः संयुक्तेंद्रियसंबंधविषयस्यैवचैत
न्यावच्छेदकत्वमस्तुकिमहंकारेणेत्यतआह नापीति यदी

द्रियमनोभ्यामेवविषयाः संबंध्यंते तदाशयानोनरोवराहोहमिदं प्र
येमीत्यभिमन्यते तथानरोहमिदंप्रयेमीतिनरत्वेनाप्यर्थोपधानं
स्यादस्तिहिनरत्वयत्रसन्निहितमस्तिचेंद्रिययनसोरपिव्यापारोन्य
थालोचनविकल्पयोरनुसारप्रसंगइतितद्भिन्नोहंकारोनिपतवि
षयाभिमानव्यापारोमंतव्यइत्यर्थः बुद्धितत्वंसाधयति नापीति
पूर्वेषांव्यापाराभावेपियद्व्यापाराद्दुष्टासादितद्बुद्धितत्वंकल्प्यमि
त्यर्थः उपसंहरति तद्यदिति अवस्थासुजाग्रत्स्वप्नसुषुप्तिषु
अनुभवरूपावासनासंस्कारोऽनुभववासनासांख्येस्तथास्वीकारा
त् तंदंतः करणमिति तस्मिन्नंतःकरणेवद्धिरूपे अर्थोघटा
दिरूपआरूढोज्ञानरूपतत्परिणामविषयतयासंबद्धः पुरुष
स्यात्मनउपधानीभवति उपधायकोव्यवधायकः स्वरूपतिरो
धायकइतियावत् यत्ताभ्यांपुरुषस्यसंसारापवर्गौव्यवह्रि
येतेइत्यर्थः तर्हि कर्त्तावेतनइतिकृतिचैतन्ययोः सामानाधिकर
ण्यानुभवइत्यतआह भेदाग्रहाद्वेति निःक्रियेऽकर्त्तरि तस्मि
न् बुद्धितत्वे बुद्धिपुरुषयोर्भेदाग्रहाद्वेतन्यकृत्यभिमानोयथा
भवतांगौरोहंसुखीत्यर्थः कर्म्मवासनाकर्म्मजनितमपूर्वं ननुपु
रुषधर्मएवकिंनापूर्वमित्यतआह पुरुषास्त्विति नापूर्वं
तत्कृताभ्यांनिष्पते कीटस्यापरिश्रुतेरित्यर्थः इंद्रियादीनां
मिथोभेदकमसाधारणंव्यापारमाह आलोचनमिति नि
र्विकल्पकमित्यर्थः ननुबुद्धेः कृत्यध्यवसायोनव्यापारः
कृतिविषयस्यघटादेर्जडायांबुद्धावप्रतिभासासंभवात् न
वकर्त्तव्येनघटादिनाबुद्धेः संबंधांतरमस्ति नवासंबंधेकरो

कु०वृ०

३५

35

मीत्यध्यवसायोऽतिप्रसंगादित्यत आह साहीति चेतनोपराग
बलेन स्वतो जडाया अपि बुद्धेरिन्द्रियप्रणालिकया परिणतिभे
दरूपं ज्ञानरूपः कर्तृत्वेन घटादिनां संबंध इत्यर्थः पुरुषेति बु
द्धिचेतनयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः नीलेन्द्रि
यसन्निकर्षान्नीलाकारज्ञानरूपपरिणतिभेदो याद्दृक् पारमा
र्थिको विषयोपरागः ताभ्यां कर्तृत्वविषयस्य प्रतिभासात्तज्ज
न्यः करोमीत्यध्यवसायो व्यापारावेश इत्यर्थः दर्पणस्येवेति
दर्पणप्राया बुद्धिस्तत्र मदंशस्य चैतन्यभानं दर्पणमुखभानमिव
भ्रम इत्यर्थः यत्तु बुद्धेरेव परिणामो विषयबंधनस्वभावं ज्ञानं
तत्तत्र पारमार्थिकमेवेत्याह इदमिति तदुभयेति पुरुषोप
राग विषयोपरागापन्न इत्यर्थः बुद्धितो ज्ञानोपतद्ध्वोर्भेदमाह
तत्रैवमिति विषयोपरागो विषयेन्द्रियसंबंधे बुद्धेर्विषयाकारः
परिणतिभेदोयं घट इत्यादि तेनेति तेन ज्ञानेन सह चेतनो ह
मिदानीं जानामीत्याकारो बुद्धावारोपितस्य चेतन्यस्य यः संबंधो
ऽतात्विकः सोपतद्ध्विरित्यर्थः एवं व्यवस्थिते सिद्धमर्थमाह
तदेवमिति ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्न धर्माधर्मा अपि बुद्धे
रेवेत्यर्थः संस्कारस्य सांख्यैरनभ्युपगमात् ज्ञानस्यैव स्मृतिहे
तोरनभिव्यक्तितयानुवृत्तेरिति सिनोक्तः तत्सामानाधिकरण्ये
नेति कृतिसामानाधिकरण्येनेत्यर्थः यद्यप्यहमस्यस्याप्ययो
ग्यतया न तत्सामानाधिकरण्यं न प्रत्यक्षं तथापि धार्मिकोहमि
त्यध्यवसायादुपनीतस्य प्रत्यक्षत्वमिति भावः परिणामित्वादि
ति अनित्यधर्माश्रयत्वादित्यर्थः कर्तृधर्मा इति यत्र कृति

त्वदृष्टस्यैव भोगाजनकत्वमित्यत्राविवादे कृत्याश्रयत्वश्चेतन
स्तद्भिन्ने तत्र मानाभावादित्यर्थः अन्यथेति बुद्धेर्नित्यत्वे मोक्षाभा
वः आत्मनो बुद्ध्युपधानस्यैव संसारत्वात् अनित्यत्वे च तदुत्पत्तेः पूर्वं
प्रकृतेः साधारणत्वान्नियामकाभावेन संसाराभावइत्यर्थः ननु कर्तृबु
द्धितत्त्वस्य धर्म्मानियन्तार इति सांख्याभिमतमेवेत्यत आह चेतनोपी
ति चेतनोहं करोमीत्यनुभवादित्यर्थः कर्तृत्वेपीति वह्निर्न कृत्याश्रयः
परिणामित्वाद्घटवदित्यपि स्यादित्यर्थः भाविकी· स्वाभाविकी यदि
ज्ञानाश्रयस्य कृत्याश्रयत्वेनानुभवात्तद्बाधान्नानुमानं तदा चेतनोहं क
रोमीत्यनुभवाद्बाधस्तुल्यइतिशंकोत्तराभ्यामाह दृष्टत्वादिति अचेत
नायाः प्रकृतेः कार्यबुद्धितत्त्वं कार्यकारणयोश्चतादात्म्यमिति चेतन्ये
तस्य बाधकमित्याह अचेतनेति प्रसूतेति जातमात्रस्य स्तनपा
नेप्रवृत्तिः रागजनकेष्टसाधनताज्ञानाधीनेति तदनुमानार्थं ज
न्मान्तरानुभूतव्याप्तिस्मरणमावश्यकमेवं तत्पूर्वजन्मनीत्यना
दित्वेत्यर्थः यद्यचेति यथाप्रकृतौ रागाद्यभावेपि तत्कार्ये बुद्धौ
रागादिस्तथा प्रकृतेरचैतन्येपि साचेतनास्यादित्यर्थः तथाचेति
प्रकृतौ रागादिस्वीकारे तद्भिन्नबुद्धितत्त्व एव मानाभावइत्यर्थः त
थेति प्रकृतावपि सूक्ष्मचैतन्यमित्यर्थः असिद्धइति अचेतन
कार्यत्वादित्यत्र विशेषणासिद्धिरित्यर्थः तथासतीति दृष्टचेतन
न्येतज्जन्यघटादेरपि तत्स्यादित्यर्थः रागादीति घटादेरागा
दिमद्बुद्धिजन्यत्वादित्यर्थः सौक्ष्म्यं चेति यथा तौ रागादिरिव
चैतन्यस्यापि सूक्ष्मत्वादित्यर्थः सर्वदेति पुरुषस्य निरुपाध्यव
स्थानात्मकमोक्षो न स्यात् बुद्धेर्नित्यत्वेन सदा तदुपधानादित्य

र्थः अथेति बुद्धेरनुत्पन्नापानध्वंसइतितदनुत्पत्तिकालेनियाम
काभावान्नियतबुद्ध्युत्पादएवनस्यादितिनसंसार इत्यर्थः ननुप्र
कृतेःसाधारण्येपिपूर्वध्वस्तबुद्धिवासनायोगादसाधारणीनि
यामिकास्यादित्याह पूर्वेति सांख्यनयेधर्मधर्मिणोरभेदा
दस्माकंवाश्रयनाशस्यकार्यताशकत्वाद्धर्म्मिणोनाशेनधर्म्मा
वस्थानमित्याह बुद्धीति सेक्ष्यादीति स्वस्वाबुद्धिरनुवर्त्त
तएवेतिनतन्नाशइत्यर्थः मुक्तावपीति बुद्धेःसूक्ष्मायाअनुवृत्तेः
संसारापत्तिरित्यर्थः यावत्संसारंविलीनायाअपिबुद्धेर्वासनानुवृ
त्तिनक्षणोऽधिकारोस्तिमुक्तौतुसोपिनास्तीतिनपुनःसंसारइत्या
ह निरधिकारत्वादिति यद्येवंतदासंसारिदशायांसाधिका
रामुक्तौतुसस्वभावाप्रक्षस्यजनिकाबुद्धिरेवज्ञानाधाश्रयभूता
प्रकृतिपदवाच्यास्तु कृतंप्रकृत्याद्यर्थान्तरकल्पनयेत्याह तही
ति एवंप्रकृत्यादिप्रतिपादकागमंसंगमयति सैवहीति तत्तद्व्या
पारयोगाद्धादिकारणत्वाभिमानकारणत्वादियोगात्तेनतेनप्रकृत्या
दिशब्देनबुद्धिरेकैवोच्यतइत्यर्थः शारीरेति यथैकएवशा
रीरोवायुरूर्ध्वोधोगत्यादियोगात्प्राणापानादिशब्दवाच्यइत्यर्थः
अतोपीति पूर्वंनित्यत्वेनाचेतनकार्यत्वमसिद्धमुक्तमधुनातुबु
द्धिरेवप्रकृतिपदवाच्येतिप्रकृतिकार्यत्वंबुद्धेरसिद्धमित्युच्यतइत्य
र्थः एवंसत्येकस्यक्रमेणसंसारापवर्गौसांख्यमतेनसमंजस
यति अधिकारेति वासना धर्म्मा धर्म्मौ ननुबुद्धेश्चैतन्येवे
तनकोयंस्यश्रुतिविरोधइत्यतआह धर्मेतिकोदस्यंहिनित्य
त्वंतच्चतद्धर्मस्यास्यादेविनाशेपिनधर्म्मिणस्तावित्यविरुद्धंअ

भेदे हि धर्म्मधर्म्मिणोस्तद्विरोधः स च नास्त्येवेत्यर्थः कथं नास्तीत्यत

आह भेदश्चेति अहं जानाम्यहमज्ञासिषमहं ज्ञास्यामीत्याद्यनुभवा

ज्ज्ञानातीतत्वादिमत्त्वेप्यहमात्मस्वरूपस्याबाधितेन प्रत्यक्षेणास्थैर्यानुवा

दित्यर्थः ननु धर्म्मधर्म्मिणोरत्यंतभेदोसिद्धः नीतः पट इति सामा

नाधिकरण्यबुद्धिरभिन्नभिन्नाभ्यांव्यावर्त्तमाना धर्म्मधर्म्मिणोर्भेदा

भेदौ साधयति अन्योन्याभावत्वमव्याप्यवृत्तिवृत्तिः सदातनाभावमा

त्रवृत्तिधर्म्मत्वात् अत्यंताभावत्ववदित्यनुमानमप्यत्रेत्यत आह

नवेति आद्यं सामानाधिकरण्यद्वयं भेदेपि अंत्यं त्वयं भेद एव सं

बंधमात्रमपि पद्येककारणत्वादितदाभेदेपि नोचेद्भेदपवोप

पद्यत इति नाभेदस्ततः सिध्यतीत्यर्थः अथ नीतघटयोरभेदबु

द्धिरेव सामानाधिकरण्यधीस्तदा सिद्धिः नीतः पट इति प्रतीत्यात

योः संबंधस्यैव विवपीकरणात् अन्यथा नीलिमा घट इति बुद्ध्या

पत्तिः स्यात् शब्दप्रयोगस्यापि मत्वर्थलोपाद्भेदोपचाराद्वोपपत्तेः

वस्तुतो विरुद्धयोरेकत्र भावाभावावच्छिन्नभेदेनैव प्रतीयेते न

वात्र सोस्ति अनुमानमप्यनुकूलतर्काभावेन व्याघातरूपप्रतिकूलत

र्केण च प्रतिहतमिति संक्षेपः स्यादेतदिति भूतचैतन्येपि प्रकृत

सिद्धो नित्यविभुभोक्तृनिरासपरेयं शंका नन्वेवं घटादिरपि चेतनः

स्यादित्यत आह कार्यात अन्वयेति अन्वयव्यतिरेकाभ्यां श

रीरस्य ज्ञानहेतुत्वे सिद्धे समवायिकारणमपि तदेव कल्प्यते तद

न्यस्मिन्मानाभावात् गौरोहं जानामीत्यनुभवाच्चेति भावः अ

थ शरीरस्यानुभवितृत्वे कर्तृत्वे च तन्नाशानंतरं न्यस्य प्रतिसंधात

त्वे भोक्तृत्वे वातिप्रसंग इत्यत आह कर्म्मज्ञानेति कर्म्मज्ञानाभ्यां

कु॰वृ॰
३७
37

जनितेवासने अदृष्टस्य संस्कारो यत इति यत्कायसंताने कर्म्मेत
त्कायसंताने भोगाय त्कायसंताने नुभवस्तत्कायसंताने स्मृतिरित्य
र्थः नान्यदृष्टमिति एवं बालशरीरे यानुभूतस्य स्थविरशरीरेण
स्मरणं न स्यात् तयोर्भेदात् अन्यानुभूतस्यान्येन स्मरणापत्ति
प्रसंगात् न च बाल्ययौवनयोरेकं भूतं शरीरं अयत्नमात् वि
नश्वरस्वभावत्वात् न चान्यवासनान्यत्र संक्रामत्यतिप्रसंगादि
त्यर्थः ननूपादानवासनाया उपादेये संक्रमः स्यादित्यत आह
नवेति स्थिरपक्षे परमाणूनामनुपादेयत्वात् विछिन्नकरा
दीनां च खंडावयविनं प्रत्यनुपादानत्वादित्यर्थः प्रतिदिनमिति
आहारपरिणतिविशेषस्य तद्धेतोरन्यान्यत्वादित्यर्थः ननु क
रे मे सुखं पादे मे दुःखमित्यनुभवादनुभवव्यधिकरणस्य सु
खादेरनभ्युपगमात्करादेवानुभक्तित्यादित्यत आह नापी
ति करादपाये तदनुभूतस्यास्मरणापातादित्यर्थः मात्रे
ति मातृगर्भस्थयोर्मिथः संसर्गादित्यर्थः ननूपादानं यदनुभ
वितृ तद्वासना तदुपादेये संक्रामतीति करादिवासना तदपगमे
तदुपादेये संक्रामति न च मातृभ्रूणयोस्तथात्वमित्यत आह न
वेति खंडेति अवास्थितावयवसंयोगेभ्य एव खंडावयव्युत्पाद
दित्यर्थः न च परमाणूनामेव चैतन्यं तद्गुणानामतींद्रियत्वेज्ञाना
देरतींद्रियत्वापत्तेः शरीरान्वयकारणत्वमात्रं सिध्यति न तु समवायि
कारणत्वं तदेवं विपक्षबाधकाच्छरीरं न चेतनं भूतत्वात् घटव
दित्यनुमानमपीति भावः अस्त्विति तत्र पूर्वोत्तरशरीरयोरु
पादानोपादेयभावाद्वासनासंक्रमात्स्मृतिसंधाननियम उपप

घतइति भावः क्षणिकत्वे विप्रतिपत्तिः सत्वोऽसत्त्वस्य व्यवहितो
त्तरकात वृत्तिध्वंसप्रतियोगिनवा· तत्र स्थैर्ये प्रसंगविपर्ययाभ्या
मर्थक्रियाप्रापकक्रमयौगपद्याभावात्तदभावेऽर्थक्रियाकारित्व
रूपसत्वानुपपत्तौ यत्सत्तत्क्षणिकं यथा घनः· संश्च शब्दादिरि
तिप्रयोगाभिप्रेतं मानं  ननु क्षणभंगे पूर्वक्षणिकभावादग्रिमो भा
वः सातिशयो जायते यतः कार्योत्पत्त्याद· सहकारिसाहित्यस्यै
वतद्धेतुत्वे क्षणभंगानुपपत्तेः तथा च सातिशयव्यक्त्युत्पादेऽग्र
स्थेतन्नैवमिति न तत्सिद्धिरित्यत आह  नचेति  अतिरिच्यते
तिविच्यन गृह्यते· असमर्थस्वभावत्वादित्यर्थः  किंत्विति  साह
श्यवशात्तथाभूतोपि न तथात्वेनायाततेनिश्चीयत इत्यर्थः तत्कि
मनिश्चयप्रयोजनेत्याह  कार्येति  स्थैर्ये सहकार्यपेक्षानुपपत्तेः पू
र्वापरकालयोः कार्यदर्शनादर्शनाभ्यामतिशयोऽवसीयत इत्य
र्थः  अंत्यातिशयवत्· अंत्यातिशयः सामग्रीवत्कार्यैकसमा
धिगम्यत्वान्नानुपपत्त्यैव मात्रेण निराक्रियत इति भावः प्रकृते
नसंगमयति· तथा चेति नैवं जात्यमिति  असमर्थव्यावृत्तकुर्वद्रूप
त्वं विना न तत्क्षणिकत्वमन्यथा समर्थस्यैव सतः कार्यजननाजनन
योः सहकारिसाहित्यतदभावाभ्यामेवोपपत्तेः  वैजात्ये सति क्का
प्यनुमितिर्न स्यात्· तुपस्थितं कारणगतरूपं यत्परित्यज्यानुपल
भ्यमानरूपांतरेण कारणत्वे कार्येप्युपस्थितरूपमपहायानु
पलभ्यमानरूपांतरेण कार्यशंकया कार्यकारणभावापह्नवात्
ते न वानुमाने न विना न तत्सिद्धिः क्षणिकत्वसिद्धिरित्यर्थः नच
प्रत्यक्षादेव क्षणिकत्वसिद्धिरित्याह  नाध्यक्षमिति  अध्यक्ष

निर्विकल्पकं निश्चयः सविकल्पकं क्षणिकत्वनिश्चयाभावान्नन
तु न्नेयं क्षणिकत्वनिर्विकल्पकमित्यर्थः तज्जातीयस्येति पूर्वावि
शिष्टजातीयस्येत्यर्थः तथैकेति यैव पूर्वव्यक्तिः सहकारिवै
धुर्यात्कार्यं नाकार्षीत्सैव तत्प्राप्तौ विरोधाभावादित्यर्थः ननु तज्जा
तीयापि व्यक्तिस्तदन्यैवेत्यत आह तदेति तद्यदेव पूर्वं वैकातद्वृ
त्तितदेवोत्तरकालवृत्तिताद्दृक् वैजात्यशून्यमन्यदित्यर्थः ननु
दृष्टजातीयस्य कारणं विना भवनमाकस्मिकं स्यात्तथा च कादा
चित्कत्वव्याघात इत्याह दृष्टेति (प्रयोजकं) कारणं विना कार्य
स्योक्तदोषान्न तदृष्टजातीयं विनेति तत्र कारणांतरं स्यादित्या
ह तत्रापीति न कार्यस्येति कारणविशेषप्रयोज्यं कार्यस्य
वैजात्यं दृष्टजातीयस्य च प्रयोजकांतरं योग्यानुपलब्धिबा
धितमित्यर्थः तत्किमिति कुर्वद्रूपत्वमपि कार्यं प्रति न कार
णतावच्छेदकं दृष्टस्य न चोपस्थितकारणतावच्छेदकरूपस्य प्र
योज्यांतरमिति तदपि तथेत्यर्थः न वेत्यापत्तिः तेन रूपेणा
र्थक्रियारहितत्वात् त्वन्मते प्रामाणिकत्वं न स्यादित्यर्थः अ
थ न निश्चये नोच्यते अपि तु शंक्यते तत्राह शंकात्विति ननु न
कारणवैजात्यं शक्यते येन कार्येपि वैजात्यं स्यात् किंत्वनुमा
नसिद्धं तथाहि यदियः प्रागजनकः स एवोत्तरकालमनुवर्त
र्तते तदा कथं ततः कार्यजन्म जनकस्य वा तत्र पूर्वसत्त्वे कथं पू
र्वमजननमिति कार्यजननाजननाभ्यां पूर्वोत्तरयोर्वैजात्यम
नुमीयत इति शंकते कार्येति जनकेनाजननयोरन्यथानु
पपत्तेर्नोनुपलभ्यमानवैजात्यानुमानमिति परिहरति सह

कारीति निषेधकेति साधकस्येव बाधकस्याप्यभावादित्यर्थ
ः नचानुपलब्धिरेव बाधिकेत्याह नहीति स्वभावानुपलब्धिर्यो
ग्यानुपलब्धिः वैजात्यस्यायोग्यत्वादित्यर्थः कार्येकेति सतोपि
कार्यवैजात्यस्य व्यंजकतत्कार्यानुपलब्धेर्वानुपलब्ध्युपपत्तेः का
र्यानुपलब्ध्याहि कारणं न विश्चीयते न तु तदभावो निश्चीयते व्यभि
चारादितिभावः ननु धूमकार्यदर्शनेपि न धूमवैजात्यं दृश्यते इ
त्यत आह· कार्यस्यैवेति धूमकार्यमैंद्रियकमेव यत्र नियामकं
वा दतींद्रियमपि तदस्तीति तत्प्रयोजक धूमवैजात्य शंका स्यादि
त्यर्थः अतएवेति व्यापकानुपलब्धिरपि न तन्निषेधिकेत्य
र्थः उक्तशंकया तदुत्साधनिश्चायेन व्यापकत्वानिश्चयादिति
भावः वैजात्ये जातिसंकरं बाधकांतरमाह· एवमिति विधिरूप
योरिति स्वमते· व्यावृत्तिरूपयोरिति परमते विरोधः परस्परात्यं
ताभावसमावेशो न स्यादित्यर्थः अन्यूनेति पर्यायशब्दोच्छेद
प्रसंगाद्बाधकाद्वेतिभावः प्रमाणाभावमेवाह व्यावर्त्येति· तथा
हि यथा वृक्षत्वशिंशपात्वयोर्व्यावर्त्यभेदाद्विरोधः· एकस्या वृक्ष
त्वमात्रं व्यावर्त्यं· अन्यच्च वृक्षविशेषोपि यन्नसादिः· न तथा बुद्धित्व
ज्ञानत्वयोर्व्यावर्त्यभेद इत्यर्थः ननु समाविष्टयोर्जात्योर्नैपरा
परभावनियमः· घटत्वसुवर्णत्वयोर्व्यभिचारात्· न वोच्यं भक
पार्थिवभागवृत्त्येव घटत्वं न सुवर्णवृत्तीति वाच्यं· एवमपि काष्यपा
षाणघटादावप्रतीकारात्· नापि माहे घट एव घटत्वं· अन्य
त्र तु तथाविधसंस्थानवत्त्वगुणयोगाद्गौणो घटव्यवहारः मुख्य
त्वस्य विनिर्णेतुमशक्यत्वात्· अथ संस्थानवृत्त्येव घटत्वं न तद्द्रव्य

कु०व०
३९
39

वृत्तीतिनतयोःसमावेशः।संस्थानंह्यवयववृत्तिःसंयोगएव।यु
क्तंचैतत्।कथमन्यथातस्मिन्नेवसुवर्णेतत्संस्थानसत्वासत्वाभ्यां
घटतदभावव्यवहारइति तन्न।तत्राप्यन्यतरकर्म्मजत्वादिना
संकरप्रसंगात्गुणजातेसांकर्य्यंनदोषइतिमतंनामिवीजमे
व अत्राहुः सुवर्णत्वादिव्याप्यंनानैवघटत्वं।नचैवंसुवर्णा
दिघटेष्वनुगतव्यवहारोनस्यात्।घटत्वस्यप्रत्येकंविश्रांतत्वेन
व्यक्तिस्थानीयत्वादितिवाच्यं भिन्नजातीयघटेतादृक्संस्था
नवत्त्वेनोपाधिनातथाव्यवहारात्।तर्हिसंस्थानवृत्त्यैवान्यतरक
र्म्मजत्वादिव्याप्यंनानैवघटत्वमस्तु।तन्नानात्वस्यावश्यकत्वा
त्।एतावतासंस्थानविशेषान्वयव्यतिरेकानुविधानमपिघट
व्यवहारस्यसंगच्छतइतिचेत्।नमहानीतोघटश्चलतीतिपरि
माणरूपविशेषकर्म्मसामानाधिकरण्यप्रतीतेः नचसंस्थान
गुणेतत्संभवः यद्वा।संस्थानविशेषैकार्थसमवायिद्रव्यत्वमुपा
धिर्घटत्वं ननुक्वचिदसमावेशदर्शनादस्त्वनयोर्विरोधएवेत्य
तआह परस्परेतिविरोधेक्वचित्समावेशोनस्यादन्यथाति
प्रसंगादित्यर्थः सामग्रीति गोत्वाश्वत्वव्यंजकव्यक्तिसामग्र्यो
र्विरोधादनयोरसमावेशइत्यर्थः कुतइति एतत्।विरोधस्वरू
पंसामग्र्योरेवविरोधः कुतोमानासिद्धइत्यर्थः परस्तत्रमानमाह
परस्परेति अतीन्द्रियसामग्र्योरप्यन्योन्यसहानवस्थाननियमो
नासर्वज्ञाध्यक्षगम्यइत्याहनिदमिति प्रस्तुतसामग्र्येकदेशका
तदिगादिरूपसमावेशेनयदेवगोरश्वस्यवकारणंदृष्टं।तस्यैव
पश्वजनकत्वमितिस्वरूपेणगवाश्वसामग्र्योरप्येककार्यज

नकत्वरूपः समावेशएवकल्प्यतइत्याह एकदेशेति कार्ययोरिति
कार्ययोर्विरोधात्तत्सामग्र्योर्विरोधः कल्प्यतइत्यर्थः कंपेति सो
गतेः कर्म्मणआश्रयभिन्नत्वेनास्वीकारादित्यर्थः कंपत्वशिंशपा
त्वजात्योरसमावेशः स्यात् चेत्तन्नपिप्पलशिंशपायां परस्परपरि
हारेणस्थितेरित्यर्थः दर्शनादर्शनकृतएवसमावेशासमावे
शइत्याह दृश्यतइति यथातयोरन्योन्यपरिहारेणास्थित
योरपिक्वचित्समावेशस्तथातादृश्योर्गोत्वाश्वत्वयोरपिसमावे
शः स्यादितिशंकेतेत्याह गोत्वेति गोत्वाश्वत्वयोः समावेशे
दूषणमाह तथाचेति गोत्वाश्वत्वयोः समावेशेनविरोधासिद्धेर्गो
त्वस्याश्वत्वविरुद्धस्योपलब्ध्याश्वत्वाभावानुमानं नस्यात् तथाच
कार्यलिंगकमनुमानंगतमिति प्रागुक्तं संप्रत्यनेनापिगतमित्य
र्थः क्वचिदपीति अन्यत्रसमावेशसंशयादितिभावः एवंवृक्षत्ववि
नाशिंशपानुपपत्त्यभिन्नरूपविपक्षबाधकनिश्चयं शिंशपायाकस्यस
मपिननिश्चीयेत शिंशपात्वमपिवृक्षत्वंव्यभिचरेदितिशंकायाः सत्वा
दित्याह तत्त्इति विपक्षबाधकमाह नन्वस्तीति ततः विपक्ष
बाधकं शिंशपात्वेनवृक्षत्वंसाध्यं वृक्षव्यवहारोवानुभयत्र्का
र्यकारणभावोविपक्षबाधकइत्यर्थः तथावृक्षत्वसामग्रीशिं
शपात्वंतद्व्यवहारश्चशिंशपाव्यवहारंनव्यभिचरेदित्याह एवंत
र्हीति नशिंशपासामग्र्यंतर्भूतैववृक्षत्वसामग्री किंतुतद्भिन्नैवेत्य
तआह नोदनेति नोदनादयः शिंशपाविशेषास्तद्विशेषज
नकावा इत्यमधिनास्तीत्याह यदीति तथावत्तेषां तथाभूता
नामेवशिंशपाव्यभिचारेशिंशपावृक्षव्यभिचरेदितिभावः न

नुसंतुसहकारिष्वपेक्षेषूपादानकारणेषुसत्सुसंभूयमात्रकारिणोनोद
नादयइत्यत आह अथेति भावस्यसमर्थैकस्वभावत्वेपिका
र्यकारणाकरणयोःसहकारितांभातप्रयुक्तात्वसंगतद्विपर्यययो
रभावेप्रतिबंधासिद्धेरनुमानात्कुतः क्षणिकत्वमित्याह तथाचे
ति शिंशपास्वभावभूताअपिनोदनादयआगंतुकसहकार्यनु
प्रवेशाज्जायमानाःशिंशपांविनापिभविष्यंतीत्याह स्वभावेतिय
वंत्वक्षस्वभावभूताशिंशपाआगंतुकसहकारिवशेनजायमा
नात्वक्षंविनापिस्यादितिगूढाशयआह एवंतर्हि आशयम
विद्वानाशंकते एवमिति आगंतुकाअपितद्व्याएवेत्यर्थः॥
तामेव·शिंशपासामग्रीमेवेत्यर्थः आशयमुद्घाटयति कंप
जनकाइति शिंशपाजनकानांकारणानांविशेषाः तान्
शिंशपाजनकान् वृक्षजनकाः वृक्षजनकानांकारणानां
विशेषाः तान्·वृक्षजनकानित्यर्थः तद्विशेषान्वृक्षजनकाः
एवंतर्हीति तज्जीयएवसहकारिताभावाभाभ्यांकार्यजनना
जननेइतिक्षणिकत्वमित्यर्थः वैजात्यनिराकरणमुपसंहरा
ति तस्मादिति अनेवमिति येषांनविरोधोनपरापरभावःत
षासहभावमात्रव्यवस्थितानांभूतत्वकार्यत्वमूर्त्तत्वादीनांद्रव्या
दिभावेनद्रव्यादिरूपतयोपाधित्वमात्रंनतुजातिरूपत्वमित्या
र्थः ननुद्रव्यत्वगुणत्वकर्मत्वादीनांकथमित्यत आहतेषामि
ति तेषांद्रव्यत्वादीनांकुतोनसमावेशइत्यत आह व्यक्तिभेदा
त् व्यंजकाश्रयभेदादित्यर्थः तदेवस्पष्टयति जातीनांवे
ति द्रव्यादिगतत्वेनैकाश्रयत्वाभावादित्यर्थः तथाचेति प

रापरभावाभावेन वैजात्याभावादित्यर्थः तथापित्वस्वीकारे दंड
माह वैजात्येति तथेति नीतमेनादितिवत् क्षणिकमेतदि
तिनिश्चयाभावादित्यर्थः तथाप्यध्यक्षं निर्विकल्पकं तथा।
स्यात्तथवप्रकृतसिद्धिरित्याह गृहीतेति गृहीतनिश्चयेनि
विर्विकल्पकसविकल्पकविषये तस्यनिर्विकल्पकस्यसवि
कल्पकोन्नेयत्वात्तदसिद्धौ निर्विकल्पकसत्तायांमानाभावादि
तिभावः नन्वयंघटइत्यनुभवोस्ति·सच घटइति धर्म्मिणम
यमितिवर्त्तमानत्वनिश्चयएव क्षणिकत्वनिश्चयइति तदुन्नी
तमध्यक्षमस्त्येवेत्याह नन्विति वर्त्तमानत्वं किंघटएवतद्धर्म्मो
वा·आद्येतदवच्छिन्नएवर्त्तमानः सचतस्यस्थैर्येपिसंभवति
एकक्षणात्मकत्वंतु तस्य घटस्यासिद्धमेव· अंत्ये· धर्म्मभेदेपि
नतद्धर्म्मिभेदइत्याह किमत्रेति तादृप्येणैवेत्ति द्वितीयादि
क्षणेपिप्रत्यभिज्ञानाद्वर्त्तमानत्वमेवेत्यर्थः ननुपूर्वापरा
भ्यांसदसक्षणाभ्यांसंबंधएकस्यविरुद्धइत्याह सदसदि
ति सदसद्विषयेकज्ञाने तदुभयसंबंधोयथानविरुध्यतेत
थावाह्येपीत्याह ज्ञानवदिति ज्ञाने तदुभयसंबंधएकदे
वेतिनविरुद्धः क्रमिकत्वंतुसविरुद्धइत्याह क्रमेणेति तत्संबंध
कारणक्रमादेवसोप्यविरुद्धइत्याह उपसर्प्पणेति प्रत्यप
:कारणं· तादृप्येणैवप्रत्यभिज्ञानादित्याक्षिपति प्रत्यभिज्ञा
नमिति विरुद्धधर्म्मवद्विषयकत्वादितिभावः परिहरति
अस्तीति प्रमाणत्वाप्रमाणत्वाभ्यामितिशेषः वस्तुतोविरु
द्धर्म्माध्यासाभावात्प्रमाणत्वंनिरूपितमेवेतिभावः तदने

नस्थैर्येप्रमाणमुक्तं सिद्धमिति क्षणिकत्वसंदेहेपिचार्वाकम
तसिद्धेरित्यर्थः अत्रसंदेहः स्थैर्येतद्दर्शनेवाप्रामाण्येवा-तती
येपिप्रामाण्यमात्रेप्रत्यभिज्ञानप्रामाण्येवा-नाद्यावित्याह स्थै
र्येति प्रत्यभिज्ञानुव्यवसायाभ्यांस्थैर्यतज्ज्ञाननिश्चयादि
त्यर्थः वादिविप्रतिपत्त्यासंदेहोनस्यादसिकइतिभावः नतृ
तीयः क्वचिदपिप्रामाण्याप्रसिद्ध्यानत्कोटिकसंशयस्याप्यभा
वादित्याह नप्रामाण्यइति नवतुर्थः-एकत्रक्षणेयेनविरु
द्धसंसर्गाभावेनएकत्रनिश्चयस्तेनैवस्थिरेपितन्निश्चयादित्या
ह एकतेति संदेहोपीति अनुव्यवसायमानकत्वात्तस्येत्यर्थ
ः तत्सिद्धो-संशयसिद्धौतदपि-प्रामाण्य-निश्चयस्यसंदेहा
धीनत्वात् संदेहव्यापकत्वात् तेनविनासंदेहानुपपत्तेरि
त्यर्थः यद्वा-संदेहनिश्चयस्यापितदनुव्यवसायप्रामाण्यनि
श्चयाधीनत्वादित्यर्थः संदेहार्थःसंदेहविषयः तद्दर्शने
वेति प्रामाण्यदर्शनेवेत्यर्थः प्रकृतोस्थैर्यसाधकप्रत्यभिज्ञा
ने नकिंचिदिति क्षणिकोप्येकोनस्यादित्यर्थः तुल्यमिति
क्षणिनवेति नित्यत्वेननकालतोविभुत्वेननदेशतइत्यर्थः
ननुकेवलव्यतिरेकाभावेपिशरीराद्युपहितस्यसत्त्वादित्य
तआह सोपाधेरिति तथाभूतस्येति नित्यविभोस्तदयोग्य
त्वादित्यर्थः अत्रविकल्पहेतुमाह जनितोहीति अंत्ये-व्या
पकोव्यापकोवेत्तिद्वयस्यापि पूर्ववदिति उपाधिजनकत्वग्रा
हकव्यतिरेकाभावस्तुल्यएवेत्यर्थः द्वितीयस्याद्येदोषमाह
पूर्ववदिति नित्यविभोरुपाधेरपिव्यतिरेकाभाववेत्यर्थः।

नित्यात्माप्रत्यक्षोपाधिपक्षेपिदोषमाह तथाचेति विशेष्यवति विशिष्टाभावस्यविशेषणाभावेपर्यवसानादितिभावः तद्धतः नृपाधिमातः सएवविशिष्ट एवननुविशेष्यआत्मेत्यर्थः ये नोकेनचिदिति नत्वन्वयव्यतिरेकाभ्यामेवेत्यर्थः व्यापकस्या पीत्यत्रहेतुत्वमनुषंजनीयं तन्निर्णयेहेतुमाह धर्म्मिधीरिति दृ ष्ट्यादिभिःकार्यैः समवायिकारणतयात्मादयोवगम्यंतइतिध र्म्मिग्राहकमानादेवतत्कारणत्वग्रहइत्यर्थः तेनेति कार्यव्य क्त्यनुमेयकारणव्यक्तेरन्वयवत्त्वविधानादर्शनादित्यर्थः अथ कार्यकारणव्यक्त्योरन्वयव्यतिरेकाभ्यांनतयोः कारणत्वंगृह्य ते अपितुतज्जातीयस्यान्वयव्यतिरेकाभ्यामितिस्वगुणान्प्रति घटादेरेवान्वयव्यतिरेकज्ञानेघटत्वादिकमप्रयोजकंकिंतुद्र व्यत्वमेव तर्ह्यन्वयव्यतिरेकवज्जातीयत्वंस्वगुणान्प्रति नि त्यविभोरव्याप्तीत्याह तज्जातीयेति वाधेनेति धर्म्मिग्राह कमानेनात्मादीनांस्वनिष्ठकार्यगुणेषुकारणत्वग्रहाद्वाधो न्नीतपक्षेतरत्वोपाधेर्व्याप्यभावादित्यर्थः विपक्षेति दृ ष्टांतेतथात्वदर्शनेनेपितद्रूपंनप्रयोजकंगौरवादित्यर्थः अन्यत्रतथादर्शनादित्यत्राह दर्शनमात्रेणेति ननुवाधका द्गुरोरपिप्रयोजकत्वमित्याशयेनवाधकमाह सर्वेति व्यति रेकासंभवेन्वयमात्रस्यैवकारणताग्राहकत्वेतदविशेषात्सर्वे कार्येनित्यविभोःकारणत्वप्रसंगइतिव्यतिरेकोपितत्प्रयोज कइत्यर्थः अन्वयेति रूपादिकार्यंप्रतिघटाद्यन्वयव्यतिरे कवद्दृष्टंतज्जातीयंत्मज्ञानादिकंप्रतिसमवायिकारणज्ञा

कु०वृ०
४२
42

तीयइतियावात् यद्वा अन्वयव्यतिरेकवत्तिकारणोसहकारिसा
कल्यासाकल्याभ्यां कार्यकरणाकरणे दृष्येते तद्वलमन्वयव्यति
रेकवज्ज्ञानीयत्वं नचैवमतिप्रसंगः व्योमादेर्ज्ञानासमवायित्वा
त् तथात्वे वाकाशविशेषगुणतया ज्ञानेपिश्रौतत्वप्रसंगः दि
क्कालगुणत्वेवाऽप्रत्यक्षत्वप्रसंगः अतएवतत्र कार्याजनने
सहकारिवैकल्यमतंत्रं नचैवमपिकार्यमात्रे व्योमादेर्निमि
त्तकारणतापत्तिः अन्यथासिद्धत्वात् शब्दंप्रतिपूर्ववर्तित्वग्र
हस्तत्रतदन्यथासिद्धमितिप्रागुक्तमित्यर्थः विपक्षेतिपदमिदं
कार्यमेतदाश्रयोत्पत्तिकप्रयोजकजन्यंनस्यादन्यदेशंस्यात्
एवंकालेपीति सर्वत्रोत्पत्तिमत्तोत्पत्तिशब्दवाच्येनतर्केणेत्य
र्थः उभयंक्रमेणविवृणोति तथहिंति आश्रयाभावइति
समवायिकारणत्वेनेरेवासमवायिकारणत्वादित्यर्थः ननु
निमित्तवत्तिनियतदेशएवकार्योत्पत्तिरिति किंसमवायिनेत्य
तआह एवमपीति असाधारणदेशस्यैवसमवायित्वादि
त्यर्थः तथापिसमवायिविशेषसिद्धिः कुतइत्यतआह तथा
वेति प्रसिद्धसमवायिवृत्तित्वबाधकहर्केतंसमवायपक्षत्तित्व
साधकमेवाप्रसिद्धसमवायिविषयीकरोति सामान्यग्राहक
स्यापिमानस्यसहकारिविशेषाद्विशेषपर्यवसानादित्यर्थः
यदातुसमवायिवृत्तित्वानुमानानंतरंबाधकावतारस्तदाकेव
लव्यतिरेकिणस्ततसिद्धेरितिभावः एवमिति तदन्यतराभा
वेपिकार्योत्पत्तिप्रसंगेनेत्यर्थः वस्तुतः समवायिकारणत्व
ग्रहेन्योन्याभावरूपव्यतिरेकग्रह एवप्रयोजकः नतुसंसर्गा

भावग्रहो निमित्तसाधारणत्वात् यत्कपालं तत्र घटस्य यत्कपा
लं तत्र नेति वत् यआत्मा तत्र ज्ञानादि यन्नात्मा तत्र नेति तद्ग्रह
स्य सत्वात् तथापि घटादिकं प्रत्यात्मनो निमित्तकारणत्वग्रा
हः कुतस्तत्रोक्तगत्यभावात् इत्थं प्रयत्नवदात्मसंयोगश्चे
ष्टाद्वारा घटे हेतुरिति प्रयत्नवदात्मापि हेतुः नचैवमपि संयो
गो हेतुर्नात्मेति वाच्यं संयोगमात्रस्याहेतुत्वेन संयोगिविशेषि
तस्यैव तस्य हेतुत्वात् अन्यथा दंडसंयोगस्यैव घटहेतुत्वे दंड
स्यात त्वप्रसंगः अथात्मसंयोगोपि हेतुरसिद्धस्तदभावेन कार्या
भावादर्शनादिति चेत् न व्यधिकरणगुणजन्यकार्यत्वेन त
त्समानाधिकरणगुणजन्यत्वानुमानात् स्पर्शवद्वेगवद्व्याभि
घातजक्रियायां तथादर्शनात् न च मूर्त्तमात्रसमवेतासमा
वायिकारणत्वमुपाधिः कार्यकारणभावाद्धेतोः साध्यव्याप्यत
या उपाधेः साध्याव्यापकत्वात् साधनमात्रसमर्थनेपि प्रा
धान्यादद्दृष्टं स्वतत्वकार्थमुपसंहरन्मायापि का घागमाविर्णधमा
ह इत्येषेति प्रथनद्रुति शब्द उपसंहारे पस्पदेवस्य यषा उद्दृश्य
नृषा सहकारि शक्तिः सहकारिकारणम समवाये सुदिता भग
वन्मायां प्रभवंविश्वमित्यत्र गमेमायाशब्देनाद्दृष्टस्याभिधानात्
माशक्तिरेव प्रकृतिरित्युदिता कुतो मूतत्वात् मूतकारणमेव
प्रकृति शब्दार्थः अद्दृष्टंच तथा अविद्याप्रभवंत्वागमे सैव
विद्येत्युदिता यतः प्रबोधात्तत्वज्ञानादुभयोरपि भीः अवि
द्यावत्तज्जनकाद्दृष्टस्यापि ततो भयात्तत्वज्ञाने तदनुत्पत्तेः प्रपं
चः प्रतारणात्तद्रचनायाः कल्लोत परंपरा तस्य को न्नाहतः किं

वदंतीसंविरतोयस्यसः शांतोद्वेषादिहीनोममनस्यभिरतिंवि
जातीयज्ञानानंतरितविंतांखविषयांसाक्षात्मास्सतयाप्रत्यक्षे
णसाक्षीभवन्नवध्यातुदृढीकरोत्वित्यर्थः ॥ ॥ ॥इतिमहा
महोपाध्यायश्रीवर्द्धमानविरचितेकुसुमांजलिप्रकाशेप्रथम
स्तवकः ॥ ॥ ॥ ॥ ॥ ॥

नं० ६४८ - घ

न्यायकुसुमाञ्जलिः (द्वितीयस्तवकः) (ग)

पत्राणि ३१

२५६

श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय द्विती
यांविप्रतिपत्तिमुत्थापयितुंभूमिमारचयतिः तदेवमिति तस्य
वजन्यतयातत्कारणयागादिदर्शिकश्चित्स्वीकर्त्तव्यइत्य
र्थः नचेति यागादिस्वर्गसाधनत्वस्यातीन्द्रियत्वादित्यर्थः
तदर्थंभावेदोषमाहानचेति यवहारइति यागादिस्वा॥
सि धनताबोधकशब्दरूपोऽदृष्टाधिष्ठानरूपश्च वदुभ
यमदृष्टसाक्षात्कारविनानसंभवतीत्यस्मादादिविलक्षणः
सर्वज्ञःकल्प्यनइत्यर्थः वदवाक्यजमज्ञानस्यहिप्रामाण्यम
निश्चित्यवहुधनव्ययायासाध्ययागादौप्रवृत्तिनस्यात् प्रामाण्यं
चगुणजंसगुणश्चशाब्देज्ञानेप्रयोगहेतुवाक्यार्थयथार्थज्ञानमि
तिभावः अत्रान्यथासिद्धिमाहनन्विति वक्तृदोषेणाप्रामाण्यशं
कयानिःकंपप्रवृत्तिर्नस्यात्सावसियस्मादवक्षाकवेदेनास्ती
तितत्सेवप्रामाण्यंकिंवक्तृगुणेनेत्यर्थः वक्तृगुणजन्यत्वेप्यन्य
थासिद्धिमाहायोगेतिपेणकमभ्यांसिद्धाःसर्वज्ञास्तएववेदकार
अदृष्टाधिष्ठातारश्चेतिननित्यसर्वज्ञसिद्धिरित्यर्थः यद्यप्यन्य
थासिद्धिरपिप्रमाणाभावएवापर्यवस्यतितथापिसाक्षात्प्रमा
णाभावोग्रेदृष्यान्यथासिद्धिद्वारान्यत्रेत्यर्थभेदः प्रमामात्रे गु
णजन्यत्वसिद्धौशाब्दप्रमायामपितज्जन्यत्वसिद्ध्यतीत्यभिप्रेत्या
हाप्रमायाइति अनित्यप्रमायाइत्यर्थः ननुनित्याद्दृष्टानाक
त्रजेन्यत्वापिमहाजनपरिग्रहात्प्रामाण्यंनिश्चित्ययागादौप्र
वृत्तिःस्यादितयतआहसर्गेतितथाचवेदेमहाजनयोरभाव
त्कस्यकेनपरिग्रहइतिभावः द्वितीयामन्यथासिद्धिमुप

पति नद्व्यस्मिन्निति अनित्यज्ञानत्वेनभ्रमादिशकाक

लिकितस्यानित्यसवत् पूर्वकत्वान्नप्रकारान्तरसंभव इत्यर्थः

प्रामाण्यस्य गुणजन्यत्वे साधयति प्रमेति हेत्वधीनत्वे ज्ञान

हेत्वधीनत्वे वा साध्ये सिद्धसाधनं स्यादतो ज्ञानहेतुव्यतिरिक्तहे

त्वधीनेति साध्यं न तु प्रमायाः ज्ञानत्वेन तद्धेतुजन्यत्वादर्थः।

ज्ञानाजनकजन्यत्वे विरोधः अप्रमार्थांतदसिद्धेर्दृष्टांतासिद्धिः

व्यर्थविशेष्यत्वे वा घटादावपि साध्यसत्वेन कार्यत्वस्यैव व्या

प्यत्वात् व्यर्थविशेषणत्वं च आवश्ये श्वरज्ञानस्यापरंप्रस

सिद्धेः नापि ज्ञानसामान्यदेत्वम हेतुजन्येति वाच्यं उक्त

दोषात् ज्ञानसामान्यं वज्ज्ञानत्वं वा सर्वं ज्ञानव्यक्त्यो वा

आद्ये हेत्वसिद्धिः असेन्द्रियादिति सिद्धसाधनं नापि ज्ञा

नत्वावच्छिन्नकार्यत्वाम कार्यत्व प्रतियोगिककारणजन्ये

ति साध्यं ज्ञानत्वस्य नित्यात्मिसत्वतया कार्यत्वानवच्छेदकत्वा

त् जन्यत्वेन ज्ञानविशेषणे प्रत्यक्षानाक ज्ञानविशेषजन

केन्द्रियादिभिः सिद्धसाधन अत एव प्रमात्वज्ञानत्वावच्छि

न्नकार्यत्वनिरूपितकारणताभिन्नकारणताप्रतियोगिक।

ककार्यतानवच्छेदकं ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वात् अप्रम

त्ववदिति निरस्ता प्रमात्वस्याभिव्यक्तित्वात् अनित्यप्रमात्वंका

र्यतावच्छेदकं कार्यमात्रवृत्तित्वात् अप्रमात्ववदित्यपि

नीलघटत्वादावनैकान्तिकं तत्र विशेषद्रूपकरणेनाम

यासिद्धत्वात् प्रमाऽप्रमारूपकार्ये विरुद्धं वपयैक जाती

यसामग्रीपक्तिमेदात घटद्रूपं जायते न हृदेवज्ञानसाम

कु॰ वं॰
२
२

ग्रीव्यक्तिरभेदादुपपन्नत्वे जात्यममपि तुल्यजातीयसामग्री।
जात्यत्वेपिपमज वैधर्म्यवै स्यात् नवप्रमात्वावच्छिन्नक
पत्वं कथमनुगतहेतुकमिति नाच्यं उक्तयुक्त्यातस्य कार्यता
नवच्छेदकत्वात् अनित्यप्रमाऽप्रमोभयहेतुभिन्नहेतुंज
त्याजन्यत्वादप्रमावदितिचेन्न कायश्रीव्यक्तिभेजन्यत्वे
नसिद्धसाधनात् अप्रमायांनदसिद्धेः नवाप्रमायादे ष
जन्यत्वान्तथा दोषस्यापित्तादेःस्वविषयप्रमायामपिहे
तुत्वात् अनित्यप्रमास्वविरोध्यनुभवप्रतिबंधकतन्या
अनित्यानुभवत्वात् यद्वाप्रमाप्रमाप्रमान्यतरप्रतिबंधव
जन्याप्रमाप्रमान्यतरत्वादप्रमावदितिचेत् न प्रमाजनका
साधारणव्यक्तिविशेषस्याप्रमाप्रतिबधकत्वप्रमाजनक
त्वंवेतिसिद्धसाधनत्वात् अत्रास्मसिन्नृवरयाः एवमप्र
मापिस्वतः स्यान्नपरतः प्रमावदसाधारणकारणादेव
तदुत्पत्तोदायस्यात् त्राहेतुत्वापत्तेः यदिवज्ञानसामग्र्यां स
त्यांविशेषादर्शनादेर्दोषस्यान्वयाद्यनुविधानाद्दोषोहेतु
स्तर्हि विशेषदर्शनादेर्गुणस्यान्वयाद्यनुविधानात्प्रमायामपि
गुणोहेतुरितितुल्यं अपिवयस्यापेयत्कार्यविजातीयंतत्त।
त्कारणविजातीयकारणजन्यं यथाघटविजातीयःपटः
अन्यथाकार्यवैजात्यस्याकस्मिकतापत्तेः घटज्ञानमपिका
र्यंनहि जातीयकार्यंकारणविजातीयकारणजन्यमितिन
व्यभिचारः एवंचप्रागुक्तानुमानेष्वपि नसिद्धसाधनं अनु
गतस्यप्रमाहेतुजन्यत्वेनासाधारणव्यक्तिभेदस्याहेतुत्वा

त् एवमनित्याप्रमात्वमनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियो
गिककारणनाभिन्नकारणताप्रतियोगिवकार्यतावच्छे
दकं अनित्यज्ञानत्वव्याप्यकार्यनावच्छेदकधर्मत्वादप्रमात्व
नित्यप्रमायामप्रमाव्याप्तत्वात्तुगनहेतुसिद्धिः यदाति यघ
प्यप्रमाप्रमात्वापादनेप्रमावृत्तिज्ञानपात्रहेत्वधीनत्वअधिक
रणं तथातिप्रमात्वेयदिज्ञानसामग्रीमात्र—योसवक्षित्या।
दप्रमावृत्तित्स्यादप्रमात्ववद्धित्स्यादनायं अप्रमापाःप्रमित्स
जनकदोषजत्यत्वादापादकर्मसिद्धमित्याह ज्ञानत्वेयीति
तर्हिप्रयात्वमपिन ज्ञानसामग्रीमात्रप्रयोज्यंअतिरिक्तदोषा
भावापेक्षणादित्यादि एवंनहीति युक्तंचैतदन्यथाप्रमासा
मग्र्यामधिकदोषानुप्रवशादप्रमाप्रमाविशेषःस्याद्वक्ष सा
मग्र्यामधिककारणानुप्रवेसाच्छिरपावृक्षविशेषद्रवत्तिभावः
अस्त्विति नंवेवमप्रमित्यजनकजन्यत्वेपरनस्त्वं आगंतुक
भावानपेक्षज्ञानसामग्रीजन्यत्वमवरःस्वतस्त्वमितिविव
क्षितत्वात् तयावगुणाजन्यत्वनप्रमायांनेश्वरसिद्धिरिति
भावःभवेदेवमिति ननुपीतःशंखइत्यत्रविशेषदर्शने
पिभ्रमाद्युनिवारेणाविशेषादर्शननभ्रमहेतुःयत्रवविशेष
दर्शनमपिभ्रमः तत्तत्जन्यज्ञानस्यापिभ्रमत्वान्नविशेष
दर्शनैप्रमातुप्रयोजकमेवं यद्विशेषदर्शनेनहिभ्रमविरोधि
तदज्ञानोऽप्रमाहेतुःप्रत्यक्षभ्रममेवप्रत्यक्षवि।शेषदर्शनेवि
रोधिदिञ्झहेगोरोहमितिभ्रमेवतयादर्शनात् नव्वक्षेपा
त्तत्र नास्तिप्रमारूपमेचाविशेषदर्शनंगुणव्रूतिरभावए

कु०व०
२
३

वदोषःननुविशेषादर्शनंनदोषः किंनुविशेषदर्शनप्रतिबं
धकाःपित्तादयोदोषाः आवश्यकत्वात् नचतेषांनानात्वे
नाननुगमेविशेषदर्शनप्रतिबंधकतयानुगमेलाघवाद्वि
शेषादर्शनमेवहेतुरितिवाच्यं क्वचित्कश्चिद्दोषइत्यननुग
मात् अन्यथापित्तादितोयप्रमानस्यात् अननुगमासित्ता
द्युत्कर्षेणभ्रमोमोत्कर्षाद्वापित्तादेरदोषत्वेवविशेषप्रमनकु
तोनभवति यदिचविशेषस्याविशेषांतरादर्शनात्तदानवस्था
किंचविशेषदर्शनंनप्रमामात्रेनवाप्रत्यक्षप्रमायाहेतुः व्य
भिचारात् तदत्रैवतद्धेतुत्वेतुत्वेऽनवस्थानात्तामेव प्रमा
मात्राहेतुत्वेपिसंशयविपर्ययोत्तरप्रमायांचस्यहेतुत्वात्तत्र
विशेषादर्शनस्यदोषत्वेनान्यत्रापितथात्वात् पित्ताद्युत्कर्ष
स्यापिभ्रमोविशेषदर्शनप्रतिबंधकत्वेनान्यथासिद्धत्वात्
ननुप्रत्यक्षप्रमादौगुणजन्यत्वेपिवेदप्रमाद्यभावचरू
क्षपंप्रमांहेतुः लोकेभ्रमाद्यभावएवप्रमोत्पत्तेर्नतुवक्तृवाक्या
र्थयथार्थज्ञानवत्वादिर्गुणइत्याहस्यादेतदिति लिंगसा
दृश्यादिभ्रमरूपदोषाभावप्रमामात्रान्नानुमित्यादिःप्रते
ति लिंगसादृश्यादियथार्थज्ञानमपिगुणस्तद्धेतुरितिशब्द
प्रमायामपिदोषाभावेसतियथार्थवाक्यार्थज्ञानगुणोहेतु
रित्याह अनुमानादाविति ननुयथार्थवाक्यार्थज्ञानादे
गुणेसत्यपिकरणापाटवाद्यत्रामत्राभिधित्सितेन्यद्वते
नवाक्यंनुप्रमाणंदोषाभावस्यनुप्रमाहेतुत्वेकरणापाटवो
न्मेसोऽस्तीतितदप्रामाण्यमुपपद्यतेइत्यशंकतेअन्यत्रेति

वक्तृदोषे सत्यपि भ्रांतविप्रलंभकवाक्ये संवादात्प्रामाण्यदर्श
नाद्दोषोपि नाप्रामाण्यप्रयोजकः नासत्यविषये त्वप्रामाण्येप्रा
माण्येपि तुल्यमिति यदि हरति गुणाभाववृत्तिनिःस्वभावत्वमि
ति वेदे प्रमाणत्वाप्रमाणत्वप्रयोजकगुणदोषयोरभावादि
त्यर्थः तस्मादिति यथाप्रवृत्तौ दोषाद्यभावो हेतुकत्वेसत्युपेक्षा
ज्ञानादपि प्रवृत्तिनिवृत्ती स्यातामिति गुणदोषयोः प्रवृत्तिनिवृत्ति
हेतुत्वमित्यकैकाभावान्यथासिद्धत्वं तथाप्रमाप्रमयोरपि गुण
दोषौ ननु दोषाभावगुणाभावादित्यर्थः न त्वन्यत्र गुणस्य
प्रमाहेतुत्वेपि वेदस्य पौरुषेयत्वाद्वक्तृगुणाभावाद्दोषाभाव
मात्रप्रयुक्तमेव प्रामाण्यमिति प्रामाण्ये गुणस्य व्यभिचारान्न हे
तुत्वं किंतु दोषाभावस्यैवेत्याह तथापीति सिद्धिर्ज्ञप्तिः सिद्धे
र्निश्चितैर्वेदाप्रमाणं अपेतवक्तृदोषत्वादित्यनुमा
नादित्यर्थः अत्र वेदो न प्रमाणं अपेतवक्तृगुणत्वादिति सत्प्रति
पक्षमाह अपेतेति ज्ञानग्राहकादेव प्रमात्वं निश्चीयते दोषा
धीनाशंकापेतवक्तृकत्वादेव निरतस्यादिति दोषसहित
गुणनिवृत्तेर्वा प्रमात्वहेतुत्वादित्यर्थः दोषवति गुणसहितदो
षनिवृत्तेरेव प्रमाणत्वप्रयोजकत्वादित्यर्थः ननु तथापि शुका
दिवाक्ये भ्रांतप्रतारकवाक्ये च संवादि कथं प्रमा गुणाज
न्यत्वात् धूमभ्रमाद्वह्निमत्येव वह्न्यनुमितिर्वा कथं प्रमा यथा
र्थानिंगज्ञानाजन्यत्वात् न च वह्न्यंतरमेव तद्विषयः प्रत्यभि
ज्ञानात् गौरवाद्यधिकघटितके तद्भावाच्चाउच्यते शुकादिवा
क्ये भ्रांतप्रतारकवाक्ये च प्रमा यथार्थवक्तृनाप्तोक्तत्वाद्धेतुवदी

कु०व०
५

श्वरस्यैवयथार्थवाक्यार्थज्ञानंगुणोहेतुस्तस्यकार्यमात्रेक
र्तृत्वात्शुकादिवाक्येवेदरूपत्वस्यदोषाभाववादिनापिमं
तव्यत्वात् नचैवंशब्दाभासोच्छेदस्तस्यापि श्वरवक्तृकत्वादि
तिवाच्यं तद्वाक्यार्थस्यासत्त्वेनेश्वरज्ञानाविषयत्वात् एवं
लिगाभासजन्यप्रमायामीश्वरस्यैवयथार्थलिगज्ञानंगुणः
एवंप्रमायागुणजन्यतयावेदे वक्तृतरस्याभावात्तदाश्रये
श्वरसिद्धिरित्युक्तं सेप्रतिप्रमात्वग्रहोपिनस्वतः अपितु
परतइतिवैदिकप्रमायाअपितत्त्वामाप्तोक्तवाक्यजत्वेनपा
स्यमितिततोपीश्वरःसिध्यतीत्याह एवमिति तत्रयद्यपि
ज्ञानप्रामाण्यंज्ञानग्राहकसामग्रीग्राह्यनवेतितसंशयः
परतःपक्षेपिज्ञानस्यापिपरतयाप्रमात्वानुमितेर्ज्ञानग्रा
हकत्वात् अप्रामाण्यस्यापिस्वतोग्राह्यत्वापत्तेश्च तथा
पितत्ज्ञानविषयज्ञानाजन्यज्ञानग्राह्यंनवेतिसंशयः
स्वतःपक्षेप्रामाण्यवत्तएवज्ञानस्यग्राहात्परतःपक्षेज्ञा
नएवज्ञात्वेनुमित्याप्रामाण्यग्रहात्तत्रतेनैवतत्प्रामाण्य
ग्रहइतिप्राभाकराः ज्ञानस्वीतीन्द्रियतयातदनुमित्यात्त
द्ग्रहइतिभाट्टाःमनसैवज्ञानवत्तत्प्रामाण्यग्रहइतिमुरा
रिमिश्राः त्रितयसाधारणंवस्वतस्त्वनिरुक्तमेवपूर्वपक्ष
स्तुयद्धर्मिविशेष्य त्वत्प्रकारकत्वमात्रग्रहीतग्राहित्वंवा
प्राभाकरपक्षेस्मृत्यस्मज्ञानत्वंवाविशिष्टज्ञानत्वंवाप्रमं
शयत्वनानुव्यवसायग्राह्यविशेषज्ञानविनाविशिष्टज्ञानाभा
वात्तथापितद्वतितत्प्रकारकज्ञानत्वंप्रामाण्यंग्राह्यंनिष्कं

पथप्रवृत्तसंगतत्वाल्लाघवाच्च तच्चज्ञानग्राहकसामग्रीग्राह्य
मेव तथाहि विशेष्येतद्वत्त्वंतत्प्रकारकत्वंचव्यवसाय
स्यानुव्यवसायेनागृह्यते ज्ञानस्यविषयनिरूप्यतया
ज्ञानवित्तिवेद्योविषयइतिव्यवसायेभासमानेधर्मधर्मिवि
शिष्टमपिविषयः व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् अ
तएवरजतत्वेनपुरोवर्त्तिनेजानामीतितदाकारः अन्यथापु
रोवर्त्तिनंरजतंचजानामीतिनतदाकारापत्तेः अप्रामाण्यमनुप
रतोज्ञायते तदभाववत्त्वस्यतन्मात्रग्राह्यत्वेनानुव्यवसा
याविषयत्वात् नचैवमनुव्यवसायस्यव्यवसायस्यविष
यविषयकत्वेभ्रांतभ्रांतिसंकरः बाधानवतारदशाया
मिष्टत्वात् तदवतारेतस्यैवप्रतिबंधकत्वादितितत्रसिद्धां
तमहि एवमिति अनभ्यासदशापन्नमितिभागासिद्धिवार
णार्थं नतुव्यभिचारवारणार्थं परतोग्राह्यत्वस्यकेवलामपि
त्वात् ननुस्वस्याप्यन्यापेक्षपापरत्वाद्भवमेतेचज्ञानानु
मितिग्राह्यत्वाद्वसिद्धसाधनपरतोग्राह्यत्वेपिकदाचित्स्वतो
ग्राह्यत्वविरोधात् अर्थेव्यभिचारश्च तस्यतज्ज्ञानरूपाश्रया
श्रयसंदेहेनसंदिह्यमानत्वात् नचज्ञानत्वेनहेतुर्विशेषणी
योज्ञानविषयज्ञानप्रामाण्यसंदेहाहितज्ञानरूपार्थसंदे
हेपिनस्यनिश्चितत्वेनतथापिव्यभिचारात् उच्यते अन
भ्यासदशापन्नज्ञानप्रामाण्यंनस्वाश्रयग्राह्यंतदन्यग्राह्यं
नवा आश्रयेसत्यपितद्वृत्तसन्तृतीयक्षयावृत्तिसंशयवि
षयत्वात् प्रामाण्यसंशयाजन्यसंशयविषयाद्वार अप्रामा

कु०वृ०
५
5

प्यवत् अर्थेनिश्चितेपिन तन्निश्चयानंतरन्तु तीयक्षणेर्थसंश
योनवा प्रामाण्यसंशयं विनेति नार्थेनव्यभिचारः स्वशब्दस्यसं
बंधिशब्दत्वेनसमभिव्याहृतपदत्वाच्च नस्वस्यपरत्वं यच्चोक्तं
यावद्व्यवसायोह्यखिलतत्प्रकारंविशिष्ट एवधर्म्यनुव्यवसा
येभासतेतन्न तथाहीदं वरजतं वजानामीति नानुव्यवसा
यः बहिर्विशेष्यकेमनसोस्वातंत्र्यात् किंत्विदमिदंत्वेनज
त् त्वेनजानामीति तत्रेदंत्वरजतत्वे प्रकारत्वेनतत्प्रका
रज्ञानवत्त्वंवात्मनि भासते अन्यथाप्रकारत्वाविनृतीपार्थासं
भवः नवरजतत्ववैशिष्ट्यमेवनृतीयार्थः व्यवसायेपितद्दु
ष्टेरवापत्तेः अतएव हत्वरज तावव शिष्ट्यं पुरोवर्त्तिनोनानुव्य
सायविषयइतिकुतः स्वतः प्रामाण्यग्रहः ननुपरतःपक्षे
परत्वसाध्यहेतोरभावेनुमानवाच्यं तच्चलिंगाभावादसंभवि
समर्थप्रवृत्तिजनकत्वंलिंगमितिचेत् नीकारणतच्छेदकरू
पग्रहविनातदग्रहात् तद्यदिप्रमात्वमेवतदात्माश्रयः
अन्यच्चेत् तदेवप्रामाण्येलिंगमस्तु उपजीव्यत्वात् नच
तृणारणिमणिन्यायेनव्यक्तावेवकारणत्वंगृहीत्वासमर्थ
प्रवृत्तिजनकत्वग्रहः ग्राहकाभावात् नचप्रत्यक्षमवग्रा
हकं तद्धि नवहिरिंद्रियजन्यमांतरत्वात् नापिमानसं
तद्धिसमर्थप्रवृत्तेः प्रागुत्तरकालेवा नाद्यः समर्थप्रवृत्ते
रभावात्तद्वैशिष्ट्याग्रहात् नान्त्यः ज्ञानस्यनष्टत्वेनमनसा
प्रत्यासत्त्यभावात् नापितज्जातीयत्वंलिंगंतद्धिनकरचर
णवृत्तिशरीरज्ञानत्वादि तत्रकरचरणांतरवृत्तिकरचर

णवत्वज्ञानेव्यभिचारः तत्रापिशरीरारोपेप्रमात्वमवेतिचेत् न
हिकरचरणादीतियर्थः शरीरभ्रमेपिकस्याश्चिद्व्यक्ते
ज्ञानात् तस्यतत्रप्रामाण्यात् अन्यथाशरीरत्वस्यैवमानायो
गात् करचरणादिशून्येपच्छरीरत्वेज्ञानंनद्याहृत्त्यर्थेनदितिचे
त् न करचरणादिमत्त्वमुपलक्षणंविशेषणवानाद्यः व्या
वृत्तोयनस्याभावात् नांत्यः विषयतयाहिनज्ञानविशेषणं
करचरणावत्वप्रकारकज्ञानविषयत्वस्यव्यभिचारात् अश
रीरोपेनादरशभ्रमसंभवात् शरीरज्ञानेनदसिद्धस्वविषय
विशेषणत्वेवकरचरणवद्विषयकशरीरज्ञानावस्यव्यभिचा
रात् यारीरभ्रमस्यापिवस्तुतः करादिमद्विषयत्वात् नचकर
चरणशून्येयच्छरीरत्वनज्ञानंनभवतीत्तिविवक्षितंन्तृतीयार्थ
स्यविषयत्वेस्वरूपासिद्धेः शरीरज्ञानस्यतच्छमशरीरात्वादिवि
षयकत्वनियमात् अत्राहुः समर्थप्रवृत्तिजनकत्वप्रवृत्त्युत्त
रकालसंस्कारोपनीतज्ञानेज्ञानेप्रमेयत्वाभिधेयत्वव्याप्तिव
दुरुक्ते यद्यपूर्वेपृथिवीज्ञानेपृथिवीत्वप्रकारकनिश्चयत्वा
नुमर्भसैतौकदाचित्तत्रैवगंधस्यतद्विरोधिविरहस्यवसाक्षा
कारेपुनः स्मृतिरूपपृथिवीज्ञानेहातिमसंनिकृष्टेनप्रत्यनि
कनष्टवविशेषणंज्ञानजनितसंस्कारापेक्षणभनसागंधकस्ये
वायनिश्चयपदस्याकारेणसुरनिदनमितिवाक्षुषज्ञानवत्ज्ञा
नजननान्त्यग्राहकाभावाद्धेत्वसिद्धिः तज्जातीयत्वमपिकारच
रणत्वंवद्विशेष्यकरीरत्वप्रकारकज्ञानात्वदिशरीभ्रमेवक
रचरणवतोविशेषणत्वात् प्रथमंप्रमाएमानुमितिःके

कु०वृ०
६
6

वलव्यतिरेकिणा ननुप्रमाण्यप्रसिद्धिं विनाव्याप्त्यग्रहा
त्पूर्वमनुमानं च यथाघातात्प्रमातद्विषयसिद्धौ सामान्य
नः साध्यप्रसिद्ध्या नतदप्रसिद्धिः विशेष्यानिर्णयाद्वतान्व
पित्वासाधारणत्वे इतिचेत् नहिं कस्यापि प्रथमं धस्वा
र्थे प्रामाण्यानुमितिर्नस्यात् प्रामाण्यतिषेधरूपस्य परव्या
घातस्य तदानुपस्थितेः स्वयंप्रामाण्यमनिषेधस्यवनद्धौपूर्वे
कत्वात् मिवामाग्नवीयसंस्कभाद्विशेष्यावृत्तप्रकारत्वतद्वृत्ति
तद्वृत्तितत्प्रकारकज्ञानत्ववाप्रामाण्यमात्रंस्मृत पृथिवीज्ञा
नादौसाध्यमानं समवंमाममहिमयपक्षधर्मेनावलात्पृथि
वीज्ञानस्य विशेष्यावृत्त्यप्रकारकत्वादौपर्यवस्यति स्वतः
प्रामाण्यनिषेधे प्राथमिकप्रामाण्यज्ञानस्यान्यथोपपार
षतुमशक्यत्वादिति सांप्रदायिकाः अस्मस्य नवरणत्व
प्राथमम प्रामाण्याभावएवप्रामाण्यं व्यतिरेकिणा साध्यजन
एवनिष्कंपप्रवृत्तेरुपपत्तेः तदेवासिध्यत्पक्षधर्मतावलो
ततद्वृत्तित् कारकज्ञानत्वादिकमादायंसिद्ध्यति तथास्व
यंपृथिवीत्वेनानुभवो नपृथिवीत्वाभाववतिपृथिवीत्वप्र
कारकः गंधवद्विषयकप्रत्यभजनकपृथिवीत्वप्रकारक
कैज्ञानत्वात् एवंतन्नैवंपयापृथिवीभ्रमः एवंवपृथिवीभ्र
मेपृथिवीत्वाभाववत्पृथिवीत्वप्रकारकत्वसमर्थंप्रवृत्तसम
र्थंप्रवृत्तिजनकत्वानावपोर्व्याप्तिग्रहाद प्रामाण्यव्यापक
हेत्वभावाभावरूपाद्धेतोरप्रामाण्याभावरूपंसाध्यंसिद्ध्यति
पद्धारपकपाहेत्वभावोगृहीतस्तदभावएवहिहेतुनासाध्य

ते यत्रत्वभावव्यापकताहेत्वभावस्यज्ञायतेतत्रसाध्यप्रसिद्धि
रनुमानांगंतां विनानदज्ञानात् यत्रचभावव्यापकताहेत्वभाव
स्यतत्रनसांगतेन विनापिव्यतिरेकव्याप्तिग्राहात् विशेषण
ज्ञानं विनाकथंप्रामाण्यविशिष्टेनुमितिरितिचेत् प्रथमंत
कथंचित् ज्ञप्तिप्रामाण्यमित्यनुमित्यनंतरंतेनैवहेतुना
तत्रप्रामाण्यविशिष्टानुमितिः अभावविशेष्यकज्ञानंतर
मभावववस्तेत्वमितिज्ञानवत् एवंतदभाववतितत्प्रकारक
त्वव्यतिरेकः सिद्धांसद्वत्विनत्प्रकारकत्वमादायपक्षधर्मता
बलेनसिद्ध्यतीतितत्त्वचिंतामणावाहुः कदाचिदपीति प्रा
माण्यग्रहोत्तरकालमिवनन्यूवस्त्वपीत्यर्थः नचज्ञानत्व
साधारणधर्मज्ञानमात्रासदृत्याह नहीति प्रामाण्यकज्ञा
नमात्रंनाशेष्यपिरुप्रमाणमेवेत्यवधारणात्मकमित्याश
येनसंकतोअयत्तिजिज्ञपमात्रमेवसंशयविरोधिनतुतद्वि
शेवोवधारणमित्याशयेनपरिहरति तर्किमितिधर्मिण
एवेतिप्रमाणेतिप्रमाणरूपंज्ञानमित्यर्थाः तदप्रतीतेः प्रा
माण्याप्रतीतेः ननुधर्मिज्ञानंननसंशयहेतुः कोटिस्मरणवि
शेषादर्शनधर्मीद्रियसंनिकर्षात्सामान्यसंशयरूपएव
ज्ञानग्रहउत्पद्यते अमत्रविशिष्टज्ञानेविशेष्यज्ञानस्याहे
तुत्वात् अत्राहुः तुणादौवेगेनगच्छतस्तद्विषयेंद्रियसंनि
कर्षेपिपरेवधर्मिज्ञानप्रत्तेतत्रैवविशेषादर्शनादितः संश
योजायतेनत्वज्ञानेधर्मिणीतिधर्मिज्ञानहीनहेतुः कि
चयद्धर्मिगतसाधारणधर्मस्यपेनसहम्रपः सहवाए

कु०कु
७
7

णवसायत्वेनोत्कटकोटिकतासंशयस्याधर्मिज्ञानस्याहेतुत्वे
नस्यात् स्यदापीति प्रामाण्यस्यानुमेयत्वे लिंगपरामर्शपि
स्याप्तिलक्षः स्यादित्यर्थः तथा च स्थीयत्वाय सस्वसाध्य
नं प्रतिहेतुमिति भावः अन्यथैवेति प्रवृत्तिमात्रे प्रामा
ण्यग्रहानहेतुः अर्थसंदेहादपि प्रवृत्तेरन्यथोपपत्तेरित्य
र्थः स्वयोगेवेति त्रुटित्यभ्यासापन्नलिंगानुसंधानाद
प्युपपत्तेरित्यर्थः सत्यमनेपि व्यभिचारमाहानहीति नाव्य
विलंवइत्येतावत्तेवलिंगानपेक्षता तथा सतिपि प्रासाय
शमशक्यनुभवस्याप्यलैगिकत्वप्रसंगइत्यर्थः सवमत
दिति। त्रुटितिप्रवृत्त्य दिकमित्यर्थः तथेति यदागृही
तप्रामाण्यमेवज्ञानं परप्रामाण्यनिश्चायकमास्थेयं त
दायवसायोप्यगृहीतप्रामाण्य एवविषयं निश्चाययन्तु
कितस्प्रामाण्यग्रहेण यदि च तस्याप्रामाण्यसंशयान्न
तन्मात्रादर्थनिश्चयः तर्हि प्रामाण्यानुमितेरप्रामा
ण्यसंशयाच्च न तोपि प्रामाण्यनिश्चयः ततस्तस्या अ
पि प्रामाण्यनिश्चयावश्यकत्वेऽनवस्था एवं लिंगव्या
प्यादिज्ञानामपि प्रामाण्यानिश्चयेहेत्वासिद्धित्वनि
श्चयेवानवस्थानहि न तल्लिंगादिज्ञाने प्रामाण्यसंशयो
नुभवविरोधात् तथा च परिशेषात्स्वतः प्रामाण्यग्र
ह इत्यर्थः तदग्रहेपीति न प्रामाण्यनिश्चयादेवार्थ
निश्चयः पितु न यत्राप्रामाण्यसकाकरत्तलादिज्ञाने तत्र
व्यवसाय एवार्थनिश्चय इति तत एव निष्कंपप्रवृत्त्युपपत्ति

रितिन प्रामाण्यानुमितिलिंगादिज्ञानानामपि प्रामाण्या
नुसरणमितितानवस्थेत्यर्थः तथाप्यनभ्यासदशापन्न
ज्ञानप्रामाण्यसंशयेनार्थनिश्चयस्य परिभावात्तत्प्रामा
ण्यानुसरणेनवस्थेत्याह नवेति अगृहीतप्रामाण्यमे
वज्ञानंपरप्रामाण्यंनिश्चापयति अप्रामाण्यशंकाकलं
काभावात् यत्रानुप्रामाण्यज्ञानेप्यप्रामाण्यशंकयाप्रा
माण्यसंशयस्तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेवप्रा
माण्यतिल्लपः एवंयावदप्रामाण्यशंकं न ज्ञानप्रामाण्य
निश्चयादेवतन्निश्चयः नवैवमनवस्थावश्यम प्रामाण्यज्ञा
नस्यज्ञानाभावाद्धर्मिज्ञानाभावेनकोटिस्मारणाभावाद्विव
र्यांतरसंचाराद्वाप्रामाण्यसंशयानवस्थाभावादित्यर्थः
अन्यथेति भट्टानाप्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वेत
स्या अपि प्रामाण्यानुसरणेऽनवस्था प्राभाकराणामपिप्रा
माण्यस्वयाप्यत्वंनस्वग्राह्यत्वंस्वरूपप्रामाण्याभत्वादिति
परग्राह्यत्वेऽनवस्थानात्र्यरिशेष्यनुमानेनमानांतरो
पयाग्यत्वंतथावतथामाण्यस्यस्वग्राह्यत्वमन्येनेत्यनव
स्थयाविषयांतरसंचारेनस्यादित्यर्थः कारस्तमुखीम
नवस्थामाह लिंगेति प्रामाण्यसंशयेनलिंगस्यसंदि
ग्धत्वात्तत्रन्निश्चयपरत्वर्थः भट्टमते ज्ञाननतारूपलिंग
ज्ञानस्यप्रामाण्यसंशयात्तनन्निश्चयइतितद्ग्राहकप
रंपराप्रामाण्यानुसरणेप्यनवस्थेत्याह तत्किमिति सो
पीति मायालिंगिनिअटिति परिव्राजकबुद्धिवदप्रमा

पिग्रमेत्सेवगस्यतद्रूत्यर्थः फलमुखीमनवस्थामाह नही
ति यदनुपलम्भइति टास्यविशेषस्यशुक्तित्वादेरनुपल
भेशुक्तौरजतभ्रमोयस्यशुक्तित्वादेकयलंभेभ्रमवाधोव्य
वस्थितेत्सलोकसिद्धइत्यर्थः यद्यपियदुपलंभइतिवक्तु
मुचितंतथापिवस्तुगत्याविशेषज्ञानंनभ्र‍ विरोधिअपि
तुविशेषत्वेनेतिदर्शयितुयादृगित्युक्तंएवमनभ्युपगमेलो
कव्यवहारविरोधइत्याहान्यथेति साध्यमवाधव्यवस्था
वाधकस्यव्यभिचारीजातीयत्ववाधकयोरविशेषाद्धाधक
त्वमेवतस्यादित्यर्थः अन्यथेति लोकमर्यादातिक्रमेकि
मपिनतत्त्वमित्यस्यार्थतत्सेष्का न्यस्यातत्त्वमितिवाधकस्य
तत्त्वंयाध्यस्यातत्त्वमभ्युपेयमित्यर्थः तथाभावेति दिप
तियामकनिः शेषविशेषोपलंभेपिविपरीतारोपः स्या
त्तदारोपत्वनतावधाकविनानिश्चयः सर्वस्यारोपात्वप्र
संगात् वाधकात्तन्निश्चयवाधकस्याभिमतस्यापिवाध्य
ताया‍ वाधकत्वप्रसंगात् अवाध्यत्वेतुकथमशेष
विशेषोपलभेसमारोपसंभवइतिभावः एवचप्रामाण्या
नुमेयत्वेवहुवित्तव्ययायासमाध्येपिगृहीतप्रामाण्येन
प्रवर्त्तकं तस्याप्रामाण्यरनुमितेः प्रणेवनाशात् किंतु
नज्ञानसमानविषयमप्रामाण्यशंकाशून्यंज्ञानांतरमे
वनचैव प्रामाण्यानुमितिरफलतांविनातत्समानविष
यज्ञानेअप्रामाण्यसंशयादितिसारः अस्तुसर्वत्रैकश
ब्देप्रामाण्यस्योत्पत्तौज्ञप्तौवपरस्संवेदेतुनिसतयाव

कुरभावान्नत्वद्गुणाधीनप्रामाण्यज्ञप्तिरपितस्याप्तोक्तत्ववि
नापिमहाजनपरिग्रहादेवस्यादितिसाहस्यादेतदिति सर्गप्रल
यसंभवेवेदस्यनित्यत्वंमहापरिगृहीतत्ववासिद्धमित्याहतुन
यस्येति यद्यपिवर्ण्णानांनित्यत्वेप्यर्थप्रत्ययानुकूलानित्यानु
पूर्वीविशेषघटितत्वेनवेदोप्यनित्यएवेतितत्रवक्तृगुणापे
क्षास्त्येवनथापिवर्ण्णस्यानित्यत्वमुसारेणेतत्समूहरूपवा
कविशेषरूपस्यतस्यसुतरामनित्यत्वासिद्धमितीत्याशयेनवर्ण
मात्रस्यानित्यत्वंसाधयंति तथाहीति अनभिव्यक्तेवर्ण्ण
त्वव्याप्यजातिविशेषोवर्ण्णसमूह एककोलाहलतः प्रत्यक्षमे
ववर्ण्णस्यानित्यत्वंयोग्यानुपलब्धेः प्रत्यक्षप्रतियोगिकाना
वत्वेनैवघटाभावस्येवतदभावस्यप्रत्यक्षत्वादित्यर्थः प्र
त्यक्षस्यान्यथासिद्धिंनिराकरोतिनहीति येनसन्नपिनोप
लभ्यतइत्यर्थः नतएवअमूर्त्तत्वादेवइंद्रियसंबंधविच्छे
दस्यावरणस्यवशब्दस्यविभुत्वादाकाशविशेषगुणत्वे
वश्रोत्रसमवायस्यनित्यत्वादयुक्तइत्यर्थः नत्कल्पनेति
अतीन्द्रियशब्दोपलंभककल्पनायामित्यर्थः ननुप्रतियो
गियोग्यतेवनाभावप्रत्यक्षत्वेतंत्रकिंत्वधिकरणयोग्यता
पितथावशब्दध्वंसेनास्तीतिकथंसप्रत्यक्षः नवेंद्रियविशेष
णानपाकस्यचिद्गृहोऽपित्विंद्रियसंबद्धविशेषणतयैवा
ह पेक्षितेति तिवादेति श्रूयमाणशब्दध्वंसइत्यर्थः अ
तोनैंनैत्यशब्दध्वंसेभागासिद्धिस्तस्यसाक्षात्कारकालेना
शादितिभावः ऐंद्रियकेति ऐंद्रियकप्रतियोगिकाभाव

त्वादित्यर्थः नन्विदं मूर्त्तत्वाभावे नानैकान्तिकं भूतस्य हि मू-
र्त्तत्वं प्रत्यक्षं किंतु मूर्त्तत्वग्रहेपि न ग्रहात् तदभावस्तु न
प्रत्यक्षः अयोग्यस्यापि मूर्त्तत्वस्य संभवे यावद्विशेषाभावाप्र-
त्यक्षतया मूर्त्तसामान्याभावस्याप्रत्यक्षत्वात् नाच प्रत्यक्षा-
शेषमूर्त्ताभावग्राहिणा प्रत्यक्षेण प्रत्यक्षेनरमूर्त्ताभावनि-
श्चयसहकारिणा सोपि गृह्यत एवेति वाच्यं लिंगत्वाग-
मसहकारिणां यक्षग्राहकप्रत्यक्षेणैवत्तिगिकत्वावगमेनुमा-
नमात्रविषयापत्तेः मैवा मूर्त्तत्वसामान्यस्यायोग्यघटितत्वे
नायोग्यतया तदभावे हेतोरभावात् येनरूपेणाप्रतियोगियो-
ग्यता तेनैव तदभावस्य योग्यतावगमात् अत्राभावपदे
न ध्वंसउक्त इति न व्यभिचार इत्येके इत्थं निष्पमूर्त्तत्वाभा-
वस्याप्रत्यक्षत्वेपि गुणादौ सप्रत्यक्ष एवेत्यन्ये उपाध्यभ्या-
वनमिति व्यतिरेकेणेति शेषः नैनेन्द्रियसंनि १तष्टत्व
मिन्द्रियकारत्वं पोपाधिरित्यर्थः नवेन्द्रियकाधारत्वे नोपाधि
धर्माभावस्यापि प्रत्यक्षतापत्तेरिति वाच्यमुपाधेरधिकदृश-
द्वृत्तित्वेपि दूषकताबीजसाध्यव्यापकत्वानपायात् अय-
नायमुपाधिः व्यतिरेको यसहारसामर्थ्याभावात् तथाख
भावत्वेति अतीन्द्रियाधारत्वादिति पक्षपि नेन्द्रियकाधारत्व
व्यतिरेक उभयाधारत्वेप्यविरोधात् यावद्भावत्वे सत्येन्द्रि-
यकानाधारत्वादिति संभवति किंतु योग्यताविरहस्तत्रोपाधिः
नच साधनव्यापकत्वं नद्यतीन्द्रियधारत्वमेव योग्यतावि-
रहः पृथिवीत्वासंतताभावादेरयोग्यतापत्तेः नप्येन्द्रिय

काधारत्वाभावः सः तथा सति तदभावस्य योग्यतासत्त्वे ध
र्माभावस्य योग्यतापत्तेः एवं ऐन्द्रियकाभावधर्मतद्धर्म्यभा
वस्य योग्यत्वे सुक्तो साधनव्यापकताया अपरिहारादिति भावः
व्यापकेति प्रत्यक्षत्वव्यापकेन्द्रियकाधारत्वेन्द्रियसंनिकर्षा
नुपलब्धस्यर्थः यद्यपि शब्दत्वं न प्रत्यक्षोऽतीन्द्रियाधारत्वा
दिति पृथिवीत्वादौ व्यभिचारि तथायेन्द्रियकानाधारभाव
त्वादिति हेतुः कर्तव्य तत्र मः यममुपाधिं निरस्यति स्वरूपे
ति स्वरूपयोग्यता प्रत्यक्षो यहि तत्स्वरूपसंपत्तिं प्रति सहका
रियोग्यता पास्तसंपन्ने येन्द्रियसंनिकर्षस्यानुपाधित्वात् कु
तः तस्या इति तस्याः प्रत्यक्षतायास्तामिन्द्रियसंनिकर्षरू
पसहकारियोग्यतामित्यर्थः तथा च पक्षवृत्तित्वेन साधन
व्यापकत्वान्नोपाधिरिति भावः यद्यपि स्वरूपये एयः तास स्व
रूपसाध्यं प्रति सहकारियोग्यत्वं तु नोपाधिः साध्याव्यापक
त्वादित्यर्थः द्वितीयमुपाधिं निरस्यति नापीति यद्यप्यु
पाधिसत्त्वेऽपि साध्याभावो न दोषस्तथापि समव्याप्तो वाधिम
भिप्रेत्योक्तं विषमव्याप्तोपाधिपक्षे तु अणुके साध्यव्या
पकत्वमभावत्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वे तु नष्टाश्व
दग्धाद्यभावे साध्याव्यापकत्वं किं च प्रत्यक्षयोग्यतात्र साध्या
भावाभावस्य नैन्द्रियकाधारत्वमात्रं धर्माभावस्य प्रत्यक्षताप
त्तेः नाप्यैन्द्रियकाधारत्वे सत्यैन्द्रियकप्रतियोगिकाभावत्व
गौरत्वगौरवात् तदिन्द्रियाग्राह्यत्वेऽप्यधिकरणो गंधरसा
भावयोर्घ्राणादिना ग्रहणं च न चैन्द्रियकप्रतियोगिका

गोरवात् तदिंद्रियायोग्यत्वे वायुस्पर्शध्वंसोपि प्रत्यक्षः स्याति
वाच्यं तस्याश्रयनाशजन्यस्य ग्राहकेंद्रियसन्निकर्षादिति
तावः अतएवेति इंद्रियसन्निकृष्टत्वमिंद्रियकाधारत्वं चे
त्सु नर्पंत अपुक्तमपि नाभावस्य प्रत्यक्षत्वे धर्माभावस्य प्रत्य
क्षतापत्तेरित्यर्थः सम्प्रतिपक्षे द्वये प्रथमस्यासिद्धिमाह ना
पीति ननु स्थापनानुमाने योग्यत्वे साध्ये प्रत्यनुमाने तद
भावः साध्यः तत्र चेंद्रियासंनिकृष्टत्वं व्यभिचारि इंद्रियासं
निकृष्टेपि योग्यता अनपायात् तस्माद्यदा साक्षात्कारवि
षयत्वं साध्यं तदा फलाभावे योग्यताप्यर्थेति तत्रासिद्धिरुक्ते
त्याहुः ननु विशेषणत्वमभावस्य न दास्याद्यदि श्रोत्रं शब्द
ध्वंसज्ञाने भासेन नन्वेवं श्रोत्रस्यातीन्द्रियत्वात् न तेन शब्द
ध्वंसस्य तद्विशेषणत्वं स्वसंबंधेन विशेष्ये व्याहृत्तबुद्ध्यजन
कत्वात् नापि श्रोत्रं विशेष्यं व्याहृत्तबुद्धिविषयत्वादित्या
ह विशेष्यस्येति श्रोत्रस्यातीन्द्रियत्वेपि शब्दलिंगजश्रो
त्रज्ञानसहकारिमनः प्रस्तुतानुमितिविषयत्वं स्यादित्य
भिप्रेत्याह तथेति विशेषणतासंबंधस्य हि विशिष्टज्ञान
फलं तनु तदंतर्भावे नैव सदित्यर्थः आत्माश्रयमेवाह वि
शेषणभावेनेति तथापि संबंधं विना कथं विशेषणत्व
मित्युपसंहरंस्तेन निराकरोति तस्मादिति संबंधांतरं विना
विशिष्टत्वयजननयोग्यत्वमेव स्वरूपसंबंधोस्तीत्यर्थः
तथापि कथं विशेषणमेत्यत आह सैवेति प्रतियोगीति
प्रतियोगिनः शब्दस्याधिकरणे न श्रोत्रेण शब्दाभाव

स्यस्वभावसंनिकृष्टत्वादित्यर्थः नत्वापीति तथाविशेषणत
यासंनिकर्षेण तथैवविशेषणविशिष्टं विशेष्यविषयैवबुद्धिः
कर्त्तव्याविशेष्यश्चात्रायोग्यतयाचसानसंभवतीत्यर्थः गृह्य
माणेति तद्विशेष्यकप्रत्यक्षेनघेएपताप्रयोजिका अत्रतु
विशेषश्चात्रमयोग्यमतोविशेष्यमविषयीकृत्यापिविशेष
णतयाप्रत्यासत्त्याशब्दध्वंसप्रत्यक्षजन्यतेत्यर्थः अन्यथे
ति यदिनैवंतदाश्रयेगृह्यमाणेरूपादिप्रत्यक्षदर्शनादगृ
ह्यमाणेवायावाश्रयेतत्स्पर्शप्रत्यक्षंनस्यादित्यर्थः तथा।
यात्तिसंबंधान्तरंविनाविशिष्टप्रत्ययजनयोग्यतयेतियेप्रत्या
सत्त्यासंबद्धविशेषणस्यैवप्रत्यक्षज्ञानजनदर्शनान्नेदि
यविशेषणताप्रत्यासत्तिरित्यर्थः अस्येति इन्द्रियसंनिकृ
ष्टोर्थोघटादिस्तस्यप्रतिसंबंधिद्वितीयअमयेति नविशे
पारत्वेनपेक्षत्वादित्यर्थः स्वचेष्टायामिति शरीरक्रियायास्तत्कृत्यन
पेक्षत्वादित्यर्थः व्यतिरेकेणैवेति परत्परमधिष्ठेयं तद्व्यापा
रे शरीरक्रियार्थपक्षकमाह एवमिति सिद्धसाधनमभिधायानुमि
मारभतेपि चेति अधिष्ठातृस्योनिक्षित्यादेश्चेतनाधिष्ठितत्वहे
तुजन्यत्वेसाध्येपरादिदृष्टान्तः साध्यविकलः कुविन्दादेः कार
णत्वेनैवापेक्षणीयत्वयाकारकाधिष्ठातृत्वेनतदभावादित्य
र्थः तथा चेति० कर्तृजन्यत्वेप्यधेन न समवायादिहेतुकत्वस्य
मपाप्युगमादित्यर्थः उपाधिमाह किंचेति नहीति यथा शरीर
निवृत्तावप्यकायी बुद्धिर्न निवर्त्तते तद्वन्नित्यप्रयत्ननिवृत्ताव
प्यकायी बुद्धिर्न निवर्त्तत इति न शरीरे हि बुध्याकारणत्वेनापे
क्ष्यत इति शरीरनिवृत्तौ कार्यबुद्धिर्विवर्तत इति युक्तं न पुनर
नित्यप्रयत्नो बुध्याकारणत्वेनापेक्ष्यते येनानित्यप्रयत्ननिवृत्तेः
कार्यबुद्धिर्निवर्त्तेत न नित्येति स्यादपि तु व्यापकत्वमात्रेणेत्य
र्थः शरीरवदिति प्रयत्नाभासमसमर्थाहनिः बुध्या शरीरपयाकारण
तया नापेक्षते तद्वन्नित्यः प्रयत्नः कारणतयेत्यर्थः तन्नि
वृत्तावपीति अनित्यप्रयत्ननिवृत्तावपीत्यर्थः तदेतदिति वि
शेषस्य विशेषं प्रति प्रयोजकत्वादित्यादिनेत्यर्थः अत्र प्र
संगतः शायोनावद्दूषणमाह यदीति दृष्यपादनमित्यर्थः न
चेति आपादकस्याविशेष इत्यर्थः अयेति तथा चापाद्या
पकयोर्भेद इति भावः तत्राप्यप्रयोजकत्वमाह तदवच्छि
न्नेति साक्षात्प्रयत्नाधिष्ठितत्वेपि तस्येहेन्द्रियाश्रयत्वं यद

वच्छिन्ने आत्मनि प्रयत्नः यद्वच्छिन्नात्मनिष्ठज्ञानेनेन्द्रियकार्येण भो
गो जनयितव्यः कार्ये तु ज्ञानप्रयत्नाविन्द्रियाश्रयत्वं विनापि स्या
मिति न विरोध्यति मूलशैथिल्यमित्यर्थः प्रयत्नोत्पत्ताविति निमि
त्तसप्तमी अत एवेति सोपाधित्वेन मूलशैथिल्यादेवेत्यर्थः उपा
धिमाह नहीति ज्ञानानित्यत्वमुपाधिरित्यर्थः न च नित्येति यद
वच्छिन्ने आत्मनि अयं भोगं जनयति तस्याश्रयत्वं नित्यज्ञाना
श्रयस्येश्वरस्य भोगाभावान्न तदर्थं तदपेक्षेत्यर्थः प्रसंग
दूषणेनैव तदनुग्राह्यो हेतुरपि दूषित इत्याह तस्मादिति य
दि शरीरत्वं साक्षात्प्रयत्नाधिष्ठेयत्वं तदा शरीरेतरत्वं साक्षा
त्प्रयत्नानधिष्ठितत्वं परम्परया व्यापारे शरीरानपेक्षत्वं साक्षात्प्र
यत्नाधिष्ठेयानपेक्षत्वमेव तथा च साध्याविशेष इत्यर्थः यदीन्द्रि
याश्रयत्वं भोगाश्रयत्वं पारशरीरत्वं तदा शरीरेतरत्वादित्यस्या
निन्द्रियाश्रयत्वादभोगाश्रयत्वाद्वेत्यर्थः स्वव्यापारेन्द्रियाश्र
यानपेक्षत्वाद्भोगायतनानपेक्षत्वादिति वा हेतौ पक्षे त्वर्थः त
देतत्सर्वमन्यथासिद्धमित्याह अनिन्द्रियाश्रयत्वादिति ईश्वरे
त्यदृष्टाभावेन भोगाभावात् सरमाण्वादिभिर्भोगानवच्छेदक
त्वेनानिन्द्रियप्रयोगोपि स्यात् तस्य संबद्धेगवद्द्रव्यान्तराश्रयत्वा
च्छरीरानपेक्षक्रियोपि स्यात् न विरोध इत्यर्थः क्षित्यादि
त्वं चेतनानधिष्ठितहेतुकशरीरेतरजन्यत्वादित्यर्थः त्रा
पि शरीरपदार्थस्य विकल्प्य चपेदोषमाह यावेति दूषणां
तरमाह अप्रसिद्धेति तनु चेतनानधिष्ठितत्वहेतुकत्वमावद
न्यत्रावगतमतः प्रतीतमविपोगिकत्वेन तन्निषेधः २

क्षसाधनः स्यादित्यत आह नचेति कुविंद इति। ईश्वरेणैव तत्वा
देरधिष्ठानात् किं तदर्थं कुविंदे जेत्यर्थः ईश्वरेणैवेति कुविंदैरेव तंत्वा
देरधिष्ठानात् किं तदर्थमीश्वरेणेत्यर्थः अनवस्थावेति घटादे
र्द्विकर्तृकतया न दृष्टान्ते न कार्यत्वात् क्षित्यादावपि द्विकर्तृकत्वा
पत्तौ पुनः घटवत् क्षितिः क्षितिर्बहूरः ईश्वरान्तरं स्यादित्य
र्थः अन्वयेति कुविंदव्यापारस्यान्वयव्यतिरेकादित्यर्थः ईश्व
रज्ञानादीनां नित्यत्वेन सर्वविषयत्वात् घटाद्युपादानविषय
त्वमपीति कथं न तेषां पगदिकारणत्वं कुविंदाः ज्ञानादि तु
ल्यत्वादित्याह परमाण्विति षट्कारकसंयोगादिकं प्रतीश्व
रस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति भावः नन्विति
नात्वधिष्ठाताधिष्ठानार्थमेवेत्यर्थः यथा कुविंदाधिष्ठानान्व
न्वयव्यतिरेकाभ्यां तथेश्वराधिष्ठानं ज्ञानादीनां नित्यतया सर्व
विषयत्वात् तदधिष्ठात्रंतरकल्पनायामनुमानमस्तीत्यतो नव
स्यास्या ना कार्ये हि कर्तृत्वे भकारणत्वात् द्विकर्तृत्वादिनेति
नास्ति द्विरित्याह प्रमाणाभावादिति वैजात्यमिति प्रत्ये
कजन्यतया हेतेकार्यमेलकव्याप्यमित्यर्थः इहापीति द्विक
र्तृके घटादावेककर्तृकक्षित्यादेर्वैजात्यमित्यर्थः उदासी
नस्येति कारकत्वव्यापारपतः इत्यर्थः उदासानबुद्धेरि
ति कर्मधारयः दुःखहेत्विति दुःखहेतुश्चासौ कण्टकस्पर्श
श्चेति विग्रहः तस्य बुद्धेरित्यर्थः तत्रेति तत्र बुद्धिमत्स्य वैकत्वे
साध्ये तस्यानित्यप्रयत्नस्यः प्रयोजकत्वेनोदासीनबुद्धेर्नि
ष्टिविप्रसंग इति भावः तदभेनप्रबंधेन पोबुद्धिमत्पूर्वकमि

त्तिसाध्यंप्रतिजानीतेतेदनुकूलतथापरितृप्तः सुखान्तुसकर्च
कमितिप्रधानीभूतकृत्यप्रधानीभूतबुद्धिमत्पूर्वकत्वंप्रति ज्ञा
यतेतदानीमनित्यप्रमत्वस्योपाधित्वशंकापिनास्तीत्याहबुद्धि
मदिति नतुप्रधानीभूतकृतिपूर्वकत्वसाध्यपक्षेबुद्धिरप्रधानी
भूताकुतः सिध्येत् नहिप्रयत्नात्तत्सिद्धिः शरीरसंबंधज्ञानता
तकार्यत्ववत्त्वबुद्धिसंबंधेपिप्रयत्नागतकार्यत्वस्योपाधेः सुव
चत्वात् तथाचकृतिमात्रस्यालोकतोप्रासरत्वत आह एतेनेतिः
प्रयत्नातित्यस्यापाधथाकार्यत्वादेकैकजन्यत्वंसिध्यत्त्रितय
तमत्वमपिसिध्यति आर्थस्तुसंमाजः अतएवज्ञानादित्रय
व्यतिरेकान्तकानन्यतिरेकऽकिंत्वेकैकव्यतिरेकादितिव्य
र्थविशेषणत्वेनविशिष्टव्यतिरेकोनहेतुव्यतिरेणकव्याप्य
इतिनहेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियो
गिनएवसाध्यगमकत्वादित्ययास्तेज्ञानाधेकैकजन्यत्वस्ये
वसाध्यत्वात्तथैवव्याप्तिरितिभावः तत्रेतिः ज्ञानायेकैक
जन्यत्वेसाध्यइत्यर्थः तस्येतिप्रयत्नगतकार्यत्वस्येत्यर्थः
किंचयदिप्रयत्नेनबुद्धित्वेत्यत्यर्थमेवापेक्ष्येततदाप्रय
त्नगतकार्यत्वमुपाधिः स्यात्तन्नचैवप्रयत्नस्यनिर्विषय
त्वेनज्ञानविषयेषुकार्यजनकत्वमितितदर्थवध्यपेक्षा
स्यादेवेत्याहनचप्रयत्नइतिः तथापिनिसाबुद्धिः कुतः
सिध्यतीत्यत आहनित्येचप्रयत्नइतिनहीतिबुध्यमित्य
त्वेनहेतुशरीराद्याकृतदभावेशरीरव्यतिरेकनस्यादिति
कदृटपिसा। बुद्धिर्नेज्ञायेतेत्यर्थः अनित्यप्रयत्नाजन्यासा

क्षित्यादेरेककर्तृकत्वे च साध्ये शरीरत्वेऽन्यत्ववद्व्यर्थविशेषणत्व
मित्याह शरीरजन्यत्ववदिति॥ तर्काशुद्धिश्च यदि अविकलतर्के
प्रणिधानस्तदान्येषां परीश्वरः कर्त्ता स्याच्छरीरी स्यादित्याद्य
दीनां तर्काणामीश्वरसिद्ध्यसिद्धिव्याघातेनाभासत्वान्न दूष
णत्वमित्याह तर्काभासतयेति अथानुकूलतर्काभावरूपासा
नत्वमाहानुकूलाभावादिति॥ कर्तुः कारणस्याभावे कार्यं न स्यादित्य
नुकूलतर्क इत्यर्थः ननु कर्त्रभावेऽपि कारकान्तरव्यापारात्कार्यं
स्यादित्यत आह कारकव्यापारेति कारकान्तरव्यापारे प्रति चे
तनव्यापारस्याहेतुत्वात्कर्त्रभावे सोऽपि न स्यादित्यर्थः कारका
न्तरव्यापारसत्वेऽपि कर्त्रभावे कार्यं न स्यात् किंचित्कारणाभा
वस्य कार्यानुत्पत्तिव्याप्यत्वादित्याह कारणेतरेति सोगत्वम
त्माह यस्मिन्निति कृतिमात्रकार्यमात्रयोरन्वयव्यतिरेकाभ्यां
व्याप्तिग्रहस्तन्मते व्यापककृतेः सत्वेऽप्ययोग्यकृतेर्वेषविरे
कानिरूपणात् यदि च कृतिमात्रेण व्याप्तिग्रहात्तदुपकर्तृ
सिद्धिस्तदा वह्निमात्रव्याप्यधूमाददृश्यजठरादिवह्नि
रपि सिध्येत् शाखाकम्पे च योग्यस्यापि सिद्धिरिति वायोः का
रणताग्रहश्च स्यादित्यर्थः कृतिविशेषकार्यविशेषयो
रन्वयव्यतिरेकग्रहो बाधकं विना कृतिमात्रकार्यमात्रयो
र्व्याप्तिग्राहो यायो न तु पक्षधर्मताबल्यविशेषयोरेवंवा
दिग्रहः यथा वह्निधूमविशेषयोरन्वयादिवतात्सामान्ययो
रपि व्याप्तिग्रहोऽन्यथानुमानमात्रोच्छेदप्रसंगादित्याह प्र
सक्षानुपलम्भादिति॥ अन्यथावाकप्रति आलोकवतर

कु॰ वृ॰
६६
66

६६

वाग्नेः कंपप्रतिरूपवत्त एव दंडादेः प्रत्यक्षानुपलंभाभ्यां का
रणत्वनिश्चयाद आलोकात्मकस्य जठर्येदंहनस्यातिरस्कृ
पस्य पवनस्य कथं सिद्धिः स्यादित्याह नचेदेहमिति उदा
ह्दनयोः पूर्वोक्तयोरित्यर्थः दहनपवनयोरनालोकनिरस्त
रूपयोः कुतः सिद्धिरलोकरूपवह्नेरेव तद्व्यतिनिश्चये सती
तिः पूर्वोक्तयोरित्यर्थः दहनपवनयोरनालोकनिरस्तरूपयोः कु
तः सिद्धोजनी आलोकरूतएव वह्नेर्धूमोन्यतितिश्चयेरूपवत
एवहस्पादर्लोष्टादेः कंपनिश्चयेच सतीत्यर्थः अदृश्यवह्नेर्धूमा
नुमानेः पवनमात्राद्वकंपानुत्यत्तेस्तत्र दृश्यत्वमेवतंत्रमिति
न धूमाद्दृश्यवह्निसिद्धिर्नवाकंपात्पवनमात्रस्यानुद्भूतरू
पस्य सिद्धिरित्याह यद्यपि निकारणत्वासिद्धावपि प्रकारांत
रेणकार्यलोपप्रसंगं वक्तुमाह तत्कथ्यतेरिति न तन्पाधिवि
धननमेवकथमित्यत आह एतद्वेति प्रतिबंधादेरितिः श
शेपशुत्वाद्दृश्यशृंगवाधेप्ययोग्यशृंगसिद्धिः स्यादित्यादे
रित्यर्थः वस्तुनो विपक्षबाधकाभावाद्यास्यभावइत्यर्थः
प्रकृतादृर्थान्तरत्वं शृंगत्वस्य योग्यसंस्थानव्याप्यत्वेनायोग्यं
शृंगंविरोधाद्धंकिंतु मस्तकं शशेशृंगस्यात्यंतमभावइति
सर्वेषामवाधितप्रत्यक्षबाधश्चेतिभावः ततएनप्रतिवं
धासिद्धेरेवेत्यर्थः अप्रसंगः शशशृंगादेरितिशेषः दत
मितिकार्यस्याहेतुकत्वेकादाचित्कत्वानुपपत्तिरित्यादिने
त्यर्थः नचागमादेवेश्वरसिद्धौ तत्रत्नत्वायप्रदर्शनव्यर्थ
मित्यत आहार्षमितितर्कानुसंधानंविभाव्यधर्मोपदेशवा

त्यर्थमेवनिश्चेतुमशक्यामित्यर्थः यद्वा आगमाविरोधं न्यायस्या
ह आर्षमिति अस्य न्यायेनागमविरोधः अपितु तत्संवादः य
तोऽस्तन्यायेनुनेवमित्याह तमिममिति निश्चयहीनेति व्यवहितान्वे
सनेनोपसर्गसंज्ञाविधानादिति भावः एतेनेति ब्रह्मादिशरीरम
धिष्ठायेश्वरस्तज्जनीत्यर्थः खल्वपीति निपातसमुदायस्तुशब्दार्थे
न इत्यर्थे वर्तते समुच्चयार्थः समाधो विश्वविदक्षय इत्यनेना
न्वीयत इत्येकः साध्यत इत्यर्थे वर्तत इत्यर्थः एवमग्रेऽपि आयुज्य
ते संयुज्यतेन्योन्यद्रव्यमनेनेत्यायोजनं द्व्यणुकारंभकसंयोगज
नकर्मसर्गाद्यकालीनपरमाणुकर्मात्रविवक्षितं तथाहि स्वप्रयत्ना
देवतेषां स्यात्तदा परमाणूनामचेतन्यात्तु पपत्तिरित्याह स्वातं
त्र्य इति पदं च प्रयत्ननिरपेक्षादृष्टादेव तत्स्यात्तदा द्व्यणुका
दीनामपि तत एवोत्पादः स्यादिति हेतुं तच्छेदेद इत्याह भावादृष्ट
मिति चेत्तत्व्यापारसहितात्तत्स्यादिति भावः तथा च सर्गाद्य
कालीनद्व्यणुकोत्पादककर्मस्वसमानकालीनप्रयत्नजन्य
कर्मत्वाच्चेष्टावदिति भावार्थः विपक्षे किं बाधकमित्यत आह तद
त्वभाव इति हेतोश्च तत्व्यापारस्यान्यत्रोपलब्धस्यात्रावैक्रि
यारूपफलाभाव इत्यर्थः ननु चेष्टारूपक्रियाविशेषस्तथा न
तु क्रियामात्रमित्यत आह विशेषस्त्विति चेष्टा हि भोक्तृगतप्र
यत्नस्य प्रयोज्यान्तु प्रयत्नमात्रस्येत्यर्थः तकोपधार्थमानमा
ह परमाणवा इयोहीति आयोजिताः उत्पादितकर्माणः प्र
वृत्तास्तेकार्यमात्रमारभंत इत्यर्थः विशेषणीभूतकर्मपक्षकेपूर्वद
र्शितानुमानेनान्यर्थं विशेषस्त्वित्यादि निराकर्तुं चेष्टात्वमु

पाधिमाहः क्रियाविशेषेति॥ तस्येवेति प्रयत्नवदात्मसंयोगासम
वा।येकारणकक्रियात्वमेव हि परमाणुक्रियाणां चेतनायोजि
तत्वं साध्यं तच्च नोपाधिः साधनव्यापकत्वादित्यर्थः विषेतिवि
षभक्षणादिक्रियाया अदृष्टमरणादिव्यापकत्वादित्यर्थः इष्टेति
विषभक्षणानुकूलक्रियाया अपीच्छाविषयविषभक्षणादिव्या
पकत्वमस्त्येवेच्छां विना तत्राप्यभावादित्यर्थः उभयथापीतिप
रमाण्वादिक्रियायास्तत्कर्तुरीश्वरस्यास्मदादेश्चेच्छाविषयार्थ
हेतुत्वादित्यर्थः तथाच साधनव्यापकत्वादनुपाधित्वमिति
भावः साध्याव्यापकत्वमप्याह भ्रांतेति भ्रमप्रयुक्तस्पंदस्येश्वर
ज्ञानाप्रमापकत्वादनिष्टशुक्तिपरिहारकत्वाच्च तत्र साध्याव्या
पकत्वादित्यर्थः नच रजतत्वेनेच्छाविषयस्य शुक्तेः व्यापकत्वम
स्त्येवेति वाच्यं येन रूपेणेष्टत्वं तद्रूपेण व्याप्तेर्विवक्षितत्वादिति
भावः मतेति वाय्वादिनामूर्तशरीरक्रियायां साध्यापत्तिरित्यर्थः
एतच्च समव्याप्तोपाध्यभिप्रायेण मते तूपलक्षणं जीवच्छरी
रस्यापि वायुवशात् क्रियायां तथात्वमिति भावः विषमव्याप्तोपा
धित्वपक्षे तु शरीरावयवक्रियायां साध्याव्यापकत्वं नेत्रेति
इदमपि दूषणं समव्याप्तोपाधित्वपक्षे विषमव्याप्तोपाधि
त्वपक्षे तु शरीरावयवक्रियायां साध्याव्यापकत्वं स्पर्शवदि
न्द्रियत्वादित्यदस्तु स्पर्शदूषणं पुनरेवं नजेय्य इति नोक्तदोष इ
त्यर्थः ज्वलनेति त्वन्मते ज्वलनादिक्रिया न प्रयत्नजन्या
कित्वदृष्टवदात्मसंयोगजन्येत्यतस्तत्रापि समव्याप्तोपाधि
पक्षे साध्यापत्तिरित्यर्थः चेष्टयेवेति चेष्टाश्रयः शरीरमिति लक्ष

पापक्षेन्योन्याश्रय इत्यर्थः लक्षणांतरे तु करादिक्रियायां साध्या
व्याप्तिरित्यर्थः सामान्येति अतो नोक्तदोष इति भावः तत्र मानमाह
यत्न इति क्रियामात्रे येति क्रियामात्रस्यैवमयात्रयत्नजत्वात्तुमा
पकत्वांगाकारादित्यवृत्तिमनेन साधीतिः सिध्यतीत्यर्थः वि
शेषस्येति क्रियाप्रयत्नयोः सामान्यतः कार्यकारणभावनिश्चये
सध्याव्यापकत्वमावश्यकमिति भावः ननु परमाणवो नर्थेत
नाधिष्ठिताः प्रवर्तेते शरीरेतरत्वादिति सत्प्रतिपक्षतास्यादि
त्यत आह एतेनेति शरीरेतरक्रियाया अदृष्टान्वाभावान्नोक्तप्र
पन्नजन्यत्वंतिर्कांतो। क्रियामात्रेतु प्रयत्नजत्वं स्यादेवेत्यर्थः परा
मदेवेत्यादिनापरकीयविचारे आगमविरोधप्रदर्शनं क्षित्या
दाविति क्षित्यादिकं प्रयत्नजनितं गुरुत्वे सत्यपतित्वादित्यर्थः वि
हगादिसयुक्तद्रव्यांतरेण व्यभिचारनिरासाय तत्साध्येतभाव
पनियरंपरपाचेति तत्रदृष्टांतमाह वत्सपुक्केति एतेन यथश्र
धारकप्रयत्नधृतत्वव्युत्पादनेन व्याख्यातामुख्यार्थपरतये
तिशेषनविंद्रादिदेवतातेदप्रतिपादकागमस्यमुख्यार्थता
याम भेदप्रतिपादकागमविरोध इत्यत आह सर्वावेशेति॥
आवेशो ज्ञानादिमसंयोग इति वक्ष्यति तच्चावेपीति। पवनप्र
तिबंधकसंयोगभेदस्थितिः अत एव वायुसंयोगादाकाशेय
त्रस्थितिवत्स्यादित्यपास्त अनुपाधित्वादितिः साधनव्या
पकत्वादिति भावः आऽप्रायेनः विशेषवानिति प्रायेणेत्यर्थः
किमिदं शरीरत्वं यत्साक्षात्प्रयत्नाधिष्ठितत्वे परमाणूनां प्रस
ज्यत इत्यादिनोवेत्यर्थः धत्याग्दरित्यादि पूदसंत्याख्यमाह

संहरणादिति: ब्रह्मांडादीति ब्रह्मांडादिकं जनकप्रयत्नसमानका
लीनचरमकार्यनाशप्रतियोगीति साध्यार्थः सकृदभ्यागतीति प
रमाणुमात्रावशिष्टावित्यर्थः ननु नाशविशेष एव प्रयत्नपूर्वकोस्म
त्स्वन्यथापि भविष्यतीत्याशंक्य तत्समाधानं दुवाण एवग्रंथ
लाघवात्पवनादिष्वमाणेष्वतिदिशति कार्यत्वादिति यथाधृति
विनाशयोः कार्यकारणभावो विपक्षे बाधको निरुपाधित्वग्रा
हकस्तथा यदस्यापि स एव तद्ग्राहक इत्यर्थः न चादिमत्वमुपा
धिः प्रलये विच्छेदादिनादिमत्वाभावेन साधनव्यापकत्वमि
त्याह विच्छेदेनेति प्रत्यवादेशिनिप्रत्यपादिहेतु यद्यपि पूर्ववत्का
र्यकारणभाव एव विपक्षबाधक इत्यर्थः ककवाचो मनुष्या
: स्वतंत्रोतिलिंगज्ञानीयव्यवहारानुपजीवित्वं पुरुषस्य स्वातंत्र्यं
साध्येषु क्रमेण दृष्टांताः नियुयोसादि आदिमानिति सादिव्यव
हारत्वमुपाधित्वमित्यर्थः अन्यथापीति स्वतंत्रपुरुषं विना
पीत्यर्थः तथापीति पूर्वपूर्वसर्गेपि तज्ज्ञानीयव्यवहारस्येश्वर
पूर्वकत्वादस्मादित्वे न विरुध्यत इत्यर्थः इदानीतनापूर्वव्यव
हारस्य सादित्वेपि नाभवस्यानादित्वं हीयत इत्याह नहीति तद
नादित्वमेव प्रायेण हीयत इत्यतः आदर्शेतिय षबदारं दृष्टाम्ब
वान्हियते सोपि नास्तीत्यर्थः शरीरान्वयेति ईश्वरस्यादृष्टाभा
वेपि तच्छरीरसाध्यहेतुकास्मदादिभोगसंपादकादृष्टादेवेश्व
रस्य शरीरोत्पत्तिरिति भावः पितामहस्येति अस्य ब्रह्मणो ह
मेव पित्रादिरित्यर्थः यदि त्वहमेवेति परिस्पष्टं नवद्वैतं पं तदा
लोकाः स्युरिति । नोकाः प्रामाणिकाव्यवहरता उत्सीदेयुरिति व्य

वहितेनान्वयः अत्रहेतुर्ममवर्त्येनिएतेनेतिघटादिव्यवहारस्यस्व
तंत्रपुरुषपूर्वकत्वव्यत्यादर्नेभकुलालादिदेहवतईश्वरस्य
नथाभावादित्यर्थः प्रसपपदंसमाभ्यासएकंभक्तसंबंधितद्वि
षयर्थप्रामाण्यंलक्षणतीत्याहप्रत्ययशब्देनेतितथात्वेतिआ
गमस्यसंप्रदायः प्रवाहः प्रयात्वप्रयोजकवाक्यार्थप्रमारूप
गुणाजन्यः पर्थाचैविरव्याप्यपिवादिवक्तृगुणाजन्योवाप्रमाण
शब्दत्वातलौकिकप्रमाणशब्दवदित्यर्थः लक्षणायीजंसं
बंधमाहनहीतिनचप्रमाणत्वमसिद्धंप्राप्राण्याज्ञानेपार
लौकिकेकर्त्रणिवेदबोधितेप्रेक्षावतांनप्रवृत्त्यनुपपत्तेरित्याहनचे
तितथापिनेनक्तगुणपूर्वकेणेवभाव्यमित्यसिद्धमित्यतआ
हनचस्वतइतिव्याप्तिहेतुः सार्वज्ञकुनः सिध्यतीत्यतआह
चेतितयाहीतियद्यपिपरैः सर्वज्ञानगीकारमभ्युपगीतंत्वंपरं
प्रत्यसिद्धंतथाप्यात्मन्तमसंसारिवृत्तिजातित्वात्घटत्ववत्ः स
चासंसारीकिंचिधकप्रणेतापुरुषत्वादितिसाध्यप्रसिद्धौव
संसारिपुरुषप्रणीताइतिसाध्यंनचास्यदापच्चुरितवेदव्य
भिचारः वेदज्ञानजन्यज्ञानजन्यत्वस्यसाध्यत्वादितिभावः
विरुद्धत्वादितिप्रतारकवाक्यस्याप्यदृष्टविषयत्वादित्यर्थः
अनुपलभ्यमानेतिः मन्वादिवाक्येवेदस्येवमूलान्तरस्योपल
भ्यमानत्वादित्यर्थः ननुवाक्यत्वमसिद्धंसमुदायस्यानप्रतिपा
दकत्वातनचशाखासमुदायोवेदः तस्यवेदनिरूप्यत्वातनापि
महातनानांवेदाकारानुगतव्यवहाराद्वेदत्वेजातिः देवदत्तजी
यत्वाद्यनुमापकशब्दवृत्तिजातिभिः संकरप्रसंगात्नापिस्व

र्गकामादि शब्दः स्मृत्यादेरन्यथात्वात उच्यते। शब्दनद्युपजीविप्रमा
णातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दाजन्यवा
क्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वं। ईश्वरप्रमाया अजन्यत्वा
द्दूरार्थस्यानुमानादिविषयत्वेप्यनुमानादेर्वेदोपजीवकत्वात्।
स्मृत्यादीनां वेदसमानार्थत्वेपि शब्दजन्यधीजन्यधीजनकत्वाद्
दर्थप्रतीत्यलक्षणत्वमनात्। वाक्यादिभिः संगृहीतहेतुं व्याचष्टे।
अन्वयमो वेति। ननु किं पौरुषेयत्वं तदर्थधीजन्यत्वं; तद्द्वा
रणधीजन्यत्वे वा अव्यापकं तदुभयजन्मत्वेन सिद्धसाधना
त् नापि स्वतंत्रपुरुषप्रणीतत्वं इदानीं पठ्यमानवेदे तदभावा
त्। न च स्वतंत्रपुरुषप्रणीतसजातीयत्वं साध्यं भारतस्मृत्यादौ व्य
भिचारात् न तज्जातीयस्य स्वतंत्रपुरुषप्रणीतत्वाभावात्। तत्त्वप्यर्थ
प्रतीत्यनदर्थपरतया प्रतिसंधीयमानपदत्वं पौरुषेयत्वं अ
र्थज्ञानवताध्यापके न सिद्धसाधनात्। अत्राहुः सजातीयोच्चा
रणानपेक्षोच्चरितजातीयत्वमपौरुषेयत्वम् आद्यस्मृतावपि त
ज्जातीयत्वान्नान्यभिचारः। यद्वा वेदत्वं सजातीयोच्चारणानपेक्षो
च्चरितवृत्तिप्रमाणतावच्छेदकवाक्यधर्मत्वात् स्मृतित्ववत्। न्य
शादिति यशोविष्णुः। ननु वेदे कर्तृस्मरणमर्थवादतयानमानं।
कार्यान्वितज्ञानजनकस्यैव पदस्य शक्तिग्रहादित्याहार्थवादे
नि आदित्योवै यूप इत्यादेरर्थवादस्य मुख्यार्थत्वे बाधकाप्र
णीतत्वात्स्तुतिपरत्वेपि प्रकृते बाधकानां निरासाद्विध्यर्थ
स्यापि मुख्यार्थत्वमेवान्यथा यन्न दुःखेन संभिन्नमित्यादे
रपि स्वार्थपरित्यागप्रसंगात्। कालिदासस्मरणेपि ध्यना

वानत्वनेनकार्यस्याथकर्तृकत्वप्रसंगात संकर्तृकत्वे वा तत्रैवायं हेतु
रनेकांत इत्याह कर्तृस्मरणस्येति प्रमाणांतरेणेति वेदानपोरुषेय
ः प्रमाणांतरागोचरार्थत्वात् यन्नैवं तन्नैवं यथा संवादित्वा क
मित्यर्थः यदि वेदप्रणेतृप्रमाणांतरागोचरार्थत्वं हेतुस्तदा त
स्योनुराश्वरस्यप्रत्यक्षगोचरार्थत्वादसिद्धिः अथ यस्य कस्या
पि प्रमाणांतरागोचरार्थत्वं तदानैकांतिकमित्याह प्रणेता
रमिति अनैकांतिकत्वं स्पष्टयति आकस्मिकेति दृष्टकारणोपहा
रविनाजातस्मितस्य यद्बीजं सुखानुस्मृतिरूपं कारणं तस्येत्य
र्थः सर्वज्ञो वेदवक्तावसंभावनास्पदं वाक्यार्थज्ञानसामर्थ्यरहि
तत्वादित्याह वक्तैवेति ईश्वरो नातीन्द्रियार्थदर्शी पुरुषत्वान्न-
ज्ञानं वा नातीन्द्रियविषयकं ज्ञानत्वात् तन्मनो नातीन्द्रियेष्वव
र्तनेमनस्त्वादित्याद्यः प्रयोगाः प्रागेव निरस्ता इत्याह वेलतत
स्येति अपि सामग्र्यभावात्कार्यज्ञानाभावेपि अकार्यज्ञानं न नि
वर्त्तत इत्याह नित्येति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादुपा
धित्वं स्यादित्याह प्रमाणांतरागोचरार्थत्वेन शब्देतरप्रमाण
गोचरार्थत्वं विवक्षितं मानांतरगोचरार्थत्वं वाः स्थूलभ्रमा
नांतरगोचरार्थत्वं वा आद्ये मन्वादीति द्वितीयमाशंप
वनिराकरोति प्रयुज्यमानेति तत्रीयं शकतोस्त्वेवमिति
मलमूलिभावः उपजीव्योपजीवकभावः अयमपि सा
ध्याव्यापकत्वात्साधनव्यापकत्वान्नोपाधिरित्याह उक्ते
निः यणेतभ्रूलभ्रूव प्रमाणांतरागोचरत्वस्यासिद्धेरन्ये
प्रत्यनैकांतिकत्वादित्यादिनेसर्थः द्व्यणुकादिपरिमा

णामनेकवृत्तिसंख्याजन्यंतस्याश्चद्वित्वादयेक्षाबुद्धिजत्वाति
रतस्तदाश्रयद्वित्वरइतिसाधयितुमाहद्व्यणुकेतिकार्यगुण
त्वादितिकार्यद्रव्यनिगुणत्वादित्यर्थः ननुद्व्यणुकेपरमाणुपरि
माणादेवत्र्यणुकेचद्व्यणुकपरिमाणादेवपरिमाणोत्पादो
पपत्तौकिंद्वित्वादिसंख्ययेत्यतआह नवेति आकाशपरि
माणावृत्तिविशेषः यदिचेपरः परममहत्परिमाणमेवतस्मी
कुर्यात्तदाहेत्वंतरमाहाणुपरिमाणत्वादिति एवमपिनात्रमनः
परिमाणंदृष्टांतस्तयोरापकदाचिदारंभकत्वात् अथमवा
णुपरिमाणस्यजनकत्वाभ्युपगमाच्चात्यथानित्यद्वित्वसं
ख्यायाअप्यजनकत्वापत्तेः तथापिप्रमाणबलेनमनसो
णुत्वंसाधयिष्यामीतितत्परिमाणमेवदृष्टांतइतिभावः
अन्यथेतिकालादिमनसापरिमाणस्यपरिमाणजन
कत्वेनेद्रव्येद्रव्यानारंभादनाश्रयंपरिमाणंजायेतेत्यर्थःबा
धकांतरमाहद्व्यारम्भकस्येति अणुपरिमाणंयदित्र्यणुके
महत्त्वारंभकंद्व्यणुकेपिस्यादविशेषादित्यर्थः अणुकेपिवा
द्व्यणुकवदणुत्वापत्तिरितिभावः यदित्र्यणुकेमहत्त्वारंभकं
वदुः त्वंतदात्रैवाणुत्वंमनादत्यवद्वित्वसंख्यायाआरंभकं
त्वसिद्धेर्व्यणुकपरिमाणस्यानारंभकत्वंसिद्धमित्याहतत्रे
तिननुद्व्यणुकपरिमाणेकाविज्ञानिरस्तिनहि शिष्टाणु
त्वंमहत्त्वजनकामतिनोक्तदोषइत्यतआहाणुत्वमेवेति ए
वंमहत्त्वंनमहत्त्वारंभकंस्याद्व्यभिचारेणकारणत्वाभावा
दित्यर्थः यद्वा किमणुत्वंमहत्त्वमेवजनयतिकेचिदणुत्व

पिब्रानत्राघमाशंक्यं इष्टापत्ति अणुत्वमेवेति अंशं द्रूषयति अ
णुत्वमहत्वयोरिति अणुत्वमहत्वयोर्विरुद्धजातीयत्वान्योन्यप
रिहारेण स्थितेरयं भिवारेणैकमव्यारंभकं स्यादित्यर्थः ननुकार
णभेदात्कार्यभेदः स्यादित्यत आह वकुभिरयीति यदि न संख्या
कारणां किं त्वणुपरिमाणमिति शेषः परमाणुकार्यस्येति का
रणवद्गत्वं स्यान्यत्र महत्वहेतुत्वकल्पनाद्व्यणुत्वमेवदे पादित्य
आहाप्ययेनित्थासातित्रित्वादिसंख्यावैपथ्यपित्तिः अणु
द्वपारब्धापेक्षयातद्विशिष्टारब्धोविशेषाभावादित्यर्थः प्र
त्येः कव्यभिचारादकारणत्वं स्यादिति भावः नन्वणूनां संख्या
वैचित्र्यमणुपरिमाणतारतम्यभेदमपारनोयद्योगिपरि
माणेवांतरथरणभेदव्यंग्यजातिभेदात्वबभिचारस्यत आ
हाणुनएवेतिवथापितारतम्ये संख्येव प्रयोजिका संख्याभे
दं विनासमुदायभेदकांतराभावादित्यर्थः परमाणुकार्ये मि
हत्वअसंग इत्यत्रेष्टापत्तिमाहास्त्विति· त्रिभिः परमाणुभि
रित्यर्थः महत्वइति अनन्ययासिद्धान्वयव्यतिरेकाभ्यांत
थैवकारणत्वनिर्णयादित्यर्थः ननु द्व्यणुकादिपरिमाण
स्यपरिमाणाजन्यत्वेपिप्रचयजन्यत्वं स्यात्तस्यापि महत्वे
कारणत्वादित्यत आह नचेति अतोनेकेति· अत्रेदं मं
त्वं अणुकमहत्वं न परिमाणजन्यं संख्याप्रचयाजन्यमहत्वं
प्रत्यवयवमहत्वेन कारणत्वात् महत्वप्रचयपरिमाणत्वेन पर
माणुपरिमाणात् द्व्यणुके महत्वापपत्तेः नापि जन्यावय
वपरिमाणत्वेन गौरवात्· नापि जन्याणुत्वेन तथाऽदृष्टं

नात· महत्त्वविशेषो नियतहेतुकत्वापत्तेः महत्त्वांतरजाति
कल्पने च गौरवं घटत्वकार्यत्वं च प्रामाणिकं एवं द्व्यणुक
परिमाणं न महत्त्वजनकं अणुपरिमाणत्वात् परमाणुपरिमा
णवत्· अन्यथा तस्य महत्त्वजनकत्वे द्व्यणुकस्यापि महत्त्वप्र
संगः किंत्ववयवबहुत्वं परिमाणं यथा जन्यमहत्त्वे अवयव
बहुत्वेन कारणत्वकल्पनात्· एवं द्व्यणुकपरिमाणं नाणु
परिमाणजनकं परमाणुत्वात् अणुपरिमाणं वा न परिमा
णजनकं अणुपरिमाणत्वात् द्व्यणुकपरिमाणवत् परंतु
मपरिमाणत्वेन न जनकं व्योममहत्त्ववदिति तन्न अवयव
नित्यपरिमाणस्य जनकत्वाभ्युपगमात्· अन्यथा त्रित्व
ति संख्याया अप्यजनकत्वापत्तेः अतो द्व्यणुकपरिमाणं
संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाण
त्वादित्यवयवबहुत्वाभावाद्द्वित्वमेव जनकं· यदि च त्र्यणुक
जनकपरिमाणं परिमाजन्यस्यात् महाकारणपरिमाणापे
क्षयोत्कृष्टं स्यात्· महज्जन्यमहत्तरमहत्त्ववत् इ अणु
तराणुतमत्वापत्तिः उत्कर्षश्च न कारणापेक्षयाधिक
देशत्वं येनेष्टापत्तिः स्यात् किंतु वरत्वं तत्कारणपरिमाण
वाचकवाच्यत्वं तच्च वृत्तिनिमित्तजातिमत्त्वं वा नतु पर
माणुद्वित्वं न परिमाणजनकं नित्यवृत्तिसंख्यात्वात् अ
णुवृत्तिद्वित्वत्वात् व्योमद्व्यणुकवृत्तिद्वित्ववत्· एवं द्व्य
णुकवृत्तिबहुत्वं न परिमाणजनकं अवयववृत्तिबहु
त्वात् परमाणुबहुत्ववत्· यथा त्र्यणुकमहत्त्वस्याणुज

कु. वृ.
७२
72

न्यत्वे द्व्यणुकस्यापि महत्त्वप्रसंगस्तथाणुवृत्तिसंख्याजन्यत्वे
ऽपि घणुकस्य महत्त्वप्रसंगः यथा च परिमाणस्योत्कृष्टपरि
माणजनकत्वाद्यणुनरत्वप्रसंगस्तथा सख्याया अपि समा
नाधिकरणोत्कृष्टपरिमाणारंभकत्वप्रसंगः मैवं समो द्वे
परमाणुवृत्तिद्वित्वं घणुकवृत्तिवहुत्वयोरभिहावाश्रयासि
द्धेः सिद्धे धर्मिग्राहकमानवाध्यमानः तु अथ द्व्यणुकपरिमा
णं महद्वित्वजन्यपरिमाणत्वात् अणुके महत्वे नाणुवृत्तिवहु
त्वजन्यं महत्वात् परिमाणत्वाद्धेतिचेन्न अप्रसिद्धद्वित्ववहुत्वज
न्यत्वनिषेधे साध्ये सिद्धसाधनात् अप्रसिद्धत्वनिषेधे सा
ध्याप्रसिद्धिरिति संख्येव तज्जनिकेति वयं सांप्रदायिकास्तु
द्व्यणुकपरिमाणासमवायिकारणताग्राहकमानं घणु
परिमाणं विषयीकुर्यात्तदा परिमाणद्वयासमवायिकारण
त्वे गौरवमिति द्वित्वमेकं विषयीकरोति पद्वाएकत्वस्य परि
माणानारंभकत्वे सजातीयनिरूपितोत्कर्षाभावश्च प्रयत्वं प्र
योजकं तत्त्वपरमाणुपरिमाणेपि तुल्यमित्याहुः केचन व
स्तु कारणपरिमाणवत्कारणानेकवृत्तिसंख्याप्यनण
घनुविधानात्परिमाणे हेतुः यं यस्तु संख्याभिरपेक्ष
परिमाणकारणत्वनिषेधपर इति समादधुः तद्यस्या
सारितिश्वरापेक्षा बुद्धेर्निसत्त्वाद्विनाशेपि तद्वत्या
दित्वाद्वित्वादौ नैमित्तिकनाशेनाशृङ्खिभावः जाते
हीति महत्वोत्पत्तेः पूर्वं द्व्यणुकस्याप्रत्यक्षत्वेन लिंगा
भावादित्यर्थः अत्र कार्यत्वमुद्देश्यत्वं उद्देश्यश्च तात्पर्यं

तद्विषयत एव वेदस्यप्रामाण्यं नच परिशेषाद्रूढिरिष्टासाचवेदा
र्थेनासादादानामितिदायेश्वरसिद्धिरित्याह उद्देश एव विवेदस्या
पोजनासमर्थं नाम्नावेनयोजनं व्याख्यानं न चास्मदादानां सर्व
वेदार्थज्ञानं नतिष्क प्रवृत्तिहेतुरिति तद्व्याननयाईश्वरसिद्धिरि
त्याहापाख्येति ईश्वरादिपदानांसर्वतेनित्यज्ञाने वेदादेव शक्ति
ग्रहात्तेनापि तत्सिद्धिरित्याह ईश्वरादिपदमिति लोकवेतिलो
किकदृष्टान्तेव्याप्तिग्रहादित्यर्थः वृद्धव्यवहारेण कार्यान्वितेप
दार्थेपदानांशक्तिः कार्यान्वयस्यविधिसमभिव्याहृतस्य
साक्षात्तदसमभिव्याहृतस्य च परंपरयेति मतमाश्रिव्या
हाम्नापस्येति भाव्यार्थस्य साध्यस्यपयापथ्यं भक्ष अ
पथ्यंन — — क्षात — — उस्योयस्य साक्षात्कार्यान्वयज्ञाना
त्स्वतंकलनिवर्तकत्वे भूतार्थस्यसिद्धार्थस्यः पयापरिणति
स्वरसमाम्रफलंपरिपातिविरसंपनसमितिवाक्यस्यनदृभा
यातनभक्षणाभक्षणकार्यत्वेवासर्थग्रहात्स्यस्यरयात्तथात्व
मित्यर्थः तदुपपादयति विधिशक्तिरिति कार्यत्वशनजन
नेपिप्रवृत्तोयपिकं प्रवृत्तिविषयेत्यापेक्षपाभ्राशक्यशनं
तदुपसहकार्यलाभो विधिशक्तेवसादस्तल्लाभक्षोतंभनं
तत्सहकारित्वेमानमाह प्रशस्तेहीतिः पदार्थवाक्यार्थाभ्यां
भेदपितुयस्तोति· तत्रेतितदेवपरेपस्यस्तुमादिवाक्यस्ये
ऋत्रपरपदार्थविकल्पयतिसाध्यमितितवदिदमितिइदं
वाक्यमित्यर्थः ननु वाक्यार्थस्य वाक्यरूपप्रमाणासाध्यत्वे
रितन्निष्टफलसाध्यतयैव तत्साध्यतास्यादित्यत आह

फलस्येचेतितस्यद्वितीयविकल्पएवप्रवेशादिभिभावः तारस्या
वीतिसाध्यफलभागितयातीरस्यापिसाध्यत्वमित्यर्थः स्वरूपे
तिप्रवृत्त्याद्येतात्पर्याभावेपितीरस्यतात्पर्यविषयत्वादित्यर्थः
पदवाक्ययोरितिस्तुत्यादिवाक्यस्यपदार्थवाक्यार्थभिन्नेप्र
वृत्त्यादावपितात्पर्यावद्व्यापकत्वादित्यर्थः नचपदार्थज्ञान
जनकत्वंपस्यतस्यतत्रतात्पर्यमितिवाच्यं धूमोस्तीतिवा
क्यस्याग्निज्ञानाजनकत्वेप्यग्नौतात्पर्यानवद्व्यापकत्वादि
तिभावः नहीतिप्रयोजनंवक्तुश्श्रोतुर्वेत्यर्थः यत्रवक्तुस्ता
त्पर्यंतत्रशब्दस्यप्रामाण्यमितिस्थितेराहशब्देतिः अतिप्र
संगमेवाहयस्येति॰ तथाचतात्पर्यभेदेनवाक्यभेदः स्यादि
तिभावः तदर्थेतिशब्दस्ययोर्थस्तस्ययत्साध्यंप्रतियाघंस्य
वापेक्षितंतत्त्वंरभतुतदसाध्यमपीत्यर्थः कार्येतिसाध्यंज
न्यंशप्यवाउभयस्याप्यनेकत्वात्तथापितात्पर्यभेदाद्वाक्य
भेदएवस्यादित्यर्थः नचप्रकरणादिनातात्पर्यनियमात्त
वाक्यभेदापत्तिः प्रकरणंहिनसाध्यंनियमयतिअशक्य
त्वात् नहिधूमजिज्ञासमानस्यप्रतीयमानधूमाद्वह्निहे
तुकप्रतीतिवन्मशकादिनिवृत्तिर्भवतिप्रतियमयति
अशक्यत्वात् नहिधूममिजिज्ञासमानस्यप्रतीयमान
धूमाद्वह्निहेतुकप्रतीतिवन्मशकादिनिवृत्तिर्भवतिप्र
तिपादकाभिप्रायनियमेनचसिद्धंवेदस्यसकर्तृकत्व
मितिभावः वेतनेतिः एकएवार्थः सर्वेषांचेतनानामपे
क्षितइत्यत्रनियामकाभावाभिन्नभिन्नार्थापेक्षायोता

स्वर्पभेदाद्वाक्यभेदास्यादितिभावः वेद इति तद्दर्शन इति शेषः
तथैवेति लोके हि पदानां स्वतंत्राभिप्रायपूर्वकतया स्वार्थप्र
तिपादकत्वदर्शनाद्वेदेपि तथात्वं तत्पूर्वकत्वेनैव युज्यते: नच लौ
किकशब्देभ्यो वैदिकाः शब्दा अन्य एवेति लोकमर्यादातिक्रमः
स्यादापत्तेर्नेनैव न्यायेन लौकिकानामेव शब्दानामर्थविशेष
शक्तिग्रहाद्वैदिकानां तन्निन्नत्वाद्ग्रहात्तच्छक्तिकत्वादर्थप्र
तिपादकत्वप्रसंगात्तएव यएव लौकिकास्तएव वैदिकास्त
एव चामीषामर्था इत्याद्यूरिति भावः ननु देशयश्यत्वने
च्छाविषयत्वं किंतु वक्तृत्वं नर मेवेत्यत आह सचेति लोके त
थैव निश्चयादित्यर्थः वैदिकानीति ननु सर्गोपकालीनवैदि
कवाक्यपक्षतायामाश्रयासिद्धिरिदानीन्तस्य तस्य पक्षत्वे ध्ये
त्रास्मदादिनैवार्थोन्तरत्वं स्वरूपाख्यानपरपुष्पस्थितिवाक्येचा
नैकांतिक अत्राह्वः नैदिकप्रशंसावाक्यानि वेदसमानविष
यकतात्पर्यपूर्वकतात्पर्यविषयकाणि सतात्पर्यकवाक्यत्वा
तल्लौकिकवाक्यवदित्यत्र यदि स्ववेदेतत्स्वतंत्रपुरुषाभिप्राय
पूर्वकस्तीभरतार्थो श्रुतार्थायसा शब्दः कान्या न इति शङ्कानवा
घात इत्याहापिचेति: ननु मा भूत् श्रुतार्थायसा शब्दकल्प
नं योग्यार्थकल्पनयैवोपपत्तेः मैवं क्रियाकारकपदानामन्यो
न्योपस्थापिभार्थान्वयबोधकत्वनियमक्लृप्तत्वात् अन्यथा गौः
कर्मत्वमानयनं कृतिरित्यत्रापि गामानयेत्यस्मादिवान्वय
बोधापत्तेः पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिशब्दसमभिव्या
हारविनाचतदर्थानुपपत्तेश्च न च स्पृहयतिपदार्थयोग एव

चनुर्थीसाधुः पुष्पाभिज्ञतीन्यत्रापि चतुर्थीपभेस्तयापिस्व
पंस्मृतानामेवयोग्यासन्नसाकांक्षपदानांश्रुतपदैःश्रुतैका
र्थप्रतिपादनेनात्यर्थकल्पनंश्रुतार्थापत्तिविषयास्यादिति
चेन्नः वेदे परस्परसमभिव्याहृतपदानामेकार्थप्रतिपाद
नेनात्यर्थोयत्रधेस्तस्यचोच्चारणाभिप्रायान्यतरनियतवि
षयत्वेनोभयथापीश्वरसिद्धिरित्याशयेनाहगत्यंतराभावादि
तिकार्यत्वादिकारिकायांधृत्यादेरित्यपिव्यभ्यस्तेसचेतिश्रु
तः श्रोत्रेणसाक्षात्कृतोधीतोशनांवयथार्थकाधतःसाप
नाभ्यातेनदृढसंस्कारः तद्विपरीतः विनैवाध्ययनंज्ञातसकल
सांगोपांगवेदार्थः अध्यापितधारितादिवेदार्थोवाकदाचि
दितिवाधनिशसायएकदेशदर्शिभ्यातवेदाच्छिष्याणांश्रद्ध
याप्रवर्तमानानांनिश्चलानुष्ठानत्वप्रसक्तीत्यतेकांनिकमित्युत्त
रं अनुष्ठात्रिति अनुष्ठातॄणामव्यवस्थितमतित्वाभावादि
त्यर्थः अव्यवस्थानादिति अर्थनिश्चयस्येतिशेषः अन्यथा
त्वनियतमनुष्ठानंस्यादित्याहाव्यवस्थावेतिः अर्थनिश्चया
व्यवस्थानादित्यर्थः अनादेशिकत्वात् अनौपदेशिकत्वा
दित्यर्थः ननुपूर्वेषामेवस्वतंत्रवेदार्थज्ञानंप्रमाणमाधुनि
कानांचप्रमाणंस्यादित्यतआह नहीतिनवकश्चिद्वेदार्थोस्ती
त्यनेनरूपेणास्मदादिभिरेवव्याख्यानादनुमानेसिद्धसाध
नंयेनरूपेणवेदार्थोव्याख्यातस्तिलोकेव्यवहारस्ताद्रूप्ये
णव्याख्यानस्याविवक्षितत्वात्पद्यावेदाध्याख्याभावकृ
लतद्विषयाभित्यानानभिज्ञदानसमानविषयवाक्यत्वा

नवेदाएत्वहिषयातित्यज्ञानान्यज्ञाताः धूनाधनवाक्यत्वादि
तिभावः अविगानेनेति निरर्थकत्वपाद्यसिध्यभावेनेत्यर्थः अ
नएवस्तोभैर्नव्यभिचारः निरर्थकत्वेनैव तेषां प्रसिद्धिरिति
भावः यथास्वगर्यदे विधिशेषीभूतार्थवादाच्छक्तिग्रहस्तथा
प्रकृतेपीत्याह निर्णयइति अर्थं धादमाहोतमइति । यववरा
हादिवदिति यवमपश्चन्तभैवतिवाराहीचोपानरतं वैतसे
कटेप्राजापत्यसंधिनोति इत्यत्रयववराहवेतसशब्दाः किंक
वापसर्जहकानांनांवक्ता उतदीर्घशूकशूरवंतुलानामिति म्ले
छार्य्यव्यवहारदर्शिनां हिपतिपत्तौसुरव्यार्थानुव्यवसायेनान
नुष्ठानायसातप्रदववेदेप्रामाण्यसंशयेपूर्वपक्षः व्युसतिग्रा
हकव्यवहारावि शेषात्कग्वादावपिथलिरेवपिकनेननाभर
सपदेपुच्छेम्लेछप्रसिद्धेरादव्येतिशङ्कातस्तुवसमभेसर्वेसस्या
नीजायतेयत्रशालनः मोदमानास्तुतिष्ठंतियवाः कणिश
शालिनः वराहंगावोनुधावंति अप्सुजोवैवेतसइत्यादिवाक्य
षरूपवेदविरोधितान्म्लेछप्रसिद्धेर्हेयेति श्लेछप्रसिद्धेर्निर
स्तापीनिः प्रसिपक्षार्यव्यवहाराच्छक्तिग्रहः यत्रतुवेदवि
रोधोनास्तितत्रपिकादिपदेछभियोगवत्वानलेछनातत्प्र
सिद्धिरेवादरणीयेसर्थः प्रकृतेविधिशेषीभूतवाक्यशे
षमाहसर्वज्ञनेतित्वधिः स्वभोगेच्छाविरहः अलुप्तशक्तिः
नित्यः प्रयत्नः अंगानिधर्माः यद्यस्मच्छद्वयोचारयितृ
रिशक्तिस्तदावाच्यस्तत्वयामहद्यवनादित्यादौकविरेवास्मच्छ
ब्देनोच्येतेसनतुलं स्यात्तंच्येतिपेनिः अन्यकर्तृकत्वेनोबा

रणाभावः स्वातंत्र्यं· अत एव ग–मित्वा सौभगत्वा येत्यादावपि ने
श्वरवाचकत्वं अन्यपरत्वेपि वेश्वरेणोच्चारितत्वात् अस्मच्छ
ब्दत्वादिति अनन्यपरास्मच्छब्दत्वादित्यर्थः तेषामिति कर्मणय
च्छब्दादीनामर्थकथनं को धर्म इति अथातो धर्मजिज्ञासे
त्यनेन शास्त्रप्रयोजनमभिधाय विशेषेण धर्मव्याचिख्यासोः
शास्त्रारंभे शिष्यजिज्ञासामुपादाय मीमांसाभाष्यको धर्मः कथं
लक्षणकः कान्यस्य साधनानीति प येत्यर्थः एतेनेति किंशुप
क्रमादीनाकर्ने धर्मत्वकथानेन गर्हाविस्य परवेदानुशपादीनां
नर्क धर्मत्वादित्यर्थः लोके लिङादीनामासेच्छायां शक्तिग्रहा
द्वेदेपि स एवार्थः न च ववेदार्थे स्मदादीच्छासंभव इति तदाश्रये
श्वरसिद्धिरिसाद लिङादीति निपोगोभिप्रायः अन्येषां लिङ
र्हीत्वे बाधकस्य वजव्यत्वादित्यर्थः प्रवृत्तिरिति· अन्यत्र श
नादिरविप्रवृत्तिपदवाच्यत्वेप्यत्र कृतिरेव साविवाक्षतेत्यर्थ
स्तथा च कृतिकारणेच्छाहेतुज्ञानविषयो विधिरित्येषां मतं
स्वमतमाह न न्यायक इति यथाचासेच्छाविषयत्वेन वत्सेक
ज्ञानविषय इष्टसाधनत्वमनुमीयते तथा च वक्ष्यते नयरमत
निरासं वितानभवतीति तन्निरएकर्तुमाह प्रवृत्तिः स्वल्विति· वि
धिकायाविधिज्ञानकार्येत्यर्थः आत्मेनिचेष्टाविनापि विध्य
र्थसत्त्वादित्यर्थः नत एवंति इच्छामात्रेणैव विध्यर्थनिर्वाहेव
ट्टविवक्षायायाससाध्यायागायकरणप्रसंगादित्यर्थः आ
त्मज्ञानेति मोक्षकामस्य ज्ञानविधाने भूतेपुद्द्याभिधाने च
चेष्टाया अभावेपि फलस्य सत्वादित्यर्थः आरभो यत्नः तत्व

त्यापनार्थमिति शास्त्रस्य ज्ञापकतयास्वरूपसद्भावो शास्त्रानुपयो
गादित्यर्थः नहिदं परमतनिराकरणं विनानसिध्यतीतदर्थं तद्दु
पमस्यन्ति· सहीति· कर्त्तृधर्मः प्रवृत्त्येपुरुषधर्मः स्पंदइच्छाप्रय
त्नो वा कर्मधर्मो अपूर्वस्य क्रियायावाधर्मः कार्यत्वादिः करणा
धर्मइष्टसाधनत्वं शब्दव्यापारो भावनादिर्वा नियोक्तृधर्मआ
ज्ञाभिप्रायस्तत्र स्पंदस्य विधित्वं दूषयति· इष्टपतिइष्टहाने
रिति अन्यास्यतिव्याप्तिम्यामित्यर्थः फलस्य विधित्वं दूषय
ति अप्रवृत्तेरिति फलमात्रस्यानिष्टसाधनसाधारण्यात्तत्
ज्ञानमात्रात्प्रवृत्तेरित्यर्थः इच्छाया विधित्वे बाधकमाह वि
रोध इति· इच्छाया विधित्वे तयैव तज्जननाद्विरोध इत्यर्थः
नचेच्छाज्ञानात्प्रफलजननी किंतु सतयानश्च लिङ्· श्रवणका
लेसामग्रीत्याहासत्त्वादिति· नचलिङे·वतां जनयतितत्र ज्ञा
नकारणत्वापाणायत्नेः निष्ठां विनापीच्छोत्पत्तेश्चेत्याह प्रत्यपे
ति उपायगोचरइप्रवृत्ताविष्टसाधनताज्ञानस्य हेतुत्वनिश्चया
त् तत्संकीर्णेच्छायाः संकल्परूपायाः प्रवर्तकत्वे लाघवादिष्ट
साधनत्वेव विधिरित्याह सकरादितिकरोतीत्यत्र यत्नस्य कृ
धातुनैवोक्तत्वादाख्यातमात्रस्य यत्नार्थत्वे यौगा। कृत्वस्या
दिविरव्यातमात्रं गलमभिधत्ते किंतु लिङेवेत्याह नचेति
ननु पचतिप्रभृत्यर्थातिरिक्तोनाख्यातार्थस्तदा तस्य योगो व्य
र्थ इत्यत आह संख्येति एकत्वादिसंख्यामात्रमाख्यातार्थस्त
त्स्यापनार्थमेव तस्य योग इत्यर्थः नहीति ङोन फलोर्थः कु
भादित्यत्र यौनकृत्वापत्तेः अयाख्यातात्कृतेरुपस्थितावपि

तात्पर्याभावात्तानाचापत्तेः किंतु संख्यामात्रं तर्हि करोतीत्यादावपि
तुल्यमित्याह यत्नमात्रस्येति अपि च कृतेर्धात्वर्थत्वेपि प्रत्ययस्य
तदर्थत्वे दोषाय प्रकृतिप्रत्यययोरन्यत्र समानार्थत्वदर्शनादित्या
ह नचेति एकस्य प्रकृतिरूपस्य अन्यस्य प्रत्ययरूपस्य तद्विषयेपि तत्त
द्वाचकत्वमित्यर्थः अयेक इत्यादेरत्र कृत्यर्थातिरिक्तं द्वितीयमे
कत्वादिकं ए द्विषियतीत्यत्रापरेच्छाप्रत्ययार्थस्तत्करोतीत्यत्र
यत्नं तरभेदवाख्यानार्थ इत्यस्ति इत्याह तत्रेति । ननु द्वितीयसं
ख्येच्छायत्नानुभवात्मना प्रकृतिप्रत्यययोः साम्येनान्वया
नुपपत्तेरित्यत आह प्रत्येकमिति । तथा चोभयोरपि स्थिरे तव
श्यकत्वे नैकस्याननुधेय्य दोषादित्यर्थः रथो गच्छतीत्यादावपि
· आदिपदाज्जानाति पततेर्निद्रातीत्यादेर्ग्रहणं तत्र धात्वर्थानुकू
लयत्नाभावेप्याख्यातप्रयोगात् यदि चाचेतने भाषाइमात्रमाख्या
तार्थस्तदा चेतनेयत्नोपपत्तेर्व्यर्थः कृधातोर्थयत्नार्थत्वस्योभयसि
द्धत्वाद्चेतने करोतेः प्रयोगो लाक्षणिकस्तथा रथो गच्छतीत्याद
वाख्यातस्येत्याह तत्त्वमिति लिङ्ख्यात्मविषयं गर्भकत्वेन तत्सातेकार्थ
ताज्ञाने हि द्रव्यवहारे पाशालिग्रहास्तस्य यत्नार्थत्वे मानमस्तिन
त्वाख्यातमात्रस्येत्याह लिङ् इति पचति पाकं करोतीत्यादेर्य
त्नार्थकककरोतिना सवाख्यातविवरणात् व्यवहारादि व
धकं विना विवरणादपि व्युत्पत्तेः किं करोतीति यत्नविशेष
प्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विनानुपपत्तेश्च प्रकृते मान
मस्तीत्याह विवरणादेरिति ननु धातोः स्वरूपेणास्वार्थभावभा
हाख्यातपावनाकर्मेक्षणं निश्चयेन कले सिध्यतिता वतिव

तेते ओदनं पचतीति दर्शनात्· नत्वेकेन कर्मक्षणेनौदनः सि
ध्यति अतः स्वार्थो व्यापारसमूहो भाव्यता भावनेत्युच्यते भाव्य
मानस्य तस्य फलसाधकत्वात्· अनुकूलत्वं तु विशिष्टफलवा
च्यत्वे तु कल्पना गौरवमिति शंकते तथापीति तावन्मात्रपर
मिति धात्वर्थस्य फलानुकूलतामात्रपरं न तु फलपरमित्य
र्थः ओदनं पचतीत्यत्र धात्वर्थः पाक ओदनानुकूल इत्य
र्थे काष्ठैनोदनं पचतीतिवदोदनं पाकेन पचतीति प्रयोगप्र
संगः न चेष्टापत्तिः किं करोति पचति पाकं करोतीत्यनुभ
वस्य सार्वलौकिकत्वात् कर्तृत्वयात्नुपपत्तेश्चेति यत्परिहरति भ
वेदप्येवमिति एवमप्यनुकूलव्यापारमात्रस्य वाच्यतार्थोस्तु
न त्वनुकूलफलस्तथात्वे बाधकं विनैवाख्यातमचेतनेषु गौ
णकल्पमिति गौरवमित्याह तथापीति फलो यो कं करोतिनाख्या
तार्थस्य विवरणात्तस्य बाधितत्वात्समासावतो गौरवस्यापि न्यो
प्यत्वादित्याह नियमेनेति तनुकरोतिनं पत्रार्थः किंत्वनुकूलव्या
पारमात्रार्थः यत्नोप्यनुकूलत्वेनैवाख्यातार्थो न्यथाख्यात
स्य फलपरत्ययपित्तायत्तेः अत एव पत्व एवाख्यानार्थः आ
नुकूल्यं त्वन्न फलभ्यामित्यपास्त एवं च धात्वर्थस्य पाकादेः
साध्यताधारत्वापयपघलेव च धात्वनैव स्वार्थः साध्यत्वेनो
च्यत इति वाच्यं याकर इत्यत्रापि तत्प्रतीत्यापत्तेः फलस्य
वाच्यत्वेन गौरवापत्तेर्मुख्ये बाधकं विनैव स्योगच्छतीत्यादा
वाख्यातस्य गौणत्वापातान्वेत्याह यस्य कस्यचिदिति क्रि
यात्वमात्राविशेषेपि फलजन्यत्वा अन्यत्वप्रतिसंधानेन घ

ण्कुरयोः कृताकृतव्यवहारात्· नञ्ञ् तकृधातुप्रत्ययान्तकर्तृपद
स्य कृसाश्रयवाचकत्वाद्वकृत्रोपन्नार्थत्वं क्रियामात्रार्थत्वे तु क्रि
याश्रयः कर्तृपदार्थः स्यादिति कारकांसत्रेतिप्रसंगः एवं कृ
त्रोः पूर्तार्थत्वात्से तचाख्यातविवरणात्तस्यापि फलार्थकत्वमि
त्याह कृताकृतेति कृतिः करोत्यर्थः एवमाख्यातस्य फलप
र्यायत्वापत्तिनिरस्यति पूर्वेति॰ परस्मिन्नुत्तरकालवर्तिनि
धात्वर्थे सैव कृतिरेव पूर्वासाधनीभूताभावनेत्युच्यते तेन फ
लसाधनीभूतः प्रयत्नो भावनासैधाख्यातवाच्याः यद्वा फला
नुकूलधात्वर्थपूर्वापरव्यापारजनिका पूर्वापरस्मिन्पूर्वापरी
भूतत्वे सति कृतिराख्यातार्थाभावमांभाव्यते फलमनयेति व्यु
त्पत्त्येत्यर्थः नन्वेवं पूर्वापरीभूतत्वं फलत्वमनुकूलत्वं चेति त्रि
तयमाख्यातवाच्यमितिवद्भावेकथमाख्यातमचेतनेषु प्रयु
ज्यत इत्यत आह नथाचेति यत्नस्य पूर्वापरीभूतत्वानुकूलत्वे
प्रवृत्तमाख्यातं धात्वर्थस्य फलानुकूलतामात्रे रथोऽछे ग
तासारे प्रयुज्यते लाक्षणिकमित्यर्थः समुदितप्रवृत्तस्य
पदस्यैकदेशे प्रयोगे निदर्शनमाह विशुद्धिमात्रमिति·
श्रोत्रियं श्छंदोधीत इत्यनुशासनाच्छंदोध्येतब्राह्मणव्य
क्तिः जन्मना ब्राह्मणो ज्ञेय इति स्मृ मेजैकसंस्कारविगासमु
दायवद्ब्राह्मणव्यक्तिर्वा श्रोत्रियंपदशक्या अतो विशुद्धमात्रे
यथा लक्षणया प्रयोगो विशिष्टस्य तत्पदस्याविशेषयोः शक्य
संबंधिनिनासर्यादित्यर्थः ननु शक्यैकदेशे प्रयोगो न लाक्ष
णिकः उपस्थितो हि विलक्षणा विशिष्ट शलपदाद्धि शिष्टो

पस्थितो विशेषणमप्युपस्थितमेवेत्ययोग्यतया विशेष्यांशम
पहाय विशेषणांशस्य मुख्यार्थत्वेऽप्ययमुपन्नेव भेदः नस्य धर्म्यंतरा
न्विनत्वेनोपस्थितस्येतरधर्म्यंतराक्षिप्तया खंडतत्र तदुपस्थित्यर्थ
लक्षणाया आवश्यकत्वात् अत एव पुरोडाशकपालेन तुषानुपव
पतीत्यत्र पुरोडाशप्रयोजनकत्वेनोपस्थितस्य कपालस्य
प्रयोजनांतराकांक्षितत्वात्। स्वतंत्रकपालोपस्थितये धि
ष्टानलक्षणा यं पंकजं कुमुदमित्यत्र पद्मत्वेनोपस्थितस्य पंक
जनिकर्तृत्वस्य धर्म्यंतरनिराकांक्षत्वात्· कुमुदपरत्वे पंकज
पदस्य लक्षणेति विवेचितं द्वितीयाध्याये अपि चाचेतने पुरु
षेत्राख्यातस्य गौणत्वं माभूदित्यभिमानिनस्तत्पदस्याख्या
तवाच्यत्वानभ्युपगमस्तत्तद्वाप्यापन्नितमित्याहामथापी
ति· मध्यमोत्तमपुरुषलिङः संबोध्यकर्तृविषयत्वात्तत्र
स्याद्देवत्तस्य योगप्रथमपुरुषे जानातीत्यादि प्रयोगश्चाचे
तने· न स्यात्। इत्यते प्रयोगोऽस्त्यात्मन्मतेरयो गच्छतीत्यादि
रपि प्रयोग इत्यर्थः न चादेवदिपदवदनेकार्थत्वमस्मादि
पदवैधर्म्येणेकत्रैव वाचकता न्यत्र वृत्त्यंतरेणापि प्रयोगो
पपत्तेरित्याह न चेति· अत्रैवानुभवप्रमाणयति अत एवे
ति अतियावपीति श्रमाच्छयानस्य थमश्लेते· पाकानुकू
लत्वादित्यर्थः कर्तृरूपत्वव्यवस्थयेति व्याचष्टे अपि चेति। प
स्यमापारधातुराख्यातं वा प्राधान्येनाभिधत्ते स्वतंत्रश्चे
तनो चेतनश्च कर्तेत्यत्राभिधानयदि विशेषयां तत्राह न
हीति तत्र कर्तृपरप्रयोगाद्रवगते कर्तृत्वे न शब्देन तदभि

धात्वंतेन च कर्तृत्वावगम इत्यन्योन्याश्रय इति भावः अथाभिधा
नमुपलक्षणमुपलक्ष्यता च न योग्यतातत्राह भावीति योग्य
तावच्छेदकरूपाज्ञानेन तस्या अज्ञानादित्यर्थः न च प्रधानक्रि
यानुकूलव्यापारवत्त्वमेव तदवच्छेदकमित्याशंक्येत्याह फ
लेतिः फलानुकूलव्यापारकत्वपायत्कारकविवक्षते सकर्मेति
नोक्तदोष इति मतं निरस्यति नापीतिः ननु स्वव्यापारे सर्वेषां
कर्तृत्वमिष्टमेवात्र करणत्वादीत्याह स्वव्यापार इति तर्हि
तिः प्रधानक्रियापेक्षयैव यत्कर्तृत्वं करणादिव्यावृत्तं तत्
स्यैव किं लक्षणमित्यर्थः स्वातंत्र्यादिति स्वतंत्रः कर्तेति पा
णिनिलक्षणादित्यर्थः तस्यान्यस्य व्यवस्थापकस्याभावा
त्तज्ज्ञानचिकीर्षेति समृत्वापित्वमेव तद्धीत्याह नन्वि
ति पादत्रयस्य प्रागेव विवृतत्वादंतिमपादं व्याचष्टे नहीति न
त्वयत्नत्वमित्यर्थः अप्रयत्नस्याप्यनुकूलत्वाभ्युपगमे तेन वा रथो
गच्छतीत्यादिवदपि गौणं स्यादित्यर्थः तस्या इति संख्यापासं
ख्येयमात्राक्षेपेऽपि न प्रयत्नाक्षेपः प्रयत्ने संख्यापाऽभावा
दित्यर्थः कर्त्रेति आख्यातवाच्येनेत्यर्थः परमते न तस्याख्या
तवाच्यत्वात् केचित्तु द्रव्यमात्रं द्रव्यमात्रस्याख्यातवाच्यत्वात्त
तेन प्रयत्नस्याक्षेपादित्याह द्रव्यमात्रस्येति नापि व्यापा
रवन्मात्रं प्रयत्नरहितस्याप्यचेतनस्य व्यापारवत्त्वात् फल
रूपव्यापारवदभिकाने तु प्रयत्नोऽपि वाच्य एव स्यादित्याह
व्यापारवत्त्वं विवक्षितमिति श्रीक्षेप इति विशेषः पूर्वमिति पदवती
त्याह विवधात्वर्थानुकूलफलानुभवादित्यर्थः ननु समा

यानित्यत्वे पूर्वापरीभावो विरुद्ध इत्यत आह भावनेति विवद् संभावा
दिति ओदनं पचतीत्येव इत्यत्र यदावंरेणानुपस्थापनादित्य
र्थः अस्माकं त्वनुकूलत्वं यत्वोपाधौ व्याप्योग्यतया सनान्नीय
त्व इति भावः नहि धातुनैकभावनीयइकार्थो मिथो प्रयुक्त इत्याह
न खल्विति विश्रुतकत्वाधातुनेत्यर्थः फलस्य धात्वर्थतया पच्य
र्थो विक्लित्तिर्लघ्वंशस्तदनुकूलकोव्यापारो धः सन्तापना
दिः न चैवं व्यापारविगमे फलसत्वकाले पचतीति प्रयोगाप
त्तिः धात्वर्थानुकूलव्यापारसत्वं स्याख्यातार्थत्वपाकव्यापार
काल एव पचतीति प्रयोगात् अथैवं धात्वर्थतया फलक्रियेति
तं डुलादेः कर्मत्वानस्यात् विक्लित्त्यादिजन्यफलभागित्वाभावादि
ति चेन्नः परसमवेतव्यापारफलशालिनः कर्मत्वात् सच व्या
पारो धात्वर्थ आख्यातार्थो वोभयथापि परसमवेतव्यापारशा
लिनः तण्डुलादेः कर्मत्वात् विक्लित्त्यनुमादव्यापाराविगमद्शा
यां पाकोवर्तते इत्यत्र शाकपदे व्यापारत्वस्य गेति मत माश्रित्योक्त
मिदं अन्यथेति यदि धात्वर्थमेव भावनाभिधापकत्वमित्यर्थः
प्रकृतीति प्रकृतिप्रत्ययद प्रत्ययः प्रथमान्तयोरुभयोरपि शु
द्धत्वादिति यदि कार्यत्वयानकारकार्यत्वं व्यापारवतः कारकत्वे
न कारकार्थस्य भावनार्थत्वसंभाव्येत्वापीर्थः कथमिति उं द
न मित्युक्ते भावनाविशेषजिज्ञासा तत्सामान्यज्ञानविना न
स्यादिति कर्मपदादाक्षेपलोभिधानतो वाध्वस्य कीतहृप
स्थितिरित्यर्थः पचतीत्युक्ताति कमपदस्त आरोपित
दभिधानाक्षेपयोरभावपचतीसत्रभावभाधीनस्यादिति

भावनाभिधायकमाख्यातपदं कल्प्यमित्यर्थः ननु बीजेनांकुरः कृ
तो बीजमंकुरं करोतीति फलं विनापि कृञः प्रयोगात्तस्य फलं वा
अः नापि कर्तृपदप्रयोगिकं तथा सति कृञो फलार्थत्वेन चैत्रस्य कर्तृत्व
त्वे धात्वप्रत्ययार्थयोः कृतिकर्त्रोः परस्परमनन्वयापत्तेः कृतिविशि
ष्टस्य कृतिविशिराकाङ्क्षत्वात् एवं कृञः क्रियार्थत्वेन च चैत्रस्य तदाश्रय
वाचकत्वेन तयोः परस्परमनन्वय एवेत्युभयदर्शनेन कर्मपदवत् क
र्तृपदं तदमेवः तथा च न कृञा कृतिविभागेन कर्तृरूपव्यवे
स्थापाकृञो फलार्थ इति तेनेन विवरणादाख्यातस्य फला
र्थत्वं किंत्वनुकूलत्वेन व्यापारस्तद्वाच्यः तेन चैत्रश्चैतन
पो धात्वर्थानुकूलव्यापारवत्वादाख्यातप्रयोगो मुख्यः
न चैवं पथि श्रमशयानेपि पचतीति प्रयोगापत्तिः यत्नवा
च्यत्वेपि तंडुलकर्मानुकूलफलवति पचतीति प्रयोगा
पत्तेः यदि च तस्य फलविशेषो वाच्यस्तदा भमापि व्यापार
विशेषो वाच्य इत्यस्तु यत्र धीस्थाक्षेपात धात्वर्थविशेष
स्य पाकादेस्तेन विनानुपपत्तेः न चाख्यातस्य फलो वाच्यः
पचतीत्यस्य पाकफलवानिति विवरणादिति वाच्यं तथा स
ति कर्तुरपि तद्वाच्यतापत्तेः नहि पाकफल इत्येव विवरणं
अथ तात्पर्यविवरणाशेषादिना निर्वाहस्तुल्यः यत्नपि अ
न एवरथोगच्छतिविपत्तेर्ज्ञातरत्यत्र तभावनानुभवः भाव
नापाधात्वर्थान्वयायोग्यं यत्नयात्वपापितत्र गोणत्वागी
कारादिति अत्र वदंति चैत्रः पचतीत्यत्र पाकानुकूलफला
नुभवात्तस्य एवाख्यातवाच्यो लाघवान्नतु कलोव्यापारः

फलत्वजात्यपेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात्
न चाचेतने व्याख्यानस्य मुख्यत्वार्थमनुगतो व्यापार ए
व शक्य इति वाच्यं शक्तिग्राहकेण लक्षणिशक्तिग्रहात् मु
ख्यत्वार्थे लौकिकत्वेनेष्टत्वे रथो छेदापत्तेः मम पाकस्य फ
लसाध्यत्वानुमित्या फलस्यापि लाभादन्यलभ्यत्वेन तस्या
ख्यातवाच्यः चैत्रः पचतीत्यत्र चैत्रः पाकानुकूलवर्तमा
न फलवान्मलापनेन च पाकस्य वर्तमानफले न व्याप्तिरहिते अ
तीतादौ व्यभिचारात् नापि धात्वर्थेनानुमितेः फले आख्या
तेन वर्तमानत्वान्वयबोधः संभवी फलस्यापदार्थत्वात्
स्वार्थव्यापारवर्तमानत्वबोधने नाख्यातस्य पर्यवसितत्वा
च्चेन वा अचेतने आख्यातस्य व्यापारवाचकत्वावधारणा
देवं कल्पनेऽपि तुल्यं गौणतया शक्तिभ्रमेण तत्राख्याताद्व्या
पारावगमोपपत्तेः पचतु विगमदशायां तु अन्यव्यापारका
ले पचतीत्यत्र वर्तमानव्यापाराभिधानमाख्यातेन ल
क्षणया स्यो गच्छतीति यथा अनन्यलभ्यत्वाच्च तदंशे धे
न व्यापारे शक्तिः अन्यथा तवापि पक्वकाले पचतीति न
स्यादिति ननु धात्वर्थानुकूलफलस्याख्यातशक्यत्वे एक
क्षणकाले पचतीतिवत् तत्कृतेर्ध्वंसे भिन्ने कृतेरनुत्याद
दशायामप्यपाक्षीत्यस्य तीति स्यात् यत्तु अवयवस्य
चरमकाले पचतीति न स्यादेव एकदावस्थाभावात् अर्थ
मनभविष्यतोऽर्थलाभावविरुद्धत्वात् फलकाले तदभावा
न्नोक्तदोष इति चेन्न ध्वंसानुत्पादयोः फलविशेषप्रतियो

गिकतयापत्तकालेपितत्सत्वात्तयोःसकलकृतिप्रतियोगिक
त्वाभावात्समेवंयभाख्यातवाच्यप्रचयेलकैकस्यवर्त्तमानव्यवहा
रनिमित्तत्वेनतत्रतावत्तांध्वंसेःप्रागभावेश्वभूतभविष्यद्व्यवहारः
नतुवर्तमानव्यवहारनिमित्तकिंचिदभावात्त्वेतनाचेतनभोज
नगमनादौतथैवप्रयोगात् प्रयोमसत्तिनिमित्तानुसरणात्
·धातोराख्यातस्यवानुकूलव्यापारवाचकत्वनादिभिरनादि
नन्यगतिकतयातथैवस्वीकाराच्चेति· चैत्रओदनंपचतिचैत्रे
णपच्यतेओदनइत्यत्रकर्त्तरिकर्मण्याख्यातार्थसंख्यान्वया
त्कर्त्तृकर्मणीलकारवाच्येनेनवाच्यगामिनीसंख्येतिनियमोभ
वति अन्यथाक्षिप्तसंख्येयमात्राचयमोनस्यादितिवैयाकरण
मतमाहाभिधीयमानेतिकारगनिरितिॐदनमित्येकत्वेनैवा
प्रस्थितेनैकत्वसंख्यान्वयविरोधइतिपचतीत्येकत्वमोदनान्वि
तंकिंनस्यादित्यर्थः पववराहादीतियवमयश्चरुभवतीत्यत्र
दीर्घशूकस्ययवपदार्थतयानिर्णीतंस्ययवैर्यजेतेत्यादौयत्रन।
वाक्यशेषस्तत्रापितस्यैवयवपदवाच्यत्वापत्तेरित्यर्थः तथाभा
वेतिआख्याताभिहितभावनायाःकर्त्रन्वयप्रसंगादित्यर्थः
तथाचोदनःपच्यतेदेवदत्तइतिप्रयुज्यतेतिभावः अन्यत्रेति
चैत्राभ्यांचैत्रैःसूपःपच्यतइत्यत्रकर्मणिसंख्यान्वयनिर्णी
तत्वादत्रापितथेत्यर्थः पचतीत्यादावपिदेवदत्तॐदनंप
चतीत्यादावपिकर्मगतैकत्वान्वयप्रसंगइत्यर्थः तत्रेतिपचती
त्यत्रसंख्यान्वयःकर्त्रापच्यतइत्यत्रकर्मणेत्यर्थः विशेषेति
क्वचित्कर्त्तरिकचित्कर्मणिसंख्यान्वयस्येष्टत्वेनान्यतरत्र

निपामकाभावादित्यर्थः पचता इति पच्यत इति दृष्टांतार्थ अतो
यथात्मनेपदाख्यातइत्यत्रकर्मणासंख्यान्वयस्तथापचतइ
त्यत्रापिस्यादित्यर्थः नचाख्यातवाच्यत्वेकर्तुस्तद्वाच्यासंख्या
यान्वयावोधोनस्यात् एकपदोपस्थाप्ययोः पदार्थयोर्मिथोन्व
यस्याव्युत्पन्नत्वात् अन्यत्रभिन्नपदोपस्थापितायामेवान्वय
वोधादित्यत आह दृश्यतेचेतियथाभाववाचकाख्याताभिधेय
संख्यातेनैवान्वीयतेनन्वाक्षिप्तेन कर्त्रा सार्काक्षयोग्यासन्नपदा
र्थमात्रस्यैवान्वयप्रतियोगित्वाद्भिन्नपदोपस्थापितत्वस्यगौरवे
णाप्रयोजकत्वात् तथाख्यातवाच्ययोः कर्तृसंख्ययोरप्यन्वय
इत्यर्थः नहाति अन्वयेवाकर्तुरनेकत्वेद्विवहुवचनयोः प्रयो
गः स्यादित्यर्थः यदिचभावसंख्ययोरन्योन्यमनन्वयस्तदा
निष्विनानन्वयपदत्वेनाख्यातमपार्थकं स्यादित्याहानन्वयइ
तियद्याक्षिप्तेनकर्त्रान्वयः संख्यायास्यात्तदात्वपितीत्यत्रैवसुप्प
तरेत्यत्रापितेनैवनदन्वयस्यादित्याहाक्षिप्तेनचानेकोहीति आक्षे
पहेतोर्भावनाभिधानस्योभयत्राविशेषादित्यर्थः मुख्यंचेति आग्ना
वैष्णवमेकादशकपालं निर्वपेत् संग्रामेसरस्वतीमप्याज्यस्या
यजेनेत्यत्राग्नावैष्णवधर्मोऽप्यनोभवत्वाखितासारस्वनछमोइ
त्यनियमे आग्नावैष्णवधर्माएवप्रथमंभवंति अत्रहेतुः पूर्वचो
दनात् प्रथमोपस्थितत्वात् अस्योदाहरणंलोकवदितियथा
लोकेयत्रविवादपदेसाक्षिद्वयसत्वान्मुख्यः साक्षीदृष्टस्तमनु
जानाति द्वितीयश्वदृष्टस्तमपलपतितत्रम यमदृष्टेनैवव्यव
हारस्तस्यमुख्यत्वात् तथाकारकाणांप्रथमैकर्मैवदेशितइ

तिबाधकंविनातेनैवसंख्यान्वीयतइत्यर्थः भावकभावावितिद्वंद्वः
त्वेनैवमुख्यंचेत्यादिनैवेत्यर्थः कर्मोवेतिः तथाययपश्यन्तेदे
वदत्त अदनमितिनस्यात्किंतुपश्यन्तेदेवंदमेनौदनइत्येनदे
वस्यादित्यर्थः यथानुशासनं आकारणसूत्रानिक्रमेणेत्या
र्थः तथाकर्तरिविहितस्याख्या तस्यसंख्याकर्त्ताकर्मणिवि
हितस्यसाकर्मणान्वेतीतिनियमउपपद्यतइतिभावः समान
प्रसघोपान्तप्रत्यासत्तेरंतरंगत्वात् संख्येयमात्रसाकांक्षापि
संख्याभावनान्वयिनैवान्वेति अग्निनाचैत्र ओदनंपचतीत्य
त्रचैत्रपदार्थस्यनिर्व्यापारत्वेनोपस्थितस्यभावनात्मकव्यापा
रसाकांक्षात्वाभावनायाश्चाश्रयाकांक्षत्वात्तेनैवभावनान्वेति
नकर्मकरणादिनाद्वितीयादिनातस्यव्यापारवत्वेनानुपस्थि
तेस्तत्साकांक्षत्वात् चैत्रेणमुच्यतइत्यत्रकर्तुर्निराकांक्षत्वात्कर्मे
णश्चाभावात् धात्वर्थेनैवसंख्याचपइत्याक्षेपादेवकर्तृकर्मणो
लाभेसंख्यान्वयनियमस्यचान्यथोपपत्तेनतेषांकारकवाच्य
तेत्याहसंख्यातावदितिशुद्धंनिर्व्यापारत्वेनोपस्थितंकर्तृक
र्मणोराक्षेपलभ्यत्वंयद्भावनाविशेष्यत्वेसतिप्रथमांतपदोप
स्थाप्यत्वनतुसंख्यालिंगकानुमितिविषयत्वंअनुमित्यासंख्या
मात्रगतत्वेनसंख्याप्रतीतेः शब्दोपस्थापितसंख्यात्वदुपस्था
प्यनैवान्वयनियमाच्चेतितन्न किंतद्व्यापारविशिष्टेनधात्वा
राश्रयणं उतव्यापारांतरविशिष्टेतत्रनाद्यइत्याहात्माश्रया
दिनि असत्वनवस्थेतिभावः पुत्रंनरमाहसमवायंप्रतीति
तदनुपयोगात् व्यापारवदनुपयोगात् भावनायाइवतत्स

मवायस्यापि शुद्धप्रातिपदिकार्थापेक्षयाभावनाविशिष्टनिरा
काङ्क्षत्वादित्यर्थः पद्यासमवायोमेलकः पलमेलकस्यपूर्वो
परीभूतभावनावाचकेनाख्यातेनैवबोधितत्वान्नतदन्वयापेक्षभा
वनांतरापेक्षेत्यर्थः नचालाश्रयानवस्थाभ्यांसजातीयोव्यापा
रवदनाकांक्षत्वेपिभावनायाद्वितीयायुपनीतविजातीयव्यापा
रकंत्साश्रक्षत्वंस्यादित्यतआह पिजातीयेतिः नथासत्यपोत्ता
दनचयापत्तिः नहिपघटानुकलव्यापारेणपाककर्तृत्वंदृष्ट
मित्यर्थः ननुशुद्धप्रातिपदिकार्थापेक्षिण्यपिभावनाकुतोन
द्वितीयाद्युपनीतेनानेतीत्यतआह नवेति· उभयोरपिस्थिताव
पिसाकांक्षेणसहान्वयोभावनायाइतिइष्टांतेनस्पष्टयति न
स्पष्टयतिनत्वर्थवदिति नचैत्रइत्यादिनाक्रमेणजातिगुणक
र्मद्रव्याणांविशेषाणांनिबंध्यत्वमुक्तं आवृताविति उभयनि
षेधेचसकृदुच्चरितस्यनभोन्यतरतिषेधेनैवनिराकांक्षत्वात
दन्यान्वयार्थमावृत्तिकल्पनेपदावृत्तिरूपवाक्यभेदापत्तिरित्य
र्थः अनाहृभाविनिसकृदुच्चरितनञोयेनकेनाप्येकेनैवचा
रितार्थत्वान्निराकांक्षत्वादित्यर्थः नावनान्वयिनैवसंख्यान्वे
तीत्यत्राभिमननियामकस्पष्टयतिसमानेनियद्यपिव्यापारा
त्मिकाभावनाव्यापारिसामान्यमात्रेपतितथापिसाकांक्षे
णैव्यापारिणाप्रातिपदिकार्थेनान्वीयते ननुनिराकांक्षेणका
रकान्तरेणेत्याहसामान्येति उभयाकांक्षामाह प्रातिपदि
कार्थंइतिपूलेनधात्वर्थेन क्रियासंबंधव्यापारसंबंधमि
त्यर्थः कटंकटेनेतिः अत्रद्वितीयातृतीयाभ्यांकारकविभ

क्रियांक्रियानुकूलव्यापारस्यैवोपस्थितेर्न भावनाकांक्षेत्यर्थः
ननु यदि स्थपितीत्यादावाक्षिप्तेन कर्त्रान्वयात्तदा सुप्यत इत्य
त्रापि तथा स्यादित्यत आह्वानत एवेति यत उभयाकांक्षानिर्व
धेनोचय इत्यर्थः भाव्यं भावनाजन्यं फलं चेत्तत्राह फलेनेति
अथ फलसर्वधिकर्म भाव्यं तत्राह फलेति धातूनामकर्मक
त्वात्तदर्थाश्रयत्वकर्तुरेवेत्यर्थः तस्य चैत्रेणेति तृतीयया क
र्तृत्वेनैवोपस्थितेर्न भाव्यन्वेनान्वयान्तरमिति भावः ननु चैत्र
स्तंडुलान्पचतीत्यत्र भावनान्वयश्चैत्रे संभवसाश्रयत्वात् चैत्रे
णापच्यंते तंडुला इत्यत्र तंडुलानां नानावहिषयत्वेन भावनान्व
यः फलस्य विक्लित्त्यनुकूलव्यापारविषयकत्वात् विषयत्वे
नान्वये वा चैत्रस्तंडुलान्पचतीत्यत्र तंडुलानाविषयात्वे भाव
नान्वयानत्तो संख्याया अपि तदन्वयापत्तेः नाप्याश्रयतया
भावनायास्तद्धनाश्रयत्वात् न च तैत्रेण भावनान्वयस्तीयार्थेन
फलेनावरुद्धतया भावनायास्तदनन्वयात् अचेत् नेवाक
र्थ संख्यान्वयनियमस्तत्र भावनाया अनन्वयात् यत्र पचती
त्येतावन्मुच्यते तत्र कथं भावनायाः कर्त्रन्वयः यत्र वा चैत्रः क
उ• पिच सोदनमिति प्रयोगस्तत्र चैत्रेणेतिवत्कर्त्रन्वेनोपस्थि
तावाकांक्षाविरहाभावान्नान्वय एक थ कर्मणि संख्यान्वयः
च्यते यत्र यद्विशेष्यं तेन संख्यान्वयस्तथा हि चैत्रस्तंडुलान्पच
तीत्यत्र तंडुलानां कर्मत्वेनैवान्वयात् तंडुलवृत्ति फलजनक।
व्यापारजनकफलाश्रयश्चैत्र इति प्रतीतेस्सविशेषाश्चैत्रेण
पच्यंते तंडुला इत्यत्रवृत्ति फलजन्यव्यापार।जन्यफलाश्रया

स्तंदुल्यः प्रतीयंतइतिफलस्यपरपरयातेविशेष्यां ः एवंपचस्तु
भपचच्चैत्रः कर्त्तातंदुलाः कर्माणस्तथापिफलविशेष्येसंख्या
न्वयाअचेतनेविरथोग्रामंगच्छतीत्यत्रग्रामवृत्तिफलजनक
व्यापाराश्रयोरथः प्रतीयतेरथेनगम्यतेग्रामइत्यत्ररथवृत्तिव्या
पारजन्यफलाश्रयोग्रामइतितत्रापिविशेष्येसंख्यान्वयः चै
त्रेणसुप्यतइत्यत्रचैत्रोभावनाविशेष्यस्तातीयार्थोवरुद्धत्वात्ः
कर्मतत्रनास्त्येवातोधात्वर्थएवभावनाविशेष्यः फलत्वाद्विष
यत्वाद्वेतितत्रसंख्यान्वयः नचप्रातिपदिकार्थभावनान्वयेपि
नसंख्यान्वयः प्रथमोपनीतसंख्यान्वयेनतस्यतदनाकांक्ष
त्वादितिवाच्यंप्रथमाख्यातास्यामेकस्याएवसंख्यायाअति
धानात् चैत्रोदंडीत्यत्रेवसामानाधिकरण्यानुरोधात्ः
अन्यथात्वन्मतेप्रथमार्थेसंख्यान्वयश्चैत्रेनस्यात् आख्याते
नैवस्ववाच्यकतसंख्याभिधानात् नापिपचतीत्यत्रपाकफल
वानितिविवरणात्कर्त्ताआख्यातवाच्यः कर्तुरन्यलभ्यत्वेनावा
च्यत्वस्थितौविवरणस्यतात्पर्यविषयत्वात् दंड्यादिसमास्य
विग्रहेणाविग्रहेणाविवरणेपितत्रशक्त्यभावाच्च: अत्रास्म
त्पितृचरणाः कृतिरूपकर्तृत्वकर्मत्वमपिलकारवाच्यंत
द्वमियोरन्यतएवलाभात् तण्डुलान्पचतीत्यत्रद्वितीयाक्ष
इवचैत्रेणौदनः पच्यतइत्यत्रान्यतः कर्मत्वालाभादित्यकुः
कर्तृकर्मकरणादीनामभिहितानभिहितत्वविशेषाभावे
कटंकाष्ठेतिचैत्रइत्यत्रविभक्तिविपरिणामेनप्रयोगः किंन
स्यादित्याह किंनितीतिचैत्रशब्दस्यपुंलिंगत्वात्प्रथमायांनद्व

यमसाधियाह चैत्रमितीति भाव्यानयेक्षिणीति॰ द्वितीयाया: कर्मत्वोक्ति धापकत्वेन भाव्यानयेरिणीभावतेत्यर्थ: निरये निकर्मककर्तृभावइति शेष: लोकइति व्याकरणस्याप्यनादि प्रयोगानुपजीव्यैवरास्वाचारव्यापकत्वादित्यर्थ: तुल्यमिति॰ अनादि: प्रयोगोस्माकत्वप्युपजीव्यइत्यर्थ: इममेवेति॰ वा लुपुत्यत्यर्थप्रकृतिप्रत्ययविभागस्यैवाभिहितानभिहितत्व स्यापिप्रसादनमित्यर्थ: वस्तुतोयस्यदस्यपस्यदप्रयोगसम भिव्याहारेसोवप्रयोगनियमस्तस्यनत्यदंविना: प्रयोगइत्य र्थ: कर्तृधर्मस्यफलस्य विधित्वेसर्वोख्यातसाधारण्येनोत्ला तिप्रसंगेसमाधिं शाकतेस्याहे तदिति॰ लडादीनां॰ वर्तमाना दिविधाननियमनह्रिङ॰ स्त्वदभावादितिनातिप्रसंगइत्यर्थ: फलज्ञानस्याप्रवर्तकतयाप्रागुक्ताप्रवृत्तेरितिस्मारणेनपरि हरनिफलपदेनेति: अ: अथलिङ्ज्ञानफल: क्रियतेपि तुपरलज्ज्ञानतत्राहफलप्रतीतिवेंति अत्रापिनहीतियोज्यं अ कर्तृधर्मइष्टेवलिङ्स्सेसत आहनचेति: प्रवृत्तिहेतुज्ञानविष यस्यलि॰ थेत्वादित्यर्थ: असत्वादितिविहरणोनिनाचलिङ॰ इ तिप्रत्ययस्यागादितिहेतुंव्याचिख्यासुर्भुमिमारचयतिनचलि डं॰ वेति॰ अर्थविशेषज्ञानमनुत्यापलिङ॰ यिनेष्ठांतनयति। अन्यथाव्युत्पन्नस्येवाव्युत्पन्नस्यापिलिङ॰ श्रवणादिष्ठा। स्यादित्याह्यार्थेतिस्त्ययेवेति इष्टंसाधनंममेतिनत्वाकुर्यामि तिय: संकल्पस्तज्ज्ञानादहेप्रवृत्तोत: प्रयोज्यवृद्धोपितत्तए वप्रवृत्तेस्त्वसंकल्पज्ञानलिङ्च्चारणानन्तरंजातमितिलिङो

वत्ताकेरणमित्यनगच्छतिप्युमप्रघभानोवातुइत्यर्थः स्वात्मनी
त्तिपलस्यपलहेतुत्वेस्वात्मनिवृत्तिविरोधइत्यर्थः इच्छायाप्रप्पे
वंविरोधोवोद्धव्यः अनेनविरोधतइतिकारिकांशोविव नः इच्छा
चसाधतगोचराप्रवृत्तिहेतुरपिनज्ञानासन्नीतिनलिङ· र्थेइत्या
हसाहीतिनचेतिलिङ्· श्रवणात्यागिच्छाहेत्विष्टसाधनताज्ञाभा
वादित्यर्थः संकरादितिकारिकांशंविवरीतुसुखादीच्छालिङ· श्रु
तिकालेप्यस्तीतिसलिङर्थः प्रफलहेतुश्चस्यादितिनिरस्यति·
फलेच्छात्विततिनिसर्गवाहित्वंनिरुपाधित्वे· अन्यविषयत्वादि
तिफलसाधनेहिपुरुषः प्रवर्ततेनफलइति· अन्येच्छायाश्चान्य
त्रप्रवृत्तिहेतुत्वेतिप्रसंगइत्यर्थः अपिचफलेच्छांशास्त्रमुत्पाद
येत्· ज्ञापयेद्वा· तत्रनाद्यइत्याहतदर्थेचेतिफलेच्छायाः फलज्ञा
नादेवोत्पत्तेस्तस्यस्याविषयकेच्छाजनकत्वनावत्वादित्यर्थः अत
एवप ज्ञातसंस्रवतितपेक्ष्यतेतदेवस्वतः प्रयोजनमितित्राव:
द्वितीयमाशंक्यनिराकरोतितदिति· किमतोयद्येवमित्यतआ
हाप्राप्तेचेति· अवकाशेवाफलेच्छायालिङैवोक्तावात्स्वर्गका
मइतिपुनरुक्तरूपसंकरापत्तिरित्याहतदभिधानइतिनन्
समानविषयकत्वप्रेच्छाप्रवृत्त्योहेंतुहेतुमद्भावएवकुतइत्यत
आहयदिचेति अन्यत्राप्यसाधनेपीत्यर्थः नियामकमाहहे
तुफलेतिफलेच्छातत्साधनंएवप्रयत्नमुत्पादयतिनान्यत्रेत्य
र्थः यदित्वरूपन्नेयहेतुफलभावः प्रवृत्तिनियामकस्तदास्व
र्गकामोयजेतेत्यादिविधिजन्यज्ञानंविनापिस्वर्गसाधनेप्रवृ
त्त्यापत्तिरित्याहज्ञातस्येति· भ्रमादसाधनेप्रवृत्त्यापत्तेश्चेति

कु०वृ०
८४
85

भावः अथज्ञातस्तदा फलसाधनेछैव तत्साधने प्रवर्त्तयतु समा
नविषयत्वादित्यात ज्ञानस्य त्विति ननु साधनविषयानेछा तस्या
निसर्गसुंदरत्वादित्यत आहायोपरिति अस्तु तर्हि साधनविषये
छायान जननीलिङ्- र्थ इत्यत आह न चेति साधनेछानलिङ्श्रुति
कालेसतीत्यर्थः ननु साधनेछायास्तत्कालासत्वेपितज्ज्ञानादेव
प्रवृत्तिः स्यादित्यात आह न चेति न चैति· साधनेविषयेछाज्ञान
मित्यर्थः यदि च साधनेछाज्ञानादेव प्रवृत्तिस्तद्वा स्वेछानुत्पत्ति
दशायामपि ततः प्रवर्त्तेतेत्याहनि ङो वेति पजेतेत्यतः सामान्य
तः साद्धनेछाज्ञानं जातं न तु स्वसंबंधिनपातादृशं चं प्रवर्त्तकम
तो नानिछन्नपि प्रवर्त्स्यतीत्याह स्वसंबंधिन पति एवं यजेनेय
स्य विध्यर्थत्वं न स्यात् तस्य स्वेछाज्ञानाजकत्वादित्याह प्रथमेति
किमर्थमितिइछाज्ञानादेव प्रवृत्तौ किमर्थोमछीत्याद इत्यर्थः
कुत इतिप्रश्नेसंकल्पज्ञानादित्युत्तरं किमर्थमित्यत्रतु प्रयत्ना
र्थमितिरिछाविशेषः कुर्यादित्यार्थकारः स्वभावतरत्तिः सुख
ज्ञानस्य स्वविषयविषयेछाजनकस्वभावत्वादित्यर्थः औपाधि
कत्वन्साधनताज्ञानजन्य इत्यर्थः संकल्पस्तु न फलत्वात्तत्साध
नमिति नेछाविषयः न च संकल्पज्ञानात्फलसाधन एवेछा।
ज्ञानस्य स्वसमानविषयकेछाजनकत्वनियमादिति भावः न
त्साधनत्वादेवेति परं परया फलसाधनत्वज्ञानादेवेत्यर्थः
तर्हीति· तथा चेष्टसाधनत्वैधविधिः स्यात्ततसंकल्पः तेनरू
पेण प्रवर्त्तकत्वादितिभावः यथासंकरादिति विहृणोति तर्ही
ति एवं लाघवादिष्टसाधनत्वैव विधिः संकल्पस्यतु तत्संकी

णत्वादित्यर्थः यदि चैनैवं तदा भोजनादावि ष्टसाधनता ज्ञानमिच्छो
त्पादकत्वस्यादित्याह अन्यथेति· संकल्पस्य प्रवर्तकत्वे शास्त्रवि
रोधं परिहरति तस्मादिति तर्हि ज्ञाहे ज्ञानमेव कर्तव्यमौ विधिर
स्त्वित्यत आह ज्ञानं चेति· तद्विषय एव ज्ञानविषय एव विधिरित्य
नुषज्यते· यदि हि विषयविशेषानवच्छिन्नं ज्ञानं प्रवर्तयेत्सर्वत्र प्र
वृत्तिप्रसंगः तदवच्छिन्नस्य तस्य तथात्वे पंविषयमुपनयत्तस्य कर्त
कं स एवार्थो विधिरितिकृतिहेतुचिकीर्षाकारणज्ञानविषयो वि
धिरित्यर्थः क्रियतइति सुत्पत्त्या कर्मपदेन यदि फलं स्वर्गाद्युच्य
ते तस्य च कार्यत्वं ज्ञात्वा प्रवर्तते तदानुयापेपि प्रेक्षते स्याह अति
प्रसंगादिति अथापूर्वस्य कार्यत्वं ज्ञात्वा प्रवर्ततेतत्तदा शाब्दा
नुभवात्पूर्वं तदुपस्थितनवा आपेः पूर्वत्वाव्याघातः तस्य शाब्दा
नुभवैकवेद्यत्वादित्याह नापूर्वमिति अस्येकथं शक्तिग्रहइति
भावः ननु कार्यत्वेनोपस्थिते पूर्वे कार्यत्वेनैव रूपेण शक्तिग्रहः
कार्यत्वविशिष्टचोपस्थितमेवेत्यत आह तदलाभादिति उप
लक्ष्यस्यान्यत्रमानांतसिद्धत्वादत्रापि तथात्वे पूर्वत्वहानिः अ
न्यथातु तदलाभइत्यर्थः यद्वा कार्यत्वादिविशिष्टे कार्ये धर्मिणि श
क्तिग्रहः वाक्यार्थानुभवदशायामयोग्यतया घटादौ निरस्तत
दतिक्तापूर्वलाभः स्यादित्यत आह तदलाभादिति तथापि नि
षिध्यापूर्वयोरलाभः स्यादित्यर्थः न क्रियापीति क्रियायाः का
र्यत्वज्ञानान्न प्रवृत्तिरनिष्टसाधनसाधारणत्वादित्यर्थः लकार
र्थं अपूर्वकारणं फलेच्छा याइतिस्वर्गादेः कार्यनाज्ञानन्नत्युपा
यज्ञानं विना न प्रवर्ततेकथं वान्यज्ञानादन्यत्र साधनप्रवृत्तिः ·

क०वं०

८५

85

दिसाध्यसाधनभावोनियामकस्तदाभ्रमात्साधनेनप्रकीर्तनेत्यर्थः
प्रमाणांतरादिति शब्देतरमानागोचरत्वस्यापूर्वत्वस्यत्वयाभ्युप
गमादित्यर्थः अनवगताविति मानांतराच्छक्तिग्रहविषयानु
पस्थितौतदसंभवादित्यर्थः अतएवेति· लिङ्गादादेवेत्यर्थः इ
तरेतिलिङशक्तिग्रहेतनोपूर्वोपस्थितिस्तदुपस्थितिस्तदुप
स्थितौचनत्रशक्तिरित्यर्थः तत्रेति पृथिवीत्वगंधवत्वयोः प्र
त्यक्षतः सिद्धोत्तदनंतरंत्रप्रवृत्तिनिमित्तत्वसंशये गंधवत्वस्योपा
धित्वेनसखंडत्वात्पृथिवीत्वस्यचजातित्वेनाखंडत्वात्तत्रैवश
षिः कल्प्यते प्रकृते लघ्वोप्रतीतौ नतथेत्यर्थः कार्यत्वमिति
वृद्धव्यवहाराद्युत्पद्यमानोवालः स्वात्मस्यवगतंप्रवृत्तिहेतुंका
र्यत्वंलिङार्थमवधारयति ततः कार्यशक्तंलिङ्गं स्वर्गकामा
मोग्यतयायागस्वर्गयोः कार्यत्वस्यकासर्गसाधनतायोग्यत
त्मध्यवर्तिकार्यत्वोपलक्षितमपूर्वमनुमापयिष्यतीत्यर्थः उ
पलक्षणंहीति यथा गंगायदं स्वार्थान्वयानुपपत्त्यास्वसंबंधि
तयाप्रतीतचरंतीरंस्मारयति यथा वाव्याप्यंव्यापकतयावग
तमापयति नतु इदपूर्वं अप्रतीतचरत्वेनसंबंधितयाव्याप
कतयावानवनंकार्यत्वंस्मारयितमनुमापयितुंवालमित्य
र्थः यथासंस्कारादिज्ञातएवस्मृत्यादिजनयतिनैवंकार्यत्व
मज्ञातमेवापूर्वंज्ञापयतिसंबंधित्वव्याप्यत्वाभ्यांज्ञानस्यैवज्ञा
पकत्वादित्याहि नहीति नत्संबंधेति· अपूर्वेणसंबंधज्ञाना
दित्यर्थः एवंचप्रागुक्तन्यायसंपातेनमप्यफलंसर्वथाऽपूर्व।
स्याप्रतीततयातत्रशक्तिग्रहाशक्यत्वादित्याहतथाचेतिस्या

पिकार्यत्वमेव लिङःप्रवृत्तिनिमित्तक्रियारूपकार्ये तु भेदाग्रहाल्लि
ङः प्रवृत्तिरित्यप्यत एवा यास्तं ज्ञानस्यैव भेदाग्रहस्य प्रवर्तकत्वादि
त्याह एतेनेति किंचेति यचेतत्स्यादौ क्रियायाअयोग्यत्वेन त्या
गाभावात्तत्क्रियाकार्यत्वमेव लिङ्पदात्प्रतीयात तद्रूपपूर्वत्वस्य
तत्प्रवृत्तिनिमित्तत्वे तदानर्थक्यं स्यादित्यर्थः प्रकृतेपीति तच्च
क्रियासाधारणमिति न्हायर्वैव्यक्तिलाभ इति भावः ननु कार्ये धे
र्मिणकार्यत्वेन रूपेण घटादावेव शक्तिग्रह संभवात् कार्यत्वंच
माभात्तयोपस्थितमेवातोन्विताभिधानदशायां स्वर्गकामयोग्यत
याघटादिकं निरस्य क्रियातोन्यस्यापि स्वर्गसाधनतायोग्यत्वलि
ङ्गावोध्यते: नचान्यत्र शक्तिग्रहो यत्र शब्देन वोध्यत इति न स्यादि
तिवाच्यं येन रूपेण शाब्दानुभवस्तेन शक्तिग्रहस्य हेतुत्वात् तथा च
कार्यत्वेन रूपेण घटादौ शक्तिग्रहे योथतादि सहकारिवशाद
प्रतीतधर्म्यन्तरं निङ्गानुभाव्यते न च स्मृतानां पदार्थानां योग्यता
दिसाचिव्याच्छब्देनान्वयो वोध्यते न चापूर्वं स्मृतिगोचर इति
वाच्यं शक्तिग्रहपदार्थस्मरणवाक्यार्थानुभवानां स्वभानप्रका
रकत्वेनैव कार्यकार्यकारणभावात् ताद्यावादावश्यकत्वाच्चन
नुष्कचित्सहचारमात्रेणाचर्यं प्रतियोगिन एव स्मृतिरन्वयबोध
हेतुर्गैरिवान्: प्रकृतेपि कार्यशकालिङिति शक्तिग्रहान्कार्या
मितिस्मृतिस्ततो यागविषयककार्यमित्यनुभव इति क्रमेण नेषां
समानप्रकारकत्वमस्त्येवे त्यभिधायाहास्त्विति यदि कार्यत्वे घन
क्रियासाधारणेन लिङः शक्तिग्रहाः स्वर्गकामयोग्यतया च क्रि
यानिरासदा उहरहः संध्यामुपासीत न कलञ्जं भक्षयेदित्य

त्रनित्यनिषेधापूर्वयोरलाभः नहितत्रायोग्यनयाक्रियास्यक्तुं श
क्यतफलाश्रवणेवन्यायसंवादनानवकाशादित्याहनित्यनिषे
धापूर्वयोरलाभवः नहितत्रायोग्यतमाक्रियास्यक्तुंशक्यतफ
लाश्रवणेनन्यायसंवादनानवकाशादित्याहनित्येनिअस्मिन्प
क्षेकार्यत्वप्रवृत्तिनिमित्ततापक्षेः न्यायेतिनस्यपूर्वत्वेन शक्तिर
पितुकार्यत्वेनकार्येधर्मिणिक्रियाचतथाभवत्येवेतिनाभ्न्दि
न्नत्वं लिङ्गवोध्येतेत्यर्थः ननुनलोककार्येधर्मिणिशलिः
कल्पिताकिंत्वनन्यलभ्यकृतिरूपेकार्यत्वमात्रेधर्मिण्याका
देर्धातोरेवोपस्थितिसंभवात् क्रियाकार्यत्वस्यचाविनाभिधा
नलभ्यत्वात् तथावधर्मिणिशलिर्वेदएवकल्प्यासात्रक्रिया।
निरासेनैवक्रियाया अन्वययोग्यत्वेधर्मिणिशक्तिग्रहस्याश
क्यत्वातस्मादयोग्यतयाक्रियायानिरस्तायांधर्मिणिशक्तिग्रहका
लेवस्तुतोयत्क्रियाभिन्नंकार्यंतत्रशक्तिस्तथाचनित्यनिषेधयोर
पितद्देवोपासनायत्वयोग्यंलिङाभिधीयतेक्कमलान्नतुक्रि
यानुपयोग्यकार्यत्वमात्रलक्षणाप्रसंगात् धर्मिणिवाधका
भावात्तएवक्रियाकार्येनोक्तिकीलिङ् लाक्षणिकीउत्तरीत्याक्रि
यानिरासेनैववेदेधर्मिणिशक्तिकल्पनात् लौकिकानांतत्र
नात्पर्यासंभवात् क्रियासाधारणेशक्तावपिलोकेलिङ् लाक्ष
णिकीपचेतेत्यादेपाककार्यताज्ञानेपिलाघवात्कार्यलिङ्गत्वा
त्पर्येननुधर्मिण्यपिधातुलभ्यत्वात् तथाचतनीयायाः कर
णेकाचवत्कार्यकार्यत्वचनस्वतंत्रेशक्यंकिंतुविशिष्टंवि
शिष्टस्यचविशेषणपर्यन्तदेवेनिकार्यत्वेलक्षणानचानुपप

स्याकार्यत्वविशिष्टोर्थोस्यतावपिधर्मांशमपहायक्रियायाः का
र्यत्वान्वयोपपत्तौ किमुपस्थिसंतत्तरार्थलक्षणयेतिवाच्यं इतर
धर्मिगतत्वेनैनोपस्थितस्यकार्यत्वस्यतद्धर्म्येतराकांक्षास्तियेन
तदितरधर्म्यन्वयोन्नायेततथाचत्व· नेत्रकार्यत्वोपस्थितये
लक्षणापुक्ता मेवं· कार्यत्वमात्रशक्तस्यापूर्वेलक्षणयैवो
पपत्तौतत्रशक्ति मानाभावात् नचापूर्वेशक्यंकार्यत्वसंबंधि
तयानन्नातमितिनतत्रलक्षणेतिपुक्तंयथाहिशक्तिपक्षेकार्य
त्वेनरूपेणघटादावेवलिङः शक्तिग्रहः कार्यमितिततः स्म
तिघातुभवदशापांचयोग्यतावशाघटादिकविहायापूर्वेभास
तेतथालाक्षणायामपिलिङाम्यंकार्यत्वकार्यघटादिसंबंधि
नयान्नानंकार्यंघटादिस्मारयतुयोग्यता॰शाच्चपूर्वमनुभवेभा
सतांकार्यस्मरणं त्वन्विताभिधानोपयोगिनन्वपूर्वस्मरणंनच
पदेनपदार्थेनवेतिनकश्चिद्विशेषः नचलिङोलाक्षणिकत्वे
नापूर्वोननुभवप्रसंगः लाक्षणिकपदस्यानुभावंकत्वा
दिनियुक्तत्वन्नयेइतरान्वितस्वार्थशक्तस्यपत्तिपदस्येवतदिन
रदपूर्वेमादायानुभावकत्वात् अभ्यथातीरादेरप्यननुभया
पत्तेः अथेतरोपलक्षितस्वार्थान्वयमात्रेपदानांशक्तिनत्वितर
त्रापिगौरवात् पदांतरलभ्यत्वाच्च· नचतीरादिप्रतिबंदिः तत्र
हिनीरोपलक्षितायपशालिस्वार्थोनुभावकत्वंवसतीत्यादि
पदस्यतीरस्यतुसंस्कारादुपस्थितिः प्रकृतेचापूर्वस्यसंस्का
राविषयत्वादितिचेन्न· मंचाः कोशंतीत्यत्रमंचस्थाः क्रोश
तीत्यवगम्यतेनचमंचस्य॰पुरुषविशेषःप्रागनुभूनोपेनती

रवदुपतिष्ठेतनचापूर्वः पुरुषविशेषोनभासतइतिवाध्यंगृह
प्रवेशानन्तरं मयसस्यापूर्वमज्ञातएवमंचाः कोर्थंभीतिपदनस्व
र्गकामकार्यंविषयोयागइत्यनुभवोजन्येतलक्षणायामितर
पदस्यलक्षणीयविशेषणकस्वार्थविशेष्यकानुभवजनक।
त्वात् नचेनादृशोबोधआकांक्षितइतिचेन्नस्वर्गकामकार्यवि
षयोयागइत्यनुभवेपिस्वर्गकामकामकार्ययोरन्वयप्रकार
त्वनापूर्वे नाभात् ताहृशशब्दानुभवानुभवानंतरमर्थोयाग
विषयकंकार्यमित्यौपादिनिकबोधास्यटत्युपपत्तेश्च· अस्तु
वालाक्षणिकमपियदमनुभावकतच्चद्वितीयाध्यायप्रकाशो
धिपंचितमस्माभिरितिनेह प्रतन्यतेकिंचकार्यघटादौनलिङ्
शालिग्रहास्वर्गकाममोग्यतयाशालिग्रहकालक्रियानिरासव
त् यागाथ्यानुपपत्त्यापरादिनिरासस्यापिसंभवात् तत्रयाग
विषयकत्वस्यवाधादन्ययान्विताभिधानकानेपितन्निरासा
नुपपत्तेः नचशालिग्रहकालंयागान्वयानुपपत्तेरभिसंधा
नकिंतुस्वर्गकामान्वयानुपपत्तिमात्रेः प्रतिसंधीयतइतिपुलप्र
त्ययस्यानरंगकस्यश्वंतन्वयंबोधपतेरशयवत्वात् घगदेरान्
त्वेपिपृथिवीत्वादिनान्विताभिधानकालेवन्निरासोपपत्तेः
एवंचप्रवरत्कार्यनिरासेधकापेधर्मिणिशालिग्रहः एनेननि
ङ्पदमेकत्रोच्चारणेपिकार्यस्वर्गजनकत्वानांज्ञानेशक्तमि
तिव्युत्पत्तिः पित्राज्ञानादिकंचोपस्थितमेवातोलिङ्पदमेक
त्रोच्चारणेपिकार्यस्वर्गजनकत्वानांज्ञानेशक्तमितिव्युत्पत्तिः
पितृज्ञानादिकंचोपस्थितमेवातोलिङ्पदेनैकत्रोच्चारणेपो

ग्यतादिवशाद्यागविषयस्यापिस्वर्गतनकं कार्यमित्येकं ज्ञानम
नुभवरूपं प्रचरद्रव्यस्यविलक्षणविषयं क्रियते॰ नचैवंनानार्थव
द्देकैकज्ञाने शक्तिग्रहाद्देकैकविषयोनुभवोभवेन्नसमुदित।
विषयइतिवाच्यं शक्तिग्रहकालेएकत्रोच्चारणइतिविशेषयम
हिम्नातत्संभवात् नानार्थेतुप्रमाणाभावेनगौरवेण शक्तिग्रहे
तस्याप्रवेशात् तथाप्यमीषांसमूहालंबनायत्तिनतुमिथोवैशि
ष्ट्यज्ञानमितिनवाच्यंसाकांक्षधर्मधर्मिणोरेकज्ञानमेवहिविशि
ष्टज्ञानंइत्थमेवालौकिकार्येषुस्वर्गादिपदेषुशक्तिग्रहइत्यपास्त
घापिनांपटादीनांनिरासात॰ धर्ममात्रेचशक्तिग्रहस्यप्रकृतेनु
पयोगात॰ किंचतेषुसमुदितेषुनशक्तिग्रहः प्रथमंसमुदाय
स्यैकज्ञानाविषयत्वात् विषयत्वापूर्वमेवविशिष्टस्यसत्वेपूर्व
त्वव्याघातः एकज्ञानविषयसाकांक्षधर्मधर्मिणोरेवविशिष्ट
त्वात् नापिप्रत्येकतथाहि॰ लिङ॰ पदात्स्मरणत्रयंयतियदाद्व
यागस्मरणं नचतुत्ततेषांयोगमधमस्तिनचप्रत्येकं शक्तिग्र
हेपिसमुदितविषयमेकं स्मरणंलिङपदादितियुक्तंसमुदाय
स्यपूर्वमननुभवात्॰ किंचैकमेवस्मरणंपदिधर्मधर्मिविष
यतर्हिअपूर्वत्वक्षेतिः नवेकज्ञानारूढयोः साकांक्षधर्म
धर्मिणोरेवविशिष्टत्वादित्यस्यसत्यित्तत्तरणाः ननुविश्वजि
पायान्निर्त्येपिफलंकल्प्यपिष्पतइत्यतआह नचेतितन्नप
रतिशेषः तथाचनवापसिद्धांतइतिभावः वीजाभावंस्पष्टय।
ति॰ हीतितस्कलविधित्वकार्यत्वा॰ नस्फलजनकत्वविना॰नु
पपन्नंफलंकल्पतीत्यर्थः लोकवदितियथालोकेकार्यत्वं

याकादेरिष्टसाधनत्वेनलिंगेनानुमापत्तेरितिकार्यत्वमिष्टफ
लप्रतीत्यैवैप्रतीयतेतथावदेपीत्यर्थः उपेयरूपत्वादिति
तन्नयेपूर्वस्यैवस्वतःकाम्यनयाअनन्योद्देश्यकृतिव्याप्य।
त्वादित्यर्थः तच्चाचफलजनकत्वंनिनापिफलस्यैवापूर्व
स्यकार्यत्वमपपद्यमानंतफलकल्पकमितिभावः यनइति
यत्रापिस्वर्गःफलश्रूयतेतत्रापूर्वस्यैवास्वतः प्रयोजनतास्व
र्गेयचैतन्मान्नोतिनन्वपूर्वस्वर्गसाधनमितिधीः प्रधानस्यगु
णत्वानुपपत्तेरितितद्दर्शनादित्यर्थः एतच्चविरोधोभ्यावन
मात्रंवस्तुतोनापूर्वस्वतःप्रयोजनंलोकेतथानवगमात् वेदेपि
काम्यस्थलेकाम्यसाधनस्यैवापूर्वस्यगौणप्रयोजनस्यलिङाभि
धानंकाम्यसाधनताज्ञानंविनाकामिकार्यत्वस्यबोधयितुम
शक्यत्वात् नतुस्वतःप्रयोजनत्वेनतत्रासामर्थ्यादनुपयोगा
च्चप्रवर्तभोजनादाविवलोककुप्तकाम्यसाधनताज्ञानात्का
र्यताज्ञानाद्वागौणप्रयोजनत्वेनैवोपपत्तेः अथनित्यलोकवे
दावगतगौणमुख्यप्रयोजनाभावेसतिलिङ्· वापूर्वस्यस्वतः
प्रयोजनत्वंबोधयतीतिनेनविनाप्रवृत्तिपरः चानिर्वाहादिति
चेन्ननिरुपधीच्छाविषयत्वंहिस्वतःप्रयोजनत्वमपूर्वस्यलिङे
बोधनीयंनचापूर्वस्यतादृशेच्छाविषयत्वंधीर्धियापिसिद्धमिति
भावः शब्दबलेनेनियतकार्यताधीर्लोकगृहीतत्रसालिङइ
ष्टसाधनत्वमपेक्षतेवेदेनुकार्यशक्तालिङोवताजनयती
तिनतत्रसातद्येक्षेत्यर्थः यदिचापूर्वंनस्वतः काम्यमिति
ततापिसातदपेक्षेतितदिष्टसाधनत्वज्ञापकस्यान्यस्याभा

वाद्वेद एव तद्बोधयेत् तथा च लोकवल्लिंगादेव कार्यताधीसंभवा।
न्न लिङ्गस्तत्र शक्तिः कल्प्येत्याहान्यथेति साध्याविशिष्टमि
ति इष्टसाधनत्वस्यैव साध्यत्वादित्यर्थः स्वभावत इति सोपा
धीच्छाविषयत्वे सतीक तत्प्रत्ययेनापूर्वफलसाधनमित्यनुमेयमि
त्यर्थः असिद्धेरिति त्वन्मते पूर्वस्यैव स्वतः काम्यतयाविशेषणा
सिद्धो हेतुरित्यर्थः असिद्धिं स्पष्टयति अन्यथेति उद्देश्यफलां
तरसम्भावनियनिषेधापूर्वत्वासिद्धेरित्यर्थः नत इति अपूर्वे
स्य स्वभावतरष्टत्वेन काम्यसाधनत्वं तथात्वे वानन्यादृशप्रवृत्ते
कृतिव्याप्यत्वरूपस्वभावतोष्टत्वं नेत्येकतरसत्वमन्यतरसत्ववि
रुद्धमित्यर्थः तदलाभः अपूर्वालाभः स्विनिरपेक्षो लिङ्गो वस्व
र्गसाधनतामाह येन तत्साधनं स्थिरमपूर्वं शब्दवाच्यं स्वर्गका
मपदसमभिव्याहृतावा आद्येन हीति तथा सति लौकिकी लि
ङ् नर्थिका वेदे यन्नमोद्देशप्रवृत्तकृतिव्याप्यत्वरूपस्य कार्यत्वस्य
स्वर्गसाधनत्वविरोध इति भावः द्वितीयमाशंक्यान्यथासिद्ध्या
निराकरोति भावीति यथा यस्य ब्राह्मण्यमस्ति तस्य कार्यमिति
धीस्तथा यस्य स्वर्गकामनास्ति तत्संबंधि कार्यमिति शाब्दधीनं
तु स्वर्गोद्देशप्रवृत्तकृतिसाध्यं कार्यमिति तथा च स्यापि नापूर्व
स्य लाभ इत्यर्थः अनुमानादपूर्वलाभोस्त्विति मतमाशंक्य नि
राकरोति न चेदमिति यस्येति काम्यासाधने कामिनः कर्तव्य
ताज्ञानाभावाद्यामेरित्यर्थः किमन्येच्छया कर्तव्यत्वं स्वभावतो
वा आद्ये अन्येच्छयेति त्वन्येच्छया कर्तव्यत्वे स्वोद्दे प्रकृतकृ
तिसाध्यत्वं भज्येतेत्यर्थः अत्येन दिति आद्ये दूषणांतरमाह

औपाधिकेति अत्र स्वाभाविकत्वौपाधिकत्वरूपविशेषाविवक्षायां कर्तव्यत्वमात्रं विवक्ष्यते तच्च शब्देनानिष्टेऽप्यवबोध्यत इति पूर्वमनुमानमदुष्टमेवेत्याह किमनयेति इष्टसाधनताभिधानं विनान्यदिच्छतोपि कर्तव्यमन्वयायोग्यतया नाचेतुमर्हतीत्याह नन्विति कार्म्यभिन्नस्य काम्यकार्यस्य काम्यसाधनस्यैवान्वययोग्यत्वादित्यर्थः अत एवेति शब्दादेवेष्टसाधनत्वसिद्धिरित्यर्थः अन्यदिच्छतोन्यत्कर्तव्यमन्वययोग्यं तथापि नेष्टसाधनत्वमनुमातुं शक्यते ब्राह्मणत्वस्येव यस्य गंका जस्याधिकारितावच्छेदकत्वेनाप्यन्वयोपपत्तेरित्यतः आह न च बाधितेति वस्तुतस्तत्वाफर्वस्य वस्तुतः कार्म्यतया काम्यसाधनत्वं विरुद्धमिति भावः कार्यत्वमपूर्वस्यापि विकल्प्य निराकरोति न चेति तद्धीति कृतिजन्यव्यापाराश्रयत्वमित्यर्थः न ह्यसिद्धस्य व्यापारभागित्वमिति भावः कृतिफलत्वरूपमनन्तरभावित्वमित्यर्थः कृत्युद्देश्यत्वमनन्योद्देश्यकृतिव्याप्यमित्यर्थः तद्विपरीतत्वादिति सुखदुःखाभावयोरेव स्वतः काम्यत्वादिति भावः न लिङ्‌ वनद्वोध्यते वस्तुसतएवबोध्यत्वात् नचापूर्वस्य विरूपधीच्छाविषयत्वमस्तीत्यपद्धिया बोध्यतेति भावः सापीति औपाधिकाष्टसाधनतायागस्य स्वर्गसाधनतयास्तीति कृतिसाध्यत्वमस्यौपाधिकमिति कुतस्तस्यापीत्याशयेनापूर्वसिद्धिरित्यर्थः यागस्याशुतर विनाशित्वात्स्वर्गस्य च कालान्तरभावित्वाद्यागस्य स्वर्गसाधनत्वं न संभवतीत्याह कालेति यागस्य प्रतीतस्वर्गसाधनत्वान्यथानुपपत्त्या फलसमयपर्यन्तयायी व्यापारः कल्प्य

तद्रूस्याहपयेति· ननुसाधनताप्रतीतिरेवयोग्यताज्ञानाभावा
त्संभवतितथाहि· स्वर्गसाधनताज्ञानंयागस्यभवत्साक्षात्सा
धनताविषयकंभवेत् परंपरासाधनताविषयकंवा· एतदुभ
योदासीनसाधनताविषयकंवा नाद्यः आशुतरविनाशित्वेन
क्रियायाः कालांतरभाविस्वर्गाव्यवहितपूर्वसमयावर्तित्वा
त् नद्वितीयः परंपराघटकस्यानुपस्थितेः अथास्तुतृतीयः तथा
हिसाक्षात्परंपरोदासीनसाधनतामात्रंयागस्यस्वर्गंप्रतिना
पुलंनचसाक्षात्परंपराविशेषद्वयंविनानास्त्येवेतिवाच्यंसाक्षा
त्परंपराभ्यांविशेषणानुपपत्तेः नचविशेषद्वयबाधेसामान्य
पिबाधितंपरंपरासाधनत्वस्याबाधनात्बोधोहिविपरीतप्रमा
नचस्वर्गेयागोनपरंपरासाधनमितिप्रमाकिंनुद्वारानुपस्थित्या
यागः स्वर्गेपरंपरासाधनमितिप्रमानास्तिनचपरंपराघटक
बाधः संस्कारवदयोग्यस्यापितस्यसंभवात्· अन्यथावाक्ये
प्यफलोत्कयाकामिकापीनस्यात् काम्यासाधनत्वात्ः नहि
पदयोग्यंतस्यशब्दायोग्यंतस्मात्स्वर्गसाधनंयागइतिसामान्यतः
परंपरासाधनत्वमनुल्लिखद्वस्तुगत्यापरंपरासाधनत्वविष
यकंज्ञानमनुत्पद्यमानंनायोग्यतयापरिनद्दवितुंशक्यमि
तिमेवं· तथाहिस्वर्गंप्रतियागोनसाक्षात्साधनमितिज्ञानानं
तरंस्वर्गसाधनंयागइतिसामान्यज्ञानंभवत्परंपरासाधनता
प्रकारकंस्यात· एकविशेषबाधेशाब्दज्ञानस्यतदितरविशे
षप्रकारकत्वनियमात्यथाछिद्रबाधेघरपदन्यंघटज्ञान
छिद्रेतरत्वप्रकारकंनचपरंपराघटकानुपस्थित्याप्रकृते

तथाघटते· तन्न· एतादृशनियमेप्रमाणाभावात् नहिछिद्र
वाधानंतरं घटपदेनछिद्रेनत्वेन ज्ञानंजन्यतेकिंतुयोग्यतया
छिद्रविहाययद्वस्तुषास्याछिद्रेतरभस्यघटत्वेनज्ञाननचछि
द्रेतरत्वेनज्ञानासंभवस्यापितस्याएकत्वेनघटपदादुपस्थित्यभा
वान्नचघाटपदात्तथैवानुभवः आनुभविकत्वेनोभयसिद्धे
पेनलक्षणयापिनधानिर्वाहोनचलक्षणापिसाहिजह
स्वि र्था आजहत्स्वार्थावानाद्यः घटाननुभवप्रसंगात् नो
त्यः शक्यलक्ष्यसाधारणेनशाब्दानुभवात्पूर्वंनियमेनोप
स्थितिः संस्कारादेवनचविभक्तीनांप्रकृत्यर्थगतस्वार्थाचय
त्ये धकत्वंव्युत्पत्तेस्तत्रविभक्त्यर्थानान्वीयेतेतिवाच्यंप्रकृत्य
र्थोहिप्रकृतिप्रतिपाद्यः सचप्रकृतेरप्यस्तिअन्यथायाचकमा
नयेत्यत्रयाचककर्त्तरिविभक्त्यर्थकर्मत्वान्वयानुपपत्तिस्तस्य
शक्यत्वात् तथाचसंस्कारोपस्थितछिद्रे स्वत्वमादायप्रा
ब्दान्वयबोधः स्यात्तमैवंशब्दादनुपस्थितातस्यशब्देनान्वया
वोधाजननात् एतच्च शाब्दीस्वाकांक्षाशब्देनैवपूर्यतइत्युप
पादयिष्यद्भिरस्माभिर्धोणारिसूत्रेप्रपंचितमितिनेहोपपाद्य
तेसंस्कारस्यानियतोद्वोधतयानियमेनतदुपस्थितेरभावा
च्च· फलस्याभयासिद्धेः तथातद्बलेनापिनियमेनोपस्थितेर
भावात् तथापिसामान्यभावस्यविशेषभानानियतत्वाद्विशे
षाभानेकथंसामान्यभासतद्वृत्तिचेत्नयरंपरासाधनत्वस्यप
रपराघटकानुपस्थित्याऽभानेपिवस्तुनः परासाधनत्वस्य
भानात् ननुकामीकाम्यादन्यत्काम्याव्यवहितसाधनतया

वगतेमेवकर्त्तव्यतयावेतिनचयागस्यस्वर्गाव्यवहितसाधनता
संभवतिनचतत्सिकामस्यपाके प्रवृत्तर्व्यभिचारः ओदनकाम
स्यतत्रप्रवृत्तेः नत्तिकामनाचनत्तिसाधनतत्साधन यरंपर
याकामनोपयोगिनीननुसाक्षात् अन्यथासाधनसाधने
प्रवृत्त्यभावापत्तेःमेवकाम्यसाधनत्वज्ञानस्यैवप्रवर्त्तकत्वाद्बा
धवानवानमिकामस्यसिद्धोदनस्यपाके प्रवृत्तिप्रसंगः गुरुया
पत्वात् इष्टोत्पत्त्यनंतरीयकदुःखजनकत्वज्ञानस्यप्रतिबंध
कत्वाच्चनस्मात्प्रतीतास्वर्गसाधनताव्यापारंविनानुपपद्यमानाव्या
पारमपूर्वंकल्पयतिननुव्यापारेणानन्निर्वाहोनतज्जननात्तदु
त्तरवर्त्तित्वेनव्यापारस्यतत्रासामर्थ्यात्नज्ञापनात् लिङ्गेवत
ज्ज्ञायमात्नमचिरध्वंसत्वकारणंव्यापारव्याप्तंवियक्षेवाधवाभा
वात् प्रायश्चित्तस्यचफलप्रतिबंधकत्वंस्यात् पापान्मुच्यतइ
तिफलश्रवणस्यचनिषिद्धक्रियातः फलभागीनभवतीत्य
र्थः नचमुख्यवाधकाभावः उपस्थितत्वेनविहितनिषिद्धक्रि
यापामेवधर्माधर्मपदप्रत्यालिग्रहस्यवाधकत्वाल्लमेहंचिरध्व
स्तस्यव्यापारसत्वेकारणत्वमितिनिस्याध्यन्वयव्यतिरेकाभ्यां
व्याप्त्यवधारणात् नचकारणत्वाग्राहकाभावउपाधिःतेना
पिसमंव्याप्त्यवधारणेनतस्याप्याधादानात् तथापिवेदेव
ताप्रीतियागिव्यापारोस्तु नचलत्त्रमानाभाकयजिधातोर्देवपू
तार्थेतथातस्याराध्यप्रीतिहेतुक्रियामात्रत्वात् तथाचयागस्य
देवताप्रीतिसाधनत्वेनकालांतरभाविस्वर्गप्रतितद्द्वारासा
धनतोपपत्त्यनेप्रीतेःक्षणिकत्वेपितदनुभवजनितसंस्का

रद्वारातत्संभवात्-अत्रमुः देवतोदेशेनद्रव्यत्यागेनदेवताप्रीति
र्जन्यतरापवमानाभावः यजदेवपूजायामितिच शाब्दिकस्मृतिः
स्मृतित्वादेवनस्वतः प्रमाणतन्मूलंचमानांतरंतयानास्त्येव
नापिस्वर्ग स्यप्रीनदेवतासाध्यत्वेमानवस्तुतोलाघवात्कर्तेग
तकलावस्मात्तन्निष्टव्यापारंकल्पयतितदेवताप्रीतिर्व्यापारः
नचस्वर्गाभावमितिदेहांतरगनमेवतद्व्यापारःप्रलयेविच्छे
देपितद्व्यापारानुवृत्तेः शरीरस्यचकार्यद्रव्यतरत्वात्तदभावा
तूनामिध्वंसएवतद्व्यापारस्तस्यानंत्वेपितत्वाभावात् सावधिफ
लजनकत्वमितिवाच्यंप्रतियोगिध्वंसयोरेक त्राजनकत्वादि
तिसंक्षेपः शक्तेव्यापारेति नचप्रकृतेतथेति शेषः कार
णस्यावांतरव्यापारयोगोपागश्चनस्वर्गकारणकार्योव्यव
हितप्राक्कालसिद्धस्यकारणत्वादित्यर्थः कृषीतियथामाघ
मासीयभूकर्षणस्यपाकजपरपराव्यापारद्वाराहेमंतभावि
सस्यजनकत्वंयथावादशमूलीकषायपानस्यधातुसाम्यद्वारा
भाविज्वरशांतितनकत्वमित्यर्थः व्यवहितस्यकारणत्वेतिप्र
संगमाहास्त्वितियेनविनापकारणत्वंनिर्वहतितस्यसव्या
पारः नचपितुःकारणत्वंपुत्रंविनाननिर्वहतीतितत्सव्या
पारइत्याहसत्यमितिएनदेवस्यश्वपतिजनपितेवेतिः यदि
चकार्यसमानकालस्यैवकारणत्वंतवाप्यनिष्टमित्याह न
चेदेवमितितभवेतिकार्यत्वमपूर्वत्वंन्वलिङः प्रवृत्तिनिमित्त
मित्यर्थः कृत्यध्यवसायः कृत्यनुकलाउचितीर्थोहार्थः अ
त्रैवकृत्यविधानादितिभावः नव्यहिनेतिः प्रवृत्त्यपेक्षपेतिरि

षः सचेति उभयरूपोपि संकल्पस्तस्याज्ञातस्यैव प्रवृत्तिहेतुत्वेन प्र
वर्त्तकज्ञानाविषयत्वादित्यर्थः संकल्पविधिवादिनमुपहसति
न रे नरेति शक्यत्वं कृतिसाध्यत्वमित्यर्थः कुतश्चिदपीति अ
निष्टादपीत्यर्थः न तीयइति इष्टसाधनतार्थत्वनिरासेनेत्यर्थः
तद्धर्मो निषेधे विवाक्यार्थज्ञानानुकूला भावना शब्दव्यापारादिप
दवाच्या अद्विधा शब्दधर्मो वा लिङ इत्यर्थः तदाहुर्भट्टपादाः अभि
धां भावनामाहुरन्यामेव लिङादयः अर्थात्मभावना चान्या स
र्वाख्यातेषु गम्यत इति तदर्था भावनादिर्वेति अत्र कारणमि
त्यनुषजनीयं तद् उक्तः र्थी भावनादिः प्रयत्नादिः करणतद्धर्म
इष्टसाधनत्वेत्यर्थः पराभिमत शब्दधर्मस्वरूपामभिधायां
मानाभावादाहासत्वादिति नत्वे पि परान्तरेण तदुपस्थितो
ततो न प्रवृत्तिरिति सहा प्रवृत्तेश्चेति सर्वत्रान्यभयस्य वाधकस
त्वेन परिशेषादभिधा लिङर्थः स्यादित्यपि नास्ति तत्रापि वाध
कसत्वादित्याह वाधकस्येति नतु शब्दस्य वाक्यर्थधीकरणत्वा
भद्व्यापारेण भाव्यमित्यवश्यमभिधैव तद्व्यापारः किंच पदानां
प्रत्येकमर्थज्ञानाजनकत्वादाशुविनाशित्वपात्क्रमाभाविनया
च तन्मोलकस्याभावादर्थज्ञानानुपपत्त्याभिधा कल्प्यत इत्य
त आह मंगतीति संगतिः स्मृतिरेव पदस्यावान्तरव्यापारः एकस्म
न्विषयानुपूर्वी विशेषविशिष्टपदमालैव पदार्थस्मृतिव्यापारा
वाक्यार्थधीकरणमिति न तत्र मानमित्यर्थः ननु संगतिस्मृति
र्न शब्दव्यापारः व्यापारियं विहायान्यत्रासन्निततमवायात्
ततोयः शब्दसंबंधस्तद्व्यापारः साभिधास्यादित्यत आहान्ये

कु० वृ०
९२
92

तियथात्मसमवेतनपूर्वयागादेः कारणस्य व्यापारस्तथासंगति
स्मृतिरपितादृशी शब्दव्यापारकर्हणिनधर्मत्वविषयज्ञानेश
ब्दः कर्मोकिंतु कर्मेऽभ्यपास्तकर्तंपदस्य मुख्यार्थेनायामवेतने
स्यव्यापाराभावात् हेतुत्वमात्रविवक्षयांचप्रकृतेप्यदोषादिति
भावः ननुव्यापारीव्यापारकारणं भवतिनचसंगतिपदं स्मृतौप
दं कारणमतः शब्दजन्यान्याभिधामंतव्येत्यत आह विषयतया
पीनियतालिंगस्यस्वविषयपरामर्शे विषयतयहेतुत्ववयाशब्द
स्यापि संगतिस्मृताविसर्थः अस्मन्मतेस्मृतेर्विषमाजन्यत्वेपि
परमतेनेदमुक्तं अस्तुवाशब्दव्यापारोभिधालिङ्गाच्चानतथा।
पिनासौप्रवृत्तिहेतुः पुरुषार्थत्वादित्याहाधिकत्वेयादि अभि
धायामव्युत्पन्नानामभिधाज्ञानाभावेपि प्रवृत्तिसत्वादित्या
ह बालानामिति अभिधादिपदैरभिधाज्ञानवलोप्यवर्ते रि
त्याह शब्दांतरेणेति अथाभिधादिपदानां सामान्यज्ञानेपिन
प्रवृत्तिर्लिङनभिधेयविलक्षणाभिधाज्ञानस्यप्रवर्तकस्यततोनु
त्पादादत एवनाख्यातांतरेण तज्ज्ञानेपि प्रवृत्तिस्तत्राहनवेतिप्र
तिपत्तेः प्रतीतिप्रतिपत्तिविशेषकमित्यर्थः अर्थविशेषायी
ति: अर्थविशेषविनाबुद्धिविशेषस्यानुपपत्तेरित्यर्थः यदिप्र
वर्तकज्ञानविशेषाद् एवसोर्थप्रतीयतेनतदालोकेयत्नतीयमान
प्रवर्तकत्वेनज्ञातंनकिंतु वाच्यंनचाभिधायांतत्संभवतीतिभाः
अथाभिधाज्ञानमात्रस्याप्रवर्तकत्वात्प्रकृतेरेवतद्धेतुत्व
[illegible]नुमेयतत्राह प्रवृत्तिमात्रमितितदिति अभिधायासंगति
हीनत्वात् तद्धेतुलक्षण्यंप्रवर्तकमित्यर्थः नानियमादिति

वोद्धूं संनिधानं धात्वर्थे इष्टसाधनत्वे चास्तीत्यर्थः प्रवृत्तिहेतुत्व
स्य निषेधो विधिपदसंनिधेर्वा आपेप्रवृत्तिहेतुत्वेति अंत्ये न
त्संनिधीतियथाभिधायां विधिसंनिधिनिषेधो मास्तु यावधात्वर्था
दावपीत्यर्थः ननु मानांतरादभिधा ज्ञानेपि न प्रवृत्तिलिंङादिप
दैकवेद्याभिधाज्ञानस्य प्रवर्त्तकत्वादित्यत आह शब्दैकेतिएव
तत्र लिङादिशक्तिग्रहएवनुत्पान्मानांतरेणतदनुपस्थितेरि
त्यर्थः न हातिप्रवृत्त्यन्यथानुपपत्त्याह तद्धेतुः कश्चिदित्येव ज्ञान
स्यान्वयतत्प्रवर्त्तेचमित्यर्थः द्वितीयपक्षमाहेष्टसाधनत्वेति नि
करण धर्मोविधिरितिशेषः तदुपपादयति सर्वोहातिमयेत्या
दिना असाध्येकृत्यसाध्येचप्रवृत्तिर्निवारितातदयमितिनत्तुकार्यत्व
मेन विधिः तथाहि ज्ञानस्य कृतावुत्पाद्यायां चिकीर्षातिरिक्तं न क
र्तव्यंसाच कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषये छायाकृत्क
त्यासाध्यपामीतिनदनुभवात् पाकं कुर्यामित्यस्य पाककृत्यासा
धयामीति विवरणात्र सास्वकृतिसाध्यताज्ञानसाध्याइछायाः
स्वजनकतानसमानप्रकारकत्वनियमात्ः अतएवस्वकृति
साध्ये प्रवर्त्तते न त्विष्टसधनेपि स्वकृत्यसाध्ये· स्वकृत्यासाध्ये
पिविषभक्षणादावप्रवृत्तेरिष्टसाधनत्वमादायविधिः नच
तत्रानिष्टसाधनताज्ञानप्रतिबंधकेप्रवृत्तौतदभावस्य हेतुत्वेगौ
रवापत्तेः तद्दूरं लाघावादिष्टसाधनत्वं विषयतयाहेतुतावच्छे
दकमस्त्वनचप्रवृत्तौः पूर्वमनिष्टसाधनताज्ञानविरितियोगत्वी।
कारात् यत्रशब्दादनुमानाद्वातदधिगतंतत्रतदनवतारत्वत
स्माद्विषभक्षणादौवृष्ट्यादौचप्रत्येकंव्यभिचाकृतिसाध्यत्वेस

कु०व०
९३
33

तीष्टसाधनत्वंविधिरितिनविषभक्षणादौस्वकृतिसाध्य।
त्वाभावात् नहिकश्चिद्विषभक्षणंचिकीर्षतिततःकरोतीति
दृश्यतेजीवनयोनियत्नसाध्यंचतन्नभवत्येवनचान्याकृतिर
स्ति अथेष्टसाधनताभ्रमानन्तरविषभक्षणमपिचिकीर्षाज
न्यकृतिसाध्यमतोविशेषदर्शनेपितत्रप्रवर्तेन्येतिचेन्नद्विधा
हिकृतिरनुभूयतेबलवदनिष्टजनिकायथाविषभक्षणादौ
तदजनिकाचयथापाकादौतदिहबलवदनिष्टाजनककृति
साध्यत्वंविवक्षितंनचविषभक्षणेतदस्ति अतएवतत्रप्रथमम
निष्टसाधनतयातथाविधकृतिसाध्यत्वमानमवगत्यप्रवर्त्त
तेप्रवृत्त्यनंतरंचबलवदनिष्टहेतुकृतिसाध्यत्वंविरोधितत्रा
वगतमितिनप्रवर्ततेतथाविधकृतिसाध्यत्वपूर्वानुभूतस्मृ
त्याप्रवर्त्तेतेतिचेन्नविशेषदर्शनेतत्रमाहिनसंस्कारोन्मूल
नात् अन्यथेष्टसाधनतास्मरणेप्यप्रतीकारात् भवैवंभ्रमे
पिप्रवृत्तेंतः स्वेच्छाजन्यकृतिसाध्यत्वस्यविवक्षितत्वात् श्र।
मस्यचनियमतोन्येच्छाकृतिसाध्यदुःखत्वेनतदैवेच्छाविर
हात्· अतएवसनांतरीयकदुःखमुच्यते·नचैवमिच्छाज्ञानस्य
प्रवर्त्तकत्वप्रसंगः कृतौपरिचायकमात्रत्वात् यद्वाकृतौस्व
रूपसतीछाजनिकाइच्छायांतुतज्ज्ञानजनकमस्तुकोविरोधः
नहियदैकत्रस्वरूपतोहेतुस्तज्ज्ञानमन्यत्रनाजनकंएवंचिकी
र्षाहेतुतयाकृतिसाध्यताज्ञानेव्यवस्थितेविषभक्षणादिव्या
वर्त्तकंकृतिवृत्तिवत्तवदनिष्टाजनकचिकीर्षाजन्यत्वंविकी
र्षाधानत्वमेवनत्विष्टसाधनत्वंकृतिवृत्तिधर्मापेक्षयाव।

हिरंगत्वात् जीवनयोनिजकृतिजन्यप्राणादिसचारनिवृत्त्यर्थ
मावस्यकत्वात भोगभिकीर्षया अभिचाताच्च नवो पापचिकी
र्षोरिष्टसाधनताज्ञानसाध्यानुपायेच्छात्वात् इष्टीच्छावदिति
वाच्यसाध्यत्वसाधनत्वयोर्विरोधेनैकत्रज्ञातुमशक्यत्वात् अ
सिद्धानासिद्धानां चादायत्तयोर्व्यवस्थितेः नचपदद्वस्तुनः कृति
साध्यं तदिष्टसाधनं ज्ञापनइतियुक्तं कृतिसाध्याता स्वार्थाज्ञा
नाच्चिकीर्षानुत्पत्तेः अपिचसाधनत्वस्य सिद्धमात्रधर्मत्वात्साध
नत्वज्ञानमिच्छाविरोधिनहि कश्चित्सिद्धमिच्छति स्वतोसुंदरेष्व
स्यादौ वेच्छानत्साधनेष्टज्ञानात्. अथ तादृश कृतिसाध्यत्वेकृ
तिर्नविशेषागमसत्वात् सत्वेवा कृतोसत्यांकृतिसाध्यताज्ञानं
तथाज्ञानेच कृतिरित्यन्योन्याश्रयः नोपलक्षणमतिप्रसकाप
लक्ष्याभावादितिचेन्न ज्ञाने विषयतयाकृतेर्विशेषणत्वात्:
साध्येयप्रवृत्तिविषयेपरिचायकतयोपलक्षणत्वादन्यथे
ष्टसाधनत्वापक्षेपीष्टस्यतथाविधविकल्पग्रासात् नचकृति
साध्यत्वं कृतेः प्राक् प्रथमवगंतयं नप्रत्यक्षात्कृतिसाध्यत्वेज्ञा
नाच्चिकीर्षा ततः कृतिः कृत्तौच संप्रत्यक्षेया कृतिसाध्य
ताज्ञानमित्यन्योन्याश्रयात् कृतिसाध्यनोनीर्णेचिकी।
र्षोत्कटसोरसंभवाच्च नानुमानात् कृतिक्रियमाणयोः पक्ष
त्वेकृतिसाध्यत्वात्तीर्णत्वेनबाधात्. भाविपक्षत्वेचाश्रयासि
द्धेः उच्यते यागोमत्कृतिविशेषसाध्यः मंत्कृतिविनासत्वेस
तिमदिष्टसाधनत्वात् मज्जोलनवत् यस्ययदिष्टसाधनंय
दापत्कृतिविनानसिद्ध्यतितत्तदात्तत्कृतिविशेषसाध्यमिति

व्याप्तेः असिद्धस्येष्टसाधनत्वाभावात् न च पक्षानुपपत्तिः पाके
कृतिसाध्यत्वं हि सिध्यत् सिद्धे बाधादनागतपाकमादाय सि।
ध्यति पक्षतावच्छेदकधर्मसामानाधिकरण्यं साध्यमानस्य
हेतुनासिध्यतीत्यनुमाने कृप्तत्वात् यथाप्रसिद्धवन्हिबाधेपि
वन्हिमात्रं न बाधितमित्यसिद्धोपि वन्हिः सिध्यति तथाप्रसि
द्धपाके कृतिसाध्यत्वाबाधेपि पाकमात्रे न बाधितमित्यप्र
सिद्धं पाकमादाय सिध्यति अत्र सिद्धयोः पक्षसाध्ययोः सि
द्धावविशेषात तथापि प्राथमिकत्वादावश्यकत्वाच्च लिंगज्ञान
मेव प्रवर्तकमस्तु न च लाघवात् कृतिसाध्यत्वा नयानतरा कृतिसा
ध्यत्वानुमितौ मानाभावेन युगपदुस्थेत्यभावादिति चेत् लिं
गज्ञाने कृतिसाध्यत्वस्याप्रकाशे तत्प्रकारकचिकीर्षायां त
स्याहेतुत्वात् न तु कृतिसाध्यत्वस्य विधित्वेन कलंजं भक्षयेदि
त्यत्र विध्यर्थे निषेधानुपपत्तिः कलंजभक्षणान कृतिसाध्य
मित्यस्यायोग्यत्वात् नञ्पूर्वस्य तिङर्थत्वेन कलंजभक्षण
प्रवृत्तस्य हि न क्षणमानभावस्तत्कृतिर्वेनोतरकाते न भवति
तत्कृत्यानुभवनीत्यन्वयव्यतिरेकाभ्यां कृतिसाध्यएवानुभू
यते न हि कृत्यनंतरक्षणे घटस्वरूपं कृत्यधीनमित्यतोन्य
त्कृतिसाध्यत्वघटेइयांस्तु विशेषः क्वचित्कृत्यधीनआद्यका
लयोगः क्वचिदुत्तरकालयोग इत्युभयोरपि योगक्षेमयोः
कृतिसाध्यत्वमनुभावेक असएवेदमत्तो भूतमिति व्यवहा
रः ननु कृतौ नष्टायां सन्नपि धर्मात् कार्यं तथासति कथ
मपूर्वे कार्यं कार्यिणोन्वयः आशुविनाशितया क्रियातुल्य

त्वात्· मैव· यद्वृत्ति काम्यसाधनत्वं तत्र कार्यतानुद्धिः प्रयोजे का
नतु कार्यत्वविशिष्टस्य काम्यसाधनतेति व्याप्तिस्तस्य कृतिसाध्य
त्वमेव विधिअत्रोच्यते कृतिसाध्यताज्ञानस्य प्रवर्त्तकत्वे तृप्तो
पि भोजने प्रवृत्तेः तत्र अथा विशेषदर्शनेपि चैत्यवंदनादेः अथस्व
विशेषणवता प्रतिसंधानजन्यं कार्यताज्ञानं प्रवर्तकं तथाहि का
म्यपुरुषविशेषणं कामदर्शनेपि चैत्यवंदनादेः अथस्वविशेष
णवत्ता प्रतिसंधानजन्यं कार्यताज्ञानं प्रवर्तकं तथाहि काम्यपु
रुषविशेषणं कामना ततः काम्यसाधने यागयादौ कार्यज्ञानं
नित्ये च कालशौचादिस्वविशेषणं न प्रस्यतः तृप्तो कामनाविरहे
णेष्टसाधनताज्ञानाभावान्नतया बोधः विशेषदर्शने च नम
दृश्यामिव चैत्यवंदनेनेष्टसाधनताज्ञानं येन तज्जन्यकार्य
ताबोधात्प्रवर्त्तेत· मैवं कृतिसाध्यत्वज्ञाने लाघवाद्धिपपत्तपा
इष्टसाधनत्वस्यैवावच्छेदकत्वात् ननु स्वविशेषणवता प्रति सं
धानजन्यत्वं तत्र विशेषणं गौरवात् न च साध्यत्वसाधनत्व
योर्विरोधः निर्विशेषिनयोस्तयोरविरोधात्· नद्दासाध्यत्वत।
द्दासाधनत्वेयोरेवावरोधात्· तथात्वस्य चानभ्युपगमात् अ
न्यथा साधत्वसाधनत्वयोरन्यतरेवस्यात्· पाके ननु समयभे
देप्युपायतत्समास्समपये। भेदमाहायसाध्यसाधनत्वयोर्ज्ञा
नमबाधितं नैचैव गौरवं समयभेदस्य प्रवृत्तावनुपयोगात्·
ज्ञानोत्पत्तावेव तदुपस्थयात् कथं वेष्टसाधनत्वेन कार्य
त्वानुमान· पक्षे साध्यसाधनयोरन्यतरसत्त्वे बाधामिथ्यो
रन्यतरप्रसंगात् समयभेदेन तयोरविरोध इति तुल्य अपि

कु०चं०
९५
95

चस्वविशेषणवत्ताज्ञानजन्यकार्यत्ताज्ञानाभावात्कथंसुखे
चिकीर्षा अथोपायचिकीर्षायास्तद्धेतुरिच्छाकारणसुखत्वज्ञा
नेकृतिसाध्यत्वप्रकारविषयस्तदासुखेचिकीर्षानोचेदिच्छामा
त्रमित्युभयंचिकीर्षाहेतुः नहीच्छाहेतुज्ञानेकृतिसाध्यत्वप्र
काभासतेतदाचिकीर्षानोचेदिच्छामात्रमित्यनुगनमेवसुखेन
दुपायचिकीर्षाहेतुरस्तु बाधवात् सुखत्वज्ञानवदिष्टसाध
नत्वज्ञानस्यापीच्छाहेतुत्वात् अतएवयाकादाविष्टसाधन
ताज्ञानेकृतिसाध्यत्वविषयइतिचिकीर्षावृथ्याकाविष्टसा
धनताज्ञानेतुननद्विषयइतीच्छामात्रंसुखचिकीर्षायामि
च्छाकारणज्ञानेकृतिसाध्यताविषयकेचिकीर्षाहेतुत्वाव
धारणात् परमार्थतस्तुद्वेवाधीनप्रवृत्तीच्छादोस्वतोत्तुदरनिष
पेच्छामात्रंप्रतीष्टसाधनताज्ञानकारणंस्वसमतः पाकादि
चिकीर्षापितज्जन्याः नहिप्रज्ञातीयंप्रतियत्कारणंगृही
ततदतिप्रसक्तत्र्यवतिनचचिकीर्षान्यत्वे सति उपायेच्छात्वं
मत्रतत्रगौरवात् नचसाधनत्वज्ञानमिच्छाविदधेनिर्विशे
षिनयोः सिद्धत्वासिद्धत्वप्रयोपविरोधेनेच्छासाधनत्वयोरा
विरोधात् पुत्रतस्यध्येष्टज्ञानाद्दृष्टाविच्छेत्युक्त नत्वअसि
द्धावस्थावनैवच्छाश्चेदिच्छानुत्पत्तेः तस्यावश्यंसिद्धत्वमव
गनंत्र्यमिच्छानुरोधात्वासिद्धमितितत्रापिविरोधात् इष्ट
साधनत्वमादायेवेष्टतत्साधात्वग्रहाद्वएवंचेष्टसाधनता
मात्रनाकृतिसाध्यताप्रकारिकेच्छानोत्पत्तुमर्हतिनिवाति
प्रसंगनिवृत्तिरितिकृतिसाध्यत्वमपितत्रविषयनयाच्छेद

कमस्तु ननु कृताविच्छाचिकीर्षा सनः प्रकृत्यर्थगोचरेच्छावाधित्वात्
ननु कृतिविषयपाकादिविषये कृतिसाध्यत्वप्रकारकेच्छावाचि
त्वात्तथा च कृताविष्टसाधनताज्ञानादिच्छा स्यादेव याकल्प
नात् यद्वा कृताविच्छा तद्दासैव चिकीर्षा अन्यत्रेच्छामात्रं न तु कृतिसा
ध्यताज्ञानात् कृतौ कृतिसाध्यत्वाभावात् अथ पाकं कृत्या सा
धयामीतीच्छानुभवसिद्धा सा च कृतिसाध्यताज्ञानात्सा च चिकीर्षा
शब्दाप्रतिपाद्यापि कृतिहेतुः समानविषयत्वात् ननु कृतीच्छा
कृतिहेतुः कृतिविषयाविषयकत्वात्तदेतिचेत् अस्ति तावत्सा
कृताविच्छा दृष्टीच्छावत् अस्ति च कृतिसाध्यत्वप्रकारिका तत्रे
च्छा तथापि कृतीच्छैव कृतिहेतुर्लाघवात् न तु कृतिसाध्यत्वप्र
कारिकाइच्छा गौरवात् न चावगतिप्रवृत्त्योः समानविषयत्व
मुभयसिद्धं तस्यैव विचार्यत्वात् कथं तर्हि कृत्या साधयामीती।
च्छा येन रूपेण यस्येष्टसाधनत्वं तेन रूपेण तत्त्वेच्छासत्वात् यथा
स्वकेदारवृष्टित्वेन देष्टसाधनत्वात्तथैवेच्छा तथा कृतिसाध्यत्वेन
पाकस्यैवेष्टसाधनत्वात्तथैवेच्छासत्वात् अन्यथा तत्तदुपाय
साध्यत्वे मेच्छा तत्तदुपायस्यत्वप्रकारकज्ञानात्स्यादित्यनन्त।
कारणकल्पनापत्तिः मम तूपायेच्छायामिष्टसाधनत्वाज्ञान
मेव हेतुः अत एव वैकल्पस्य पाभिधेयत्वप्रत्यासत्तेरंतरंगत्वाद्वि
धिप्रत्ययाभिधायेष्टसाधनत्वस्य कृतावेवान्वयो न प्रकृत्यर्थः
न थैव चिकीर्षा हेतुज्ञानजनकत्वात् प्रकृत्यर्थस्य च कृतौ
विषयत्वेनान्वयः उच्यते याकस्य वह्निसाध्यत्वेन कृति
साध्यत्वेन वानेष्टसाधनत्वगौरवात् किंतु पाकत्वेन स च कृ

कु० वृ०
९६
७८

त्तिं विनानेत्यसदेतत्‌· कथं तर्हि वन्हिना साधयामीतीच्छा रष्टसा
धनत्वे ज्ञाते यत्र यत्साध्यत्वज्ञायते तत्र तत्साध्यत्वेनेच्छा सत्वात्‌
यथाहीष्टसाधनत्वेन ज्ञाते वन्हिसाध्यत्वज्ञानाद्वन्हिना पाकं
साधयामीतीच्छा तथा कृतिसाध्यत्वेन ज्ञाने पाके इष्टसाध
नत्वज्ञानात्कृत्या साधयामीतीच्छा तथा चेष्टसाधनत्वेन कृतिसा
ध्यत्वेन च कृतिसाध्यत्वप्रकारिकेच्छा नाविष्टसाधनताज्ञान
मात्रादिति कृतिसाध्येष्टसाधनता विधिः नित्ये च स्नानादौ यथे
ष्टसाधनत्वज्ञाने सत्यपि न नित्यता स्यात्तथा निपुणतरमुपपा
दितं द्वितीयाध्यायप्रकाश इति संक्षेपः नत्वेति· पचतीत्यादौ ना
वनाविषयः पाकादिधातुनोच्यते भावनात्वानभ्यातेनेत्यर्थः
शेषमित्तियज्जेनेत्यादौ तु लिङा भावनाविषयत्वागादेरिष्टसा
धनत्वमुच्यत इत्यर्थः अन्वयबलादिति· प्रकृतिसंभभिव्या
हारादित्यर्थः न त्वत्रियादिना लिङा बोधितादाभिप्राया
दिष्टसाधनत्वमनुमीयते तत्तुः प्रवृत्तिरित्यर्थः सभपश्चेश्व
शेषसंकेतेऽएवं चेति इष्टसाधनता न लिङाभिधीयते किं त्वा
भिप्रायविषयत्वेनानुमीयत इत्यर्थः तदुपपादयति हेतुत्वा
दिति अनुमानादिति विधेरिति शेषः मध्यमादाविति मध्य
मपुरुषोत्तमपुरुषलिङ इष्टसाधनता वियोगादित्यर्थः अ
न्यत्रेति आज्ञाध्येषणादौ लिङ इच्छावाचकत्वं कल्पनाद्धि
ज्ञात्रस्यत्र यैवौचित्यादित्यर्थः निषेधेति· सर्वत्र विधिप्रका
रेषु न हन्यादिति निषेधानुपपत्तेरित्यर्थः हेतुत्वादिति व्या
चष्टे· अमिकाम इति लिङे वेष्टसाधनत्वाभिधाने यतस्तन्म

यनादितिहेत्वभिधानपर्थमित्यर्थः अनुमानादितिविवृ
णोति· तरतीति लडौ इष्टसाधनताभिधानेविधेरेनुमानंप्र
थतदर्थस्यवाक्यादेवप्रतीतेरितितदेन्यएवलिङर्थइत्यर्थ
इत्यर्थः मध्यमादाविनिव्याचष्टेकुर्यादितितवेदमिष्टसाधन
मनः नुःर्पाममेदभिष्टसाधनमितिकार्यमितिवाकारान्म।
ध्यमपुरुषदोसंकल्पएवलिङर्थइत्यर्थः अन्यत्रद्वघसाम
र्थ्यादितिविवृणोतिसर्वत्रचेति अंतिमंहेतुव्याचष्टेनचेतिन
हन्याहितिनिषेधेनसहद्वंवदननाचमेहननाभावविषयाभा
वनातदर्थःस्यातः तत्रचविधिवैपर्थ्येहननप्रागभावास्यं
ताभायारसाध्यत्वात् हनेनभावनावास्तीत्यन्वयश्चनसंभ
वतिवाधात् नतोहनञविषयाभावनाभिधेयानिषेधान्व
योवाच्यस्तत्राहव्याघानादितिअभिधाविधिवादिनाहन्या
दितिपदहननभावनाभिधायकमेवेतितन्निषेधेव्याघा
तेइत्यर्थःपद्यपिभदानाभभिधानसंकेनः किंतुशब्देनि
ष्टंधर्मोतरंतथापिसिध्यसिद्धिव्यापाताभ्यातन्निषेधोनश
क्यइतिभावः पदाकालत्रयापरामृष्टाभावनेत्यत्रविधिरि
त्यनुषस्यनेः एवगुतरत्रकदाचिद्धननभावनायोधोनश
क्यइतिभावः पदाकाकालत्रयापरामृष्टाभावेनेत्यत्र
विधिरित्युनुष्यज्यतेः एवगुतरत्रकदाचिद्धननभावना
यासत्वातन्निषेधेस्यात्संताभावरूपत्वंतात्स्त्रीत्याहतदाने
तीतिकार्यत्येताविधिपक्षेनिषेधानुपपत्तिमाहषदाका
र्येमिति· यथाख्यानेननतत्वपक्षदाहननेकृतिसाध्येत्व

कृत्युद्देशान्वयोरुभयोरपिसत्वात्तन्निषेधोबाधितइत्यर्थः
हननस्यकार्यमाहदुःखनिवृत्तीतिनिरातंकमितिअत्रकिं
मुतापूर्वस्यनिषेधोदुरितापूर्वस्यबाधेधर्मोनुत्पादेप्यमो
त्पादकत्वेमानाभावादृष्टफलार्थीहननेप्रवर्ततांत्येचमुत
रांप्रवृत्तिस्यादित्यर्थः अथनञोधात्वर्थान्वयस्तत्राहाहन
नेनिकारणस्येतिहननप्रागभावस्यानादित्वादनाद्यपूर्व
स्यादित्यर्थः ननुहननप्रागभावविषयाभावनाऽपूर्वमुत्पा
दयेष्यतीत्याहभावनापाश्चेनिप्रागभावस्तदाभावना।
विषयःस्याद्यदिनस्विरूपंभावनासध्यंस्यान्नचैवमित्यर्थः
संकल्पविधिपक्षेनिषेधानुपपत्तिमाहाननेतिसर्वदाकिं
महननसंकल्पेनापूर्वंभावयेदित्यर्थः यदाकदाचिद्वाआ
घेः यावज्जीवमिति॰ अप्रसक्तदित्तिनियोगार्थोविध्यर्थः
पिपरीतेति॰ अहननसंकल्पेनैवेत्स्यात्तथानतस्येतिप्रवृ
त्तिमतएवनिषेधापूर्वेधिकारइत्यर्थः तदश्रुतेरितिहन
नसंकल्पवतोविपरीतसंकल्पवतोऽश्रुतेरित्यर्थः ननुअ
सक्तंहननंनिषेध्यंहप्रसंगश्चकत्करणसंकल्पएवइक्का।
याएवाधप्रवृत्तित्वादित्यश्रुतमपितल्लभ्यतइत्याहप्रसक्त
मितिभात्रहननंनिषिध्यतेकिंतुहननाभावसंकल्पका
रणकमपूर्वंविधीयतइत्याहनवैकिंचिदितिकिंचेति
अपूर्वंबाध्यतेपिनकलंजंभक्षयेदित्यादितः कलंजभ
क्षणाभावविषयकमपूर्वमवगम्यापितदभावेनप्रकर्त्ते
ततयाहिकलंजभक्षणेरा गादस्यकर्त्तव्यतावुद्धिर्जाता

शब्दाच्च भक्षणाभावोनष्क नाच्च कार्यो मस्फलं गरीयइतिस्या
धेमसुखहेतौभक्षणाएवप्रवर्तननवनदभावेतस्यनिष्फल
त्वात्ः नचनिषेधापूर्वमेवफलंतस्यसुखदुखाभावान्यतया
यंडाचेनतदजनकतयाचगौणमुख्यप्रयोजनत्वाभावात्
अथप्रवृत्तिगतोनिवृत्तिमतोनियोगाधिकारइतिपराभ
क्षणेप्रकृतस्तदातन्निषेधेशाब्दकार्यागज्ञानातेनविपरी
तप्रयत्नेजनितेरागान्नक्रियोत्पत्तिः तेनेवेप्रतिबंधादितिचे
न्नृनिवृत्तिकार्यनाज्ञानेपिनिःफलत्वेननिवृत्तौप्रयत्नएवा
नोत्पत्तेयस्यप्रतिबंधकतास्यातः नचशास्त्रपयस्यशास्त्र
जयकार्येनाज्ञानंवलवदितिवाच्यंनस्यफलविषयत्वादेत
स्यचनिःफलविषयत्वात् अथकलंजभक्षणस्यानिष्टार्थ
वादेनवलवदनिष्टसाधनत्वज्ञानातभक्षणेनप्रवर्तेतइ
तिचेत् एवमपिकानंजभक्षणेनिवर्ततातदभावेतिःप्रयो
जनत्वेनाप्रवृत्तौकिमायातमित्यार्थः तथाचेतिवस्तुतः
शत्रुहननभावनायाःकलंजभक्षणाभावनायाश्चेष्ट
साधनत्वमरूपेवेत्यर्थःतिभावः अतएववक्ष्यतिनही
तिअन्यंत्वासस्यपिज्ञानमर्थेशब्दःकरोतिहीतिन्यायेना
हतथापीतिप्रसक्तेवहिंसायागादिविषयामाडखंडेननि
षिध्यतेनचसानिष्टसाधनमितिव्यभिचारइत्याहयाखं
डेतिनासावितिप्रमाणत्वेनहेतुविशेष्यइत्यर्थः प्रमा
णवाधितार्थविषयत्वेनयाखंडागमस्येवनहन्यादित्य
स्याप्यप्रामाण्यःरचादित्याहार्थेहिनिनतुगंगायांघोषइ

कु०व०
९८
७४

इत्यस्यैव न हन्यादित्यस्याप्यर्थो नञ् निषेध्यमानानिष्टसा
धनत्वरूपे तात्पर्यान्न ह्योधकत्वं स्यादित्याह तात्पर्यत इति
अर्थवादवचनानामन्यत्र विधौ तात्पर्यं न तु विधिवचन
स्येष्यभ्युपगमात्तदनुरोधेनान्यत्र लक्षणा युक्ता न तु तत्रैवे
त्याह नविधाविति भावविधावेव तु निषेधविधावपीत्याह
तथापीति यत्र लक्षणीयार्थेनाविनाभावस्तद्दर्शनप्रयो
गस्तत्रैव लक्षणा न च हन्यादिति वाक्यमन्यपराधीनप्र
युक्तं न चेष्टसाधनत्वेनाविनाभावस्तस्याहाविनाभावेति-
ननु यथाऽसुरादिपदे निषेधो न नञर्थः किं तु तदन्यत्वं तद्वि
रोधित्वं तथात्र नञर्थे इष्टसाधनविरोध्यनिष्टसाधनमित्यर्थः
स्यादत आह नापीति क्रियासंगतस्य नञः प्रसज्यप्रतिषेध
वाचित्वात्समास एव तस्य पर्युदासवृत्त्यान्यदितरविरोधि
परत्वादित्यर्थः निषेधोक्तधर्मो वेत्यभिमतं पक्षमुपसंहरा
ति विधिरिति प्रवृत्त्यादावित्यादिपदान्निवृत्तिः विषयसप्त
मी चेयं तेन प्रवृत्तिनिवृत्तिविषय आप्ताभिप्रायो लिङर्थ इ
त्यर्थः प्रवर्तकमिष्टसाधनताज्ञानमेव लिङर्थस्त्वाप्ताभि
प्रायो लाघवादिति भावः नन्वभिप्रायस्य विधित्वे कुर्यादि
त्यादावर्थभेदमानुभविकमुपपादयति तत्रेति स्वर्गकामो य
जेतेत्यत्र स्वर्गकामकृतिसाध्यतया यागो यागयत्नो वा आप्तेष्ट
इत्यर्थः ततो यो व्यापारो यस्य कृतिसाध्यतया यद्व्यापार
विषयः प्रयत्नो वा यस्याप्तेनेष्यते तस्य वा तदनिष्टानुवं
धीष्टसाधनमिति व्याप्तिग्रहणाद्यागस्येष्टसाधनत्वमनुमि

नोतितथाहियागोमदिष्टसाधनंमलक्षलविषयतयामदाभ्रे

नेष्यमाणत्वत्वाग्वथामत्विनामलयलविषयतयेष्यमाणंभो

जनंमदिष्टसाधनंतथावेदंतस्मात्मदिष्टसाधनंनकलुज

भक्ष्यपेदित्यत्रकलंजभक्षणंममवलवदनिष्टसाधनंमदि

ष्टसाधनत्वेसत्यपिमदाभ्रेनमलयलविषयतयाऽनिष्यमा

णत्वात्यथामल्विनामलयलविषयानिष्यमाणंमधुविष

संपृक्तान्नभोजनंममानिष्टसाधनलिङादीनांसाक्षात्प्रवर्तक

ज्ञानजनकत्वेबाधकाभावान्नपरंपराजनकत्वमितिनवाच्यं·

अनन्यलभ्यस्यशब्दार्थत्वनियमेकर्त्रादेरिवान्यलभ्यस्यहे

तुत्वादिसादेश्चबाधकत्वात् त्वयापिस्वकृतिसाध्येष्टसा

धनतामंतरानुमायपताशब्दस्यसाक्षात्प्रवर्तकत्वातंगीका

राच्चेतिभावाधिरेवः नन्वेवमन्योन्याश्रयः तत्रापवंतास

र्वेगौरयीतः ईश्वरायकत्यनायते:मेव·लोके आसाभिप्रा

येलिङ· शक्तिग्रहाद्वेदेपिपरिशेषादीश्वराभिप्रायेपर्य

वसानातत्रैवशक्तिः पश्चात्तथैवकार्येशक्तस्यलिङादेरपू

र्वेपर्यवसानंफलमुखंगौरवंनदोषायशक्तिग्रहदहकालेसि

द्ध्यसिद्धिपराहतत्वात् ईश्वरेगानान्तरोपदर्शनाच्चेतिभावः

एतदेवाभिप्रेत्याहयएवेतिलोकदृष्टाएवपदार्थावेदेष्विप्र

त्यभिज्ञायमानाः कथमन्यद्रसार्थः अनर्थकेतिगृहीत

संगतेलौकिकपदादन्यत्वेनागृहीतसंगतित्वादित्यर्थः:ते

यामितिउपाध्यायवंश्यानामतीन्द्रियार्थज्ञानाभावात्तत्रे

छ्रानसभवतिशुकादीनामिवतावत्यदज्ञानाद्विवसात

श्चोच्चारयितत्वमात्रमित्यर्थः स्वार्थद्वारैवेति मुख्यार्थो बाधा
त्तत्रैव श्रुते स्तात्पर्यमिति नान्यपरत्वमित्यर्थः सिद्धार्थतत्पे
निरूढमत्रामि संहितं व्यवहारान्नावदाघायुत्पत्तिः उपाया
न्तरस्य शब्दव्युत्पत्त्यधीनत्वात्तथाहि प्रयोतकवाक्योच्चार
णानन्तरप्रयोज्यप्रवृत्तिमुपलभमानो व्युत्पित्सुः प्रेक्षावद्वा
क्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयाद्यनुविधानादु
पास्थितत्वाच्च प्रयोज्यप्रवृत्तिमेव प्रयोजनमवधारयति तच्चत
दनुकूलव्यापारं विनानुपपद्यमानं कार्यत्वज्ञानमेव व्या
पारकल्पयति स्वप्रवृत्तौ तस्यैव कारणत्वनिश्चयात् एवं च श
ब्दस्य हेतुत्वमवधार्य तत्रैव शक्तिं कल्पयति उपस्थितत्वात्त
श्चावापोद्वापाभ्यां क्रियाकारकपदानां कार्यान्वित
तदर्थेषु शक्तिं गृह्णाति प्रथमं सामान्यतस्तत्रे वशा भ्रिय
ह्यात् देतिकार्यत्वान्वित एव पदानां शक्तिरिति सिद्धार्थोन
प्रमाणं अथाकांक्षादेस्त्वपापि वाक्यार्थज्ञानहेतुत्वेतोप
गमाज्ज तएव कार्यं पदसमभिव्याहारात्कार्यत्वज्ञानसंभ
वेनान्यलभ्यत्वान्न कार्यांशेपि शक्तिः परं परयापि शब्दस्या
कार्यत्वज्ञानानुकूलत्वादर्थापत्तेः परिक्षयात् किंच का
र्यवाचिलिङादीनामाकांक्षाद्युपेतपदार्थोपस्थितत्वार्थवो
धकत्वस्यावश्यवाच्यत्वात्सदौतराणामपि तथात्वमस्तुला
घवात्तमेव पदानां कार्यान्वितस्य ज्ञानेस्य क्षात्तस्यौत्सर्गि
कत्वेन तदर्थं वहेतुत्वस्यन्याप्यत् अन्वितपदार्थज्ञानेव
हेतुत्वे परं परापाज्यप्यतादर्थापत्तेः साक्षादुपपादा

कश्चिद्वपत्वेनसाक्षादुपा।पादकेकार्यान्वितत्वज्ञानेपदा
नांशक्तिकल्पनात्ः लिङादीनांशक्तेरकल्पनादन्यलभ्यं
त्वेतकस्याप्यभावात् आपव्युत्पत्तेर्विचार्यत्वात् नचकार्य
त्वाविलिङादीनामभिचारः कार्यत्वविशिष्टज्ञानजनक।
त्वहिसर्वपदानांतच्चकार्यान्वितस्वार्थप्रतिपादकत्वयेतरा
न्वितस्वार्थकार्यप्रतिपादकतयावेतिनविशेषः अथसि
द्धार्थेपिव्युत्पत्तिःसंभवति· तथाहिउपलुधर्यैत्रपुत्रज
न्मावार्त्तंस्मादृशेनैववाभोहारेणसमंवैत्रसंमीपंगतश्चै
त्रपुत्रस्तेजातइत्येतद्वाभोहरवाक्यंशृश्चएवनूचैत्रस्यमुख
प्रसादंपश्यन्नुश्रोतुर्हर्षमनुमिनोतिहर्षाचतत्कारणपुत्र
ज्जन्मज्ञानंकल्पयतिउपस्थितत्वादुपपादकत्वादमोपस्थि
तोगोरवाच्चतत्रवाक्यस्यकारणताकल्पपत्तिलाघवात्·
मैवं· हर्षहेतूनांवहूनांसंभवाद्धर्षेणलिंगेनपुत्रजन्मज्ञा
नस्यवालेनानुस्मृतुशक्यत्वाप्रियान्तरज्ञानस्यवरिशेष
पिनुमशक्यत्वात्· अतएवविधिशेषीभूतार्थवादानांस्व
गयेदशलियाहकार्णाचप्रवृत्तिपरत्वेनपरंपरयाकार्या
न्वयात्कार्यान्वितस्वार्थबोधकत्वमिति· तद्वोत्वेतिःसा
ध्यार्थानामिवसिद्धार्थानामपितत्रैवतात्पर्यमितिनमु।
ख्येर्थेप्रामाण्यमित्यर्थः अन्यत्रेतिफार्येतदन्वितेचश
ल्वेरवधारणात्सिद्धार्थानामपितत्रैवतात्पर्यमितिनुमु
ख्येर्थेप्रामाण्यमित्यर्थः स्वार्थेतिकार्येतेषांतात्पर्येकिंप्र
तियाद्यमानसिद्धार्थान्वपरस्कारेणकिंवास्वार्थमप्रतिया

धेत्यर्थः प्रथम इति अवाधितं पदसमन्वयलभ्यमर्थमादायै
व तेषां कार्यपरत्वात्स्वार्थेपि प्रामाण्यमवर्ज्जनीयमित्यर्थः
ज्योतिःशास्त्रवदिति यथा ज्योतिःशास्त्रस्य वेदांगस्य दर्शा
दिकालार्थमादायैव दर्शादियागविधौ तात्पर्यं तथा सिद्धार्थे
वेदानामपि स्वार्थं प्रतिपाद्य तत्रैव कार्ये प्रामाण्यमित्यर्थः
अन्यथेति पदस्वार्थमप्रतिपाद्यैवान्यपरत्वेमिति हिनीः
कल्पइत्यर्थः लोहशंकुन्निवेदांतवोध्यनित्यतानादिरूप
इत्यर्थः इत्यसीति ईश्वराभावे ईश्वरमुपासीतेत्यादिविधेरा
नर्थक्यप्रसंग इत्यर्थः सालोक्यसमानलोकत्वा· सायुज्यसा
यत्ताणिमादिकं आदिपदात्सारूप्यादि अत्रापीदमभिप्रे
तं पदार्थो यस्यासाक्षादुपपादक एव पदानां शक्तिस्तदा घ
टानयने कार्यत्वेज्ञान एव पदशक्तिकल्पनाप्रसंगः घटमा
नयेति वाक्यश्रवणानंतरं प्रयोज्यस्य घटानयनप्रवृत्त्या
घटानयनकार्यताज्ञानस्यैवानुमानात् प्रवृत्तिकार्याधिन
ज्ञानस्य प्रवृत्तिविशेषे तस्या हेतुत्वात् अथ घटानयन
क्रियायाघयं मक्रियात्वज्ञानां प्रवृत्तिमात्रानुमानं तेन
कार्यान्वितत्वमनुमापतत्रवाक्यमात्रस्य कारणलंगही
त्वा शक्तिकल्पनेति· तदुत्तर विशेषयोः कार्यकारणभाव
ग्रह इति चेन्न त्वयमं प्रवृत्तिमात्रकार्योचिनज्ञानमात्रयोर
नुमानं भवति क्रमेणेत्यत्र मानाभावात् घटादिपदश
क्तिग्रहस्य तेन विनापि संभवात् भवत्सामान्ययोः कार्य
कारणभावग्रहो विशेषयोस्तथात्वज्ञाने हेतुमत्रेतिवा

यं विशेषयोरन्वयव्यतिरेकाभ्यामिव तद्ग्रहाद्विशेषयोः
कार्यकारणभावज्ञाना सामान्ययोरपि तथात्वमनुमापयती
ति चेत्तर्हि विशेषयोः कार्यकारणभावज्ञानं प्राथमिकमिति
तन्मूलकः प्रथमं परविशेषशालिग्रह एव स्यात् निष्प्रयोजन
त्वेनान्तरानुमितेर्मानाभावात् । किंच ममेदं कार्यमिति ज्ञानं
साक्षादुपपादकं प्रवृत्तौ स्यात्तस्य कारणत्वेनानुमितमतस्तत्र
शालिंग्रहणीयात् साक्षादुपपादकविषयत्वात्कल्पनायाः न ।
पितं कार्यमिति ज्ञानं न स्यमासाक्षादुपपादकोपपादकत्वात् अ
थेदं कार्यमिति ज्ञानं साक्षादुपपत्त्यैव परं परयानुमानद्वारम
मेदं कार्यमिति ज्ञानसंभवादन्यलभ्यत्वेन न तत्र शालिकल्पन
मिति तुल्यं अपि चास्तु प्रथमं कार्यत्वाचित ज्ञाने वा कस्यसा
क्षात्कारणताबोधाभ्यत्र शक्तियहस्तथाप्याधायोद्वाभ्यां प
दविशेषस्येतराचितं स्वार्थज्ञाने शालिकल्पपतिलाघवात्
ननु कार्यत्वांशेपि गौरवात् दन्यलभ्यत्वाच्च अन्यथासि
द्धिमपश्यतो वा लुस्यपर्वेतत्संभवेपि पश्चाद्गौरवान्यलभ्यत्व
तर्कसहकृतमानेन तद्बाधे वा चितानच प्रवृत्तिहेतुतयोप
स्थिते कार्यान्वितज्ञानं हि त्वान्वितज्ञानं कल्पपित्वात् तत्रश
लिकल्पनमयुक्तमुभयथा गौरवादिति वाच्यं कार्यान्वितज्ञा
नेन्वितज्ञानत्वस्यापि सत्त्वात् तद्विशेषत्वात् तस्य तथात्वेपित
दुपस्थितावन्वितज्ञानत्वं न विषय इति तदुपस्थित्यंतरं क
ल्पनीयमिति चेन्न । कार्यान्वितज्ञाने न्वितज्ञानं विशेष्यमि
ति तदुपस्थितौ तस्यापि विषयत्वात् विशिष्टज्ञानस्य विशे

कु०वे०
१०१
101

ष्वविषयत्वनियमात् अन्यथाऽन्यज्ज्ञातिज्ञानेनान्यच्च जाति
विशिष्टव्यलिङ्गानमितिव्यलिङ्गानमितिव्यलिङ्गानमपहा
घज्ञातित्वानंक्वापिनोपस्थितमितिनववज्ञातिरेवपदार्थः
स्यात्पुत्रहर्षहेतुत्वंनावक्तृज्ञानंसंनवाहिसुक्तत्वन्नखालोगही
नहर्षहेतुस्तनयानारेवाधावलारात्तः अन्यस्यदर्षहेतो
रग्रहात् अनउपस्थितत्वादुपपादकत्वाच्चपुत्रजन्मज्ञान
त्वेवहर्षहेतुतयाकल्प्यपतिनचामत्वियज्ञानहेर्षहेतुर्भवि
ष्यतीतिशंकथमेवममितिवाध्यकार्यान्विनत्वानेशलिप्सद्धा
नापत्तेः प्रयोज्यज्ञानहेतत्वेनाहुलात् अवनन्यथासिद्धा
शब्दानुविधानंचतुल्यमितिसंक्षेपः पस्परकर्त्वंवकमिति
एतद्धेदवाक्यसमानकालोत्पत्तिकज्ञानाजन्यमिदंवेद
वाक्यंसमानविषयकज्ञानजन्यवाक्यत्वाल्लौकिकवाक्य
वदित्यत्रतात्पर्यः विपक्षेचेति पुरुषगुणाभावेतज्जन्य
प्रामाण्यभगश्रुतार्थपित्यानर्थक्यादित्यर्थः नतज्ज्ञापी
तिवेदिकोत्रमपुरुषोवक्तस्तवपरः उत्तमपुरुषत्वाल्लौ।
किकोत्तमपुरुषवत् वक्तरित्वंतंआदिविशेषणाच्चान्नुव
क्तोथतरमितिभावः अन्यथेतिवक्तासममन्वचानभि
धानेतदन्येभाष्यन्वयानभिधानादपार्थत्वमित्यर्थः प्र
वक्तृणामितिआगतुकनिवंधनत्वेसमाख्याविशेषाणां
तदानत्वातदाख्यापिशाखापिशाखानांस्यादित्यर्थः न
चयेनपाशाखाप्रकर्षेणाधीतासातत्समाख्येत्याहनापि
तिउपाध्यायपटिजानुपूर्वीभिन्नानुपूर्वीपेदिप्रकर्षस्त

त्राहोपाध्यायेभ्योपीति अथयथैषनतोधीनास्त्यैवतस्या
दृष्टदानप्रकर्षइत्याहतस्याटेति यदिवाशोभनवर्णोच्चारपि
तन्वप्रकर्षस्तत्राहकतिचेति नचब्राह्मणत्वव्याप्यं कटत्वादि
क्षत्रियेसंभवतीत्याहनचेतिननुक्षत्रियाद्यधीतापिशाखा
कटत्वादिजातिभद्ब्राह्मणैर्येषांधीयतेसकटादिपदइत्यत्र
त आहनकटाइतिप्रागेवमिति पूर्वकटैःस्वशाखेवाधीता
धीना घुनातुशाखांतराध्ययनरूपोविप्लवइत्यर्थः वित्तव
एवेतिकटत्वादिव्याप्यजातिविप्लवः कयादिसभाख्याय
व व्यतिरेकइत्यर्थः ल[illegible]मादितिकटादिशरीरमधिपसा
गोदावीश्वरेणयाशाखाकृतासानत्समाख्येतियरिशेष
इत्यर्थः अत्रनित्यज्ञानवद्वक्तकवाक्यवाचनिकश्रौनक
टपदादीनिकिंविप्लवक्तृकवाक्यवाचनिकानिवाक्यवाच
कत्वान्मन्वादिसंहितापदवदितिमानमभिप्रेतंरूपतीप्र
बंधेनमनतरूपांप्रलिज्ञातामुपासनांनिर्वाह्यनतावन्मा
त्रान्मोक्षेनुमितिरुपविशेषदर्शनस्यप्रत्यक्षप्रभानुच्छेद
कत्वादपितुप्रत्यक्षरूपतद्धेतुरितिदर्शयतुमाहसएवमि
ति अत्राप्रत्यक्षसामग्रीमुपाधिमाहनन्वितिसामग्र्याअ
तीन्द्रियतयायोग्यानुपलम्भेननिषेधो शक्यः नचतस्या
कार्यव्ययवयातदभावादेवाभावइतिवाच्यकार्यस्यापि
पुरुषांतरप्रत्यक्षज्ञानत्वेनायोग्यव्यतिरेकत्वात्साधनव्या
पकतयास्यतोपाधिरित्याहकार्येकोन्येयेति अप्रत्यक्षहेतु
यावद्विशेषाभावायोग्यायाअपिसामग्र्याअभावउन्ने

कु०व०
१०२
102

च: तन्न- यथास्वज्ञानेसहकारिविशेषान्मनसोवहि: स्वा
तंत्र्यंतथाप्रकृतेपियोगजधर्मोभस्यतथात्वमित्याहापि
चेतिपटीपसत्वमसंदिग्धविषयत्वंस्मृतिविपर्यासोविपर्य
यरूपास्मृति: प्रागेवेति: अनुभवत्वस्याबाधानादित्यर्थ:
नचसंभवत्यपिस्मृत्वावनुभवत्वविपर्यासवत्यनुषजनीयंय
दिसघटइतिस्मृतावनुभवत्वारोपस्तदातघटमनुभवामीति
स्यान्नत्विमंघटमनुभवामीत्याहनहीतिननुप्रमापामे
वमनसोवहि:स्वातंत्र्यस्वप्रज्ञानंत्वप्रमेत्यतआहास्तिचे
तियासमसाक्षात्कारोभ्रमोभावनाप्रभवाकामातुरकामि।
नीसाक्षात्कारवदित्याशंक्यतत्प्रमात्वमुपपादयतिसत्रेति
अर्थज्ञानावधिनेतिस्वाध्यायोध्येतव्यइतिविधे: परिशे
षादर्थज्ञानावधित्वंसिद्धमितिभाव: एतेनेतिपरमाणवा
द्योपिभ्रमेपलाप्य घ्यत्यक्षाइत्यर्थ: एकमेवेतिइश्वराख्यं
ब्रह्मैकमेवनद्वितीयमित्यर्थ: मदर्थमित्यनेनेश्वरज्ञा
नार्थतांकर्मणोदर्शयताज्ञानकर्मणोस्तुल्यकक्षत्वपा
समुच्चयपक्षस्यमभिप्रेतं अनुशिष्यतेउद्दिश्यतइत्यर्थ: ईश्व
रस्याप्यवृश्यत्वेयोमहार्षेणानपितज्ज्ञानार्थित्वादित्याहात
मितिईश्वरवेदमफलमाहास्मिन्निति पक्षेति· अनिंद्रि
यार्थेप्यन्यायाधिगमतेपीश्वरेकुनकोप्यासवशान्नत्ये
तितप्रत्याहइत्येधर्मिति इति शब्द: स्वरूपार्थ: एवंशब्द
श्चप्रकारार्थ: नीतिर्न्याय: शैलसार: पाषाण: लोहंवा
तद्दृढाशयोयेषांतेतथाप्युत्कप्रबंधानाश्रयत्वदृश्चैवंप्र

कु० वृ०

१०३
103

च्यादित्यर्थः प्रस्तुते ईश्वरे विप्रतीपमित्यन्वयः प्रतिकूलो घमास्ता
दृशा अप्युच्चैरंतकाले कदाचिन्भवच्चिंतकाइतियोभनाभाव
नीचावासनीयाः शंकाकलंकशून्याः कर्तव्यादित्यर्थः।
अस्माकंन्विति यद्यपि त्वयि चेतो निमग्नमित्यद्वा तत्वं तथापि
तरलंमनो नाद्यापितसंतृप्यते तृप्तीभवति तत्तेः क्वचित्समेक
त्वात्कर्मकर्भरिरूपं त्वरेकालमतात्वत्वपणतापाभ्याः चमरेव
ताकाः यातनाः नरकपीडाः इत्येषरतिइतिः समासो एषनी
तिः कुसुमांजलिः दक्षिणवामकौहौय दिवासयेत् सानंदस्ये
त् सानंदंकुर्यात्· नवावासयेत् ततः किमस्माकंयद्वा· यद्वास
येदित्यर्थोक्त एवयदिनृपान्मानवासतितमत्याह नोवावास
येदित्यनेनसंबंधः ततः किंतद्वासनार्थो किंचित्फलमित्यर्थः
यतः यदमेव पीठं नत्र पापं कुसुमांजलेर्यत्समर्पणं तेनभवामी
तोस्तु यस्तर्कतंत्रख्यातपत्रसहस्ररश्मिर्भगेश्वरः सुकवि
कैरवकाननेंदुः तस्यात्मजो ति विषमं कुसुमांजलिंतप्रका
शपकृतिमुदन्धुधवर्धमानः इतिमहामहोपाध्यायश्रीव
र्धमानकृतौ कुसुमांजलिप्रकाशे पंचमस्तवकः॥ ॐ॥

(क) ८२
(ख) ४३
३६
१०२
१६६

८२
१७७
२५८ पन्नाये

੮

ਕੁਸੁਮਾਂਜਲੀ

ਮੂਲਅਰਟੀਕਾ ਘਰਮਾਨ

ऊरुसंज्ञातिप्रकाश

न्यायपत्र